श्री२

...त्वादि शब्दापर्यायत्वाभिधानेन...
...वृहत्वंस्वरूपगुणरहत्वं तदे...
...दायलक्षणेनैव ध्येयसत्र...
...तुक... ...ति
...ना...

प्रथमस्कंध १

श्री· भा· ॐ श्रीगणेशाय नमः श्रीभगवते नमः गुरुचरणकमलेभ्यो नमः वंदे देवास्पमहोवलार्यतनयं वात्सस्यवारांनिधिं श्रीशै
टी· १ ...गुरुं श्रियः पतिमपि प्राचार्यपारंपरीम् तु यस्यैवाहमशेषहेतुमजितस्याजं तदुत्संगजं देवर्षिप्रवरं पराशरसुतं व्यासं
च वैयासकिम् १ श्रीशैलपूर्णादखिलेतिहासपुराणजालं समवाप्य येन प्रावर्तिसंदर्शि यतेव शिष्य भाष्यमि
लक्ष्मणमाश्रयेहम् २ श्रीरामानुजयोगिपूर्णकरुणापात्रं महांतं ततः संप्राप्ताखिलवेद्यविद्यमखिलान् योद्यादिशन्
करोत् वेदांतान् कुरुकेश्वरं गुणनिधिं श्रीविष्णुचित्तं गुरुं वात्स्यं तं वरदं च वाग्विजयतां व्यासार्यमीडीमहि ३ श्रीमद्भाग
वतपुराणमखिलैर्व्याख्यातमिष्टं कृतं व्यासार्यैर्यतिराजभाष्यवचसामर्हैर्विधानां मुदे मंदानामपि मादृशामवगमायार्हं तं
दर्शितं पंथानं समुपाश्रितो विवृणुयां मत्साहसं चद्दमतां ४ तत्र भगवान् व्यासः पराशरः सत्यवत्यां भगवदंशेनावतीर्णो बादराय
ः खिलहेयप्रत्यनीककल्याणगुणगणेन परेण ब्रह्मणा विरचिते स्मिन् ब्रह्मादिस्तंबपर्यंते देवमनुष्यपशुपादपत्वादिभि
तर्९ र्जुर्वर्णपंचानुराश्रम्यादिभेदभिन्ने जगति तदुपकल्पितदाराधनोपयुक्तकरणकलेवरान् चतुर्मुखादिपरंपरावर्तिततदि
प९· सितत्स्वरूपधर्मार्थकाममोक्षपुरुषार्थचतुष्टये तत्साधनावबोधधीतवेदानपि स्वस्वकर्मवासनानुवर्तिबुद्धिजनगुणप्रवृत्तकर्म
णगर्भजन्मजरामरणादिसांसारिकदुःखोपहतान् नवागतवेदार्थान् जनान् वलोक्यानुकंपितस्तदुज्जिजीवयिषया तेषां दु
धं प्रतिजन्महितोपदेशेन मातापितृसहस्रेभ्योप्यतिवत्सलतमं भागवद्दयालुकं वेदव्याचिख्यासुस्तावत्स्वशिष्येण भगवता जै
६ मिनामहर्षिणा पूर्वभागं व्याख्याय्य स्वयमुत्तरभागं समीचीनैः शारीरकं नयैर्व्याख्याय प्रायशः पूर्वभागोपबृंहणात्मकं
रत्वेन प्रसिद्धं श्रीमहाभारताख्यमितिहासं निर्माय प्राधान्येन वेदांतार्थोपबृंहणात्मकं श्रीमद्भागवताख्यं पुराणरत्नं चि
वदिष्टदेवतोपासनात्मकं मंगलमाचरति प्रथमश्लोके न जन्मादिना मद्य पिन्केचिद् [illegible] भक कर्तृकमिति विवदं
पि चोपनिषद्भागोपबृंहणपरेषु तत्रापि सात्त्विकतया प्रत्यक्षतत्त्वगुणार्थतयाच प्रबलेषु प्र [illegible] मि पोत्र प्र [illegible] स्तु
तमं चरमश्रुतिप्रवर्तकभगवदंशपाराशर्यतनयप्रणीतं पुराणं श्रीमद्भागवतमशेषग [illegible] मिर
प्र२ पादेयं मत्स्यपीसे अंबरीषं प्रति गौतमेनैकं अंबरीषशुकप्रोक्तं श्रीभागवतं सदा पठेत् [illegible]

· मितमुक्तेः

श्रीमद्

भा. प्र. टी. २

९२

कारणत्वं लयकारणत्वं चेत्यनेकेलक्षणं अत्र सत्यं परं ब्रह्म धीमहीत्येतावन्मात्रे केवलं ब्रह्मशब्दस्यात्मादिशब्दपर्यायत्वाभिधानेन ... दिपरत्वस्यापि संभवात् तेषामेवात्र ध्येयत्वं प्रसक्तं तद्व्यावृत्त्यर्थं याव ध्येयस्य ब्रह्मणो निरतिशयबृहत्वं स्वरूपेण गुणैश्च बृहत्वं तदेव ब्रह्म ... बृहत्त्वनिमित्तं प्रकृत्यादिषु ब्रह्मशब्दस्यौपचारिकत्वमिति वक्तुमत्र लक्षणमुच्यते तत्रैकेनैव समुदायलक्षणेनैव ध्येयस्य ब्रह्मणो निरतिशयबृहत्वलाभात् ततएव प्रकृत्यादिषु दासान्नानेकलक्षणत्वं अन्यथा सृष्टिकारणत्वमात्रा ... नुकूलज्ञानशक्त्यादिलाभे स्थितिस्थि... यनुकूलज्ञानशक्त्याद्यलाभेन निरतिशयबृहत्वासिद्धिः नचत्रितयोक्तावपि मोचकत्वापयोगिज्ञानशक्त्याद्यलाभ इति वाच्यं मोक्षस्यापि लयान्यतरान्तर्भूतत्वेन तत्कारणत्वेऽपि तल्लाभात् स्थितित्रीमानि ... परिहार एवं केषुप्राप्यान्यस्य मोचकत्वं चनादृशामेव प्रदिवाचं ... ९

श्रीमन्नारायणो जयति जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म ... आदिकवये मुह्यंति यत्सूरयः तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमही १

१२

जन्माद्यस्येति कनाशब्दपदं ... नहि लयान्तर्भूतः यतइति हेतौ पंचमी नतु जनिकर्तुः प्रकृतिरित्यपादानसंज्ञायां पंचमी ... योरन्वयः स्यात् जनिकर्तुः प्रकृतिरिति सूत्रे हि प्रकृतिशब्दउपादानकारणवाची जायमानस्योपादानमपादानसं... र्थात् अत्र तस्य च विहितापादानसंज्ञानिमित्त पंचम्यभ्युपगमे जन्मकारणत्वस्य लक्षणत्वलाभे ... स्यलक्षणत्वाभावात् तयोरन्वयः स्यादेव हेत्वर्थपंचम्यां तु हेतुत्वस्य निमित्तोपादानसाधारण्यात् दन्वय उपपन्नः ... तः प्रागवस्थायोगित्वमुपादानत्वं निमित्तत्वं नामकर्तृत्वं एवं चात्र जगज्जन्मादि ... उपादानत्वनिमित्तत्वरूपो ... निरतिशय लक्षणं विवक्षितं ननु लोके मृत्कुलालयोर्विभिन्नयोरेवोपादानत्वनिमित्त ... शक्तिनानस्योः ... पण्येकस्य ... इति ... सार्व ... निमित ... भावाः

...सितेन त ... पासि
... केष्वट पटादि
... न्मानान्नामते
भावाः
पपन्नमिति भावः ननु सावेश्या
...इति स्वरूपसंबंधः अकर्म...
...प्रेरकः तस्याज्ञेय ...

व्यासार्यस्य केष्व शुककर्तृकत्वमवगम्यते तथापि तत्प्रणीतमित्यस्य प्रवर्तितत्वा... वंदे देवास्य मदे ... मि१ ... गा सस्रवारांनि [illegible] श्री शो

स्य बहुवचनविरोधायेनः तथाहि तावदस्मिन्नेव ग्रंथे तृतीयाध्याये उत्तमश्लोकचरितं तितस्य ... यं मसहृतं शाष... भगवानृषिः निःश्रेयसायलो ... पुराणसारं सुतं व्या

मासस्तुत२ दं ग्राह यो मात्मविदांवरं इति व्यासकर्तृकत्वमस्य प्रतीयते तथाश्री नारदस्य ज्ञयेतत्पुराणं निर्मातं तस्मादस्मिन्नेव स्कंधे सर्ग ... शाष्य भावं मुनि

कियोगमधोक्षजे लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहितां इति तथा द्वितीये प्रथमेध्याये इदं भागवतं नाम पुराणं ब्रह्मसंमितं ... यो द्वापिशन

दृष्टमिति शुकोक्तेर पितरवगम्यते उदाहृतं व्यासार्य श्रीस्वकितो ते हेतुमिरेवास्य पुराणरत्नस्य प्रमाणमत एवोपायदांते च सकमवः

पुराणांतरसंवादाच्चतस्यैतदेव स्फुटीभविष्यति अत्र गायत्र्युपक्रमत्वप्रतीयते धीमहीति शब्दतः परोतरेरपतम तदुपक्र त्वप्रस... श्रीमद्भाग

द्व३ट हेतुराणे उत्तरखंडे ग्रंथोष्टादशसाहस्रो द्वादशस्कंधसम्मितः हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा गायत्र्याच समारंभो यत्र भागवतं विदुरिति तद... गमा याहेत

ग्रीवर्ण्यते धर्मविस्तारः वृत्रासुरवधश्चापि यत्र भागवतं विदुरिति तत्र जन्माद्यस्य यत इति जगत्कारणत्वप्रतिपादनेन तदर्थकसविशेष... वतो णो वाद्

इतरेन तत्करणं अस्त्वितः स्यादित्यनेन वरेण्य शब्दार्थ उक्तः उक्तं हि सर्वेशः सावित्रीविवरणे वरेण्यं वरेण्यं तु वराख्यानादई रिताइति ... पारप त्वीपुम

द्योतनः सर्वभावानां द्योतमानः स्वयं सदा अज्ञानमखिलं तु यन्निर्गितन्नोकं मत खंडयन्दोषवरवंडते द्योततः प्रकाशकः जन्मा... परावर्ति

व्यापारोहित लीला धाम्नताद्दिनाम्नेशब्दार्थ उक्तः भर्गस्तेजः समाख्यातं भंजयद्दखिलं कर्म तिचतत्रेहोक्तं स्वराट् स्वतेजः प्रे...

हर्विकाक्षेशः प्रेरणं तु प्रचोदनं इति हितज्ञोक्तं एवं प्रदर्शितया गायत्र्युपक्रमत्वसिद्धिः अथ परानि धो ज्यते प्रबंधस्य वेदांतार्थानुगतं प्रव... तंतो द्योतयति

जन्मादीति यतो वा इमानि भूतानि जायंत इति वेदांतार्थप्रत्यभिज्ञानात् शारीरकार्थसंग्रहं चात्र द्योतयति शारीरकद्वितीयसूत्रस्य वादाद्युपात्ते ... पादानात् ...

त्यभिज्ञानादेव परं धीमही त्यत्र ब्रह्मत्वध्याहारो बोध्यः अस्य त्विदं विन्मयस्य जगतो यतो जन्मादितं सत्यं परं ब्रह्म धीमही त्यत्र यः कारणं तु ध्येयत्वा... इति श्रुतेरिति

स्रा७ भावः एवमस्य बाधविर यच्छति जन्मादीति तद्गुणसंविज्ञानो बहुव्रीहिः जन्मस्थितिलयं अन्यपदार्थः अत एव नपुंसकमेकवचनत्वं अतद्गुणसंवि

ज्ञानबहुव्रीहित्वे सत्यैकारणत्वासिद्धिः तथाहि स्थितिलययोरेवान्यपदार्थत्वेन जन्मादिशब्दस्य द्विवचनांतत्वं इदूदेद्विवचनमितिप्रगृह्यसंज्ञायां संबंध... भावप्रसं

गः तद्गुणसंविज्ञानबहुव्रीहित्वपक्षेपि जन्मादिद्वयाणामसमुदितानामन्यपदार्थत्वे जन्मादिशब्दस्य बहुवचनांतत्वापत्तिः जन्मन एवान्यपदार्थत्वं चेत्

विरुद्धं जन्मप्रसंगे तस्यादित्वानुपपत्तिः अथ अतो जन्मस्थितिलयसमाहारमन्यपदार्थं विवक्षितत्वा जन्मादीति तद्गुणसंविज्ञानो बहुव्रीहिः प्रयुक्तः तस्मान्न

स्प३ पदार्थैः ग्रहणाविशेषणानि समस्यमानपदार्थो इति यावत् तेषां समित्येकीकारे संविज्ञाने विशेष्यत्वेनान्यपदार्थीत भावेन ज्ञानं यस्मा बहुव्रीहेः लंब

कर्णो गत इत्यादिः स तद्गुणसंविज्ञानो बहुव्रीहिः तद्विपरीत श्चित्रगुरित्यादिस्त्वतद्गुणसंविज्ञानः यतो जन्मादित धीमही त्यनेन जन्मादिकारणं

णोलक्षणं विवक्षितं यतो वा इमानीत्यादिश्रुतौ प्रतिवाक्यं तद्विशेष्यत्वकर्तुरनेकलक्षणेयुक्तं च जन्मादसमुदायएकं लक्षणं न तु जन्मकार...

प्र॰ भा॰ टी॰ ३

नासंभवान्न शास्त्रं प्रमाणमित्यत आह अन्वयादितस्तश्चार्थेष्विति अत्रान्वयादित्यनेन समन्वयाधिकरणे [...] इत्यन्यधि
करणार्थस्तथापीदं विवक्षितः शास्त्रयोन्यधिकरणे दोषपरिहारस्वरूपत्वेन लक्षणकथनेनैव तदाक्षेपपरिहारयोरप्यत्र वि[...]ने[...]
समन्वयाधिकरणं तु शास्त्रयोन्यधिकरणे दोषपरिहारस्वरूपत्वेन लक्षणकथनेनैव तदाक्षेपपरिहारयोरप्यत्र विवक्षितत्व[...]
[...]तु शास्त्रयोन्यधिकरणाक्षेपपरिहारस्वरूपमिति तदन्वयादित्यनेन प्रदर्शितं अयं भावः तत्तावदनुमानगम्यं ब्रह्म तेषां संभवात् यद्य
घटादिवत् सं सावयवत्वादिना जगतः कार्यत्वमनुमीयते कार्यं च तदभिज्ञकर्तृकमित्यनभिज्ञजीवव्यतिरिक्तः कृत्स्नजगन्निर्माणचतुर
श्वरोनुमातुं शक्यते न यापि लाघवात्कार्यत्वादिहेतुनानुमीयमानो यः कश्चित्कर्ता जीव एव स्यात्तस्य दृष्टत्वात् तेन जी[...]ष्वेको लाघवमीश्वर
ल्पने गौरवमिति नेश्वरसिद्धिः ननु जीवानामल्पज्ञत्वात्कथं महीमहीधराद्यर्थकर्तृकत्वमिति चेन्न तन्नहि लक्षण[...]विशेषापचितशक्तिविशे
षाणां विश्वामित्रादीनामेव तत्संभवात् अस्त्वेकस्मिन्नंडे विश्वामित्रोन्यत्र स नास्तीति चेन्न अन्यत्राप्यन्यस्य विद्यमानत्वाद्भवद्भिरनेता योगिनः कल्पि
ताः सर्वज्ञाः सर्वशक्तयश्चेति तैरेव तत्र तत्राविच्छस्तिद्धिः प्रवर्तनां किमनेन नित्यज्ञानचिकीर्षाप्रयत्नेन तथाविजातीयतया परिकल्पितेन त[...]चानवस्थास
क्षिद्दूषितानि कार्यत्वाद्यनुमानानि ईश्वरमनुमातुं न प्रभवंति तर्हि सर्वं कार्यमेककर्तृकं कार्यत्वादिति साधयाम इति चेन्न तर्हि[...]केउ घटपटादि
ष्वव्यभिचारः अन्यथासिद्धिर्वा न ह्येककर्तृकत्वाभावे कोपि विरोधः स्यात् अनेककर्तृकं न भवति कार्यत्वादिहेतुकेप्ययमेव दोषः तस्मादनुमानानामने
कदोषदुष्टत्वाद्वेदांतवाक्यानामशास्त्रलक्षणं तात्पर्यलिंगमस्त्वेवेति लक्षणमुपपन्नमिति नापि प्रवृत्तिनिवृत्त्यन्वयविरहिणो ब्रह्मणः पुरुषार्थरूपत्वोत
पुरुषार्थपर्यवसायिनां वेदांतानां च तात्पर्यमिति वाच्यं अन्यथा हेतूनां निरतिशयपुरुषार्थरूपे ब्रह्मणि तत्स्वरूपपरे पादितास्यार्थकतत[...]न भा॰ वा॰
तस्तद्व्यतिरिक्ते व्यर्थे पुरुषार्थाभासेषु एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादिभिः प्रतिषेधाच्च तच्छास्त्रप्रमाणमेवेति ब्रह्मणः पुरु
तु आनंदो ब्रह्मैकं ब्रह्मखं ब्रह्म रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवति यदेष आकाश आनंदो न स्यात् एष ह्येवानंदयातीत्यादिभिरवगतेः निरतिशय
मेव पुरुषार्थत्वात् अयोगव्यवच्छेदिकां सार्वज्ञ्यादिगुणवत्तामाह अभिज्ञ इति अभितः सर्वत्र सर्वं जानातीत्यभिज्ञः सर्वज्ञ इदं च सार्व[...]तेति मि[...]कारि
णत्वोपपत्ते तच्चोपादानकारणत्वोपयुक्तसर्वशक्तित्वसापेक्षलक्षणं सर्वज्ञत्वात्सर्वशक्तित्वात्तस्योभयविधकारणत्वमुपपन्नमिति भावः ननु सार्वज्ञ्या
दिकं च पुरुषार्थहेतुकं स्यादित्येवं रूपं कर्मेव श्रपत्वमधेय[...]तादृक्साध्यकर्तव्यं सर्वाडिति स्वगतः स्वतंत्रः अकर्मवश्यः कर्मवश्यानां प्रेरकः तस्माज्ज्ञेय एवेति भावः

3

कुलालस्य सर्वप्रकारोपेतत्वादिगुणवत्ता कार्येष्वनन्वयान्नोपादानत्वं अचेतनायाम्मृदस्तु व्यतिरेकाभावान्न निमित्तत्वं ब्रह्मणस्तु प्रत्यक्षादि
प्रमाणान्तरानवगतस्य केवलवेदान्तैकसमधिगम्यस्य चिदचिद्विलक्षणस्योभयविधकारणत्वोपयुक्तसार्वज्ञ्यसर्वशक्तियुक्तस्या
न्वयव्यतिरेकयोर्वेदान्तैरेवावगतत्वादुभयविधकारणत्वोपपत्तिरिति भावः वेदान्ताश्च सर्वं खल्विदं ब्रह्म ऐतदात्म्यमिदं सर्वं अयमात्मा ब्रह्म
तत्त्वमसीत्यादयोऽन्वयप्रतिपादकाः तदैक्षत यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो
यमयति यश्चात्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयतीत्याद्या व्यतिरेकप्रतिपादकाः एवंविधा
नामुभयविधकारणत्वनिर्वाहकान्वयव्यतिरेकप्रतिपादकानामुभयविधकारणत्वप्रतिपादकानां सदेव सोम्येदमग्र आसीदेकमेवाद्विती रा६
यं तदैक्षत बहु स्यां प्रजायेयेति सन्मूलाः सोम्येमाः सर्वाः प्रजा इत्यादीनां च वेदान्तानां च ब्रह्मण्येव प्रतिपादकत्वान्वयात् अथैवमितरेत
नन्वयात् प्रकृतिपुरुषादिषूभयविधकारणत्वप्रतिपादकत्वेनान्वयाभावाच्च ब्रह्मैवोभयविधकारणमित्यर्थः यथा ब्रह्मस्वरूपगुणादि
तथा टे कं शास्त्रैकसमधिगम्यं तदुभयविधकारणत्वं ब्रह्मण्येव शास्त्रेणावगतं न तु प्रकृत्यादिष्विति भावः अस्मिन्पक्षे ... यादित्यनेन समन्वया नन्वये
ध्यायप्रथमपादार्थ उक्तः इतरेतरेत्यनेन द्विपादार्थः ब्रह्मकारणमेव ब्रह्मैव कारणमित्ययोगव्यवच्छेदेन कारणत्वं हि समन्वयाध्याये स गात्वे
मर्थितं पूर्वव्याख्याने त्वनुवृत्त्यननुवृत्तिभ्यामुपादानत्वनिमित्तत्वनिर्वाहकाभ्यां तदुभयविधकारणत्वे साधिते अर्थादेव प्रकृत्यादी
नामकारणत्वे सिद्धे अयोगान्ययोगव्यवच्छेदावर्थादेव सिध्यतः यद्वा समन्वयादुभयविधकारणत्वस्य ब्रह्मण्येव संगतेरर्थेषु प्रकृत्यादि
षु इतरेतरासंगतेश्च ब्रह्मण एव कारणत्वमित्यर्थः एकमेवाद्वितीयमित्यनेन हि कृत्स्नस्य जगत एकमेवोभयविधकारणमवगतं तच्च प्र
कृत्यादिषूभयविधकारणत्वोपयुक्तसर्वज्ञत्वसर्वशक्तित्वाद्यभावस्य ब्रह्मणि तद्भावस्य च श्रुतेः य एव यः सर्वज्ञः सर्ववित् सत्यकामः
सत्यसंकल्पः परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ज्ञाज्ञौ द्वावजावीशानीशौ अजामेकां लोहितशुक्लकृष्णामित्यादि
भ्योऽवगमादुभयविधकारणं ब्रह्मैवेति भावः अस्मिन्पक्षे सार्वज्ञ्यसर्वशक्तित्वादिगुणप्रतिपादकत्वेन वेदान्तानां ब्रह्मण्येवान्वयात् अस्मिंस्तूभय
विधकारणत्वोपपत्तिः तदुपपत्तेश्च जन्मादिकारणत्वलक्षणत्वसिद्धिरवगन्तव्या अस्मिन्नपि पक्षे अयोगान्ययोगव्यवच्छेदौ द्रष्टव्यौ यद्वा ब्रह्म
लक्षणेन प्रतिपत्तव्यं अनुमानेनाप्यवगन्तुं शक्यत्वात् अशेषे हि शास्त्रसमर्थवत् शास्त्रैकप्रमाणकत्वेनेतरस्मिन्न वृत्तिनिरूपणार्थे ... पुरुषार्थे सर्वे...
ही त्यन
तेरागन्तु:

मा. प्र. यावस्तुनिर्दिष्टो वापि तन्मुखमित्यभिप्रेतो केचित्कीर्षितकृत्स्नप्रबंधार्थं वस्तुतः शारीरकाध्यायचतुष्टयात् ॥ कारणो वा
टी. ४ नं तत्र तावत् इत्यनेन समन्वयाध्यायार्थरूपं वस्तु निर्दिष्टं मद्युतीत्यादिना विनिमय इत्यनेन द्वितीयाध्यायार्थरूपं वस्तु निर्दिष्टम् ॥ स कारणाद्
ध्यायाद्याधिकरणानां तेजोवारिमृदां इति विनिमय इत्यनेन तदध्यायांत्यसंज्ञा इति सूत्राधिकरणस्य चात्र प्रत्यभिज्ञानं चिदंशः
यः कपिलहिरण्यगर्भकणभक्षाक्षपादपशुपत्यादयः सांख्ययोगादितंत्रप्रणेतारः प्रकृत्याद्युपादानत्वं निमित्तमात्रेश्वरवादिनो यं
ईश्वरस्य सूक्ष्मचिदचिद्विशिष्टस्य जगद्रूपेण परिणामं तु दृष्टमुक्त सर्वेश्वरत्वादिगुणयोगं चाजानंतः प्रधानस्योपादानत्वं वरं तत्स्थाने
कुलीभवंतीत्यर्थः यदिति पाठे यस्मिन्विषये मतेभ्रस्त गिरिजुह्वतीत्यर्थः तेने ब्रह्महृदय आदिकवय इत्यनेन तदपि द्वितीयाध्यायार्थं निर्दिष्टमिति
दायः तत्र तत्प्रयोजनवत्वाधिकरणार्थप्रत्यभिज्ञानात् यत्प्रतिपिपादयिषितार्थप्रमाणजिज्ञासा याविरोधानामेव तत्स्थापकत्वं तत्कृत्स्नस्य वेदस्यानी
मानः विच्छिन्नसंप्रदायासंभावादिदोषगंधतां पूर्वं तत्र निर्णीतां स्मारयितुं तेने ब्रह्महृदय आदिकवय इत्युक्तं एवं कारणत्वसंबंधस्य विच्छेदरूपायोगव्यवच्छेदकं कारि
तेषु प्रधानादिष्वकारणत्वसंबंधस्य व्यवच्छेदरूपान्ययोगव्यवच्छेदात् पपरिहारो सूचयन् ध्येयं परमात्मानं विशिनष्टि तेजोवारिमृदां यतो विनिमय
अत्रेदं समाशंक्यते तावत्पुरुषस्य कारणत्वं नोपपद्यते कारणत्वाद
नाम ७ त्यादि तावदहं ताह मिमांस्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति त्रिवृत्व
व्याकरणे समानकर्तृकत्वप्रतीतेस्त्रिवृत्करणं च हिरण्यगर्भस्य समष्टिजीवकर्तृकं चतुर्मुखस्रष्टृत्वं तनवत्यादिश्रुतिप्रदेशात् यदग्ने रोहितं
क ५ रूपमित्यादिभिः त्रिवृत्करणमग्न्यादित्यचंद्रविद्युत्सु एवं त्रिवृत्कर्तृकेन नामरूपव्याकरणमपि चतुर्मुखकर्तृकमेवेति तन्निमित्तमेवापनयति
जोवारिमृतां यतो विनिमय इति विनिमयः परस्परं मिश्रीकरणं तेजोवारिमृदां तेजोबन्नानां विनिमयो यतो ब्रह्मणः चतुर्मुखादेरित्यर्थः
द्यंडस्रष्टृत्वं नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना नाशक्नुवन्प्रजाः स्रष्टुं समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः महदाद्या
विशेषांता ह्यंडमुत्पादयंतीति इत्यादिभिर्वचनैस्तस्यावगमात् अंडसृष्ट्यै तां चतुर्मुखो नास्ति तदंडमभवद्धैमं तस्मिन्जज्ञे स्वयं ब्रह्मेति स्मरणात् एवं
चांडोसत्तेः प्राक् नत्रिवृत्करणं परमात्मकर्तृकमेवेति न कश्चिदेककर्तृकं नामरूपव्याकरणमपि परमात्मकर्तृकमेवेति तस्यैव जगत्कारणत्वेन तज्जीवगुधा

यद्यसार्वज्ञ्यादिकं सुकृतहेतुकं चेत् सुकृतस्य तन्मूलकसार्वज्ञ्याद्यपेक्षत्वे ततस्त्वसंभावनया कृत्स्नजगत्कारणत्वासिद्धिः ततश्च कारणत्वं तद्धे-
य इति कृतिविरुद्धमकारणवस्तुध्यानमनुचितमित्यत आह सर्वादिति येनैव राजते प्रकाशते सर्वं विषयीकरोति न तु कर्मणेति सर्वात् अने-
न सार्वज्ञ्यादिकं स्वरूपानुबंध्येव न तु कर्ममूलमित्युक्तं एवं सार्वज्ञ्यादिगुणवत्ताकथनेन ब्रह्मणोऽकारणत्वव्यवच्छेदरूपोऽयोगव्यवच्छेद उक्तः
स एव पुनराक्षिप्य परिह्रियते तेन इत्यादिना अत्रेयमाशंका यद्यपीश्वरः प्राकृतस्त्रैरेक एव सन् सकलेतरविलक्षणत्वेन सर्वार्थप्रा-
त्वयमेव विचित्रं जगत्स्रष्टुं शक्नोति तथापीश्वरकारणत्वं न संभवति अप्रयोजनवत्त्वात् विचित्रसृष्टेरीश्वरस्य च प्रयोजनाभावात् आर-
णमारंभे द्विविधं प्रयोजनं स्वार्थः परार्थो वा न हि परस्य ब्रह्मणः स्वभावत एवाप्तसमस्तकामस्य जगत्सर्गेण किंचित्प्रयोजनं अनवाप्तमवाप्य-
नापि परार्थः अवाप्तसमस्तकामस्य परार्थता हि परानुग्रहेण भवति न चेदृशगर्भजन्ममरणनरकादिनानाविधानेकदुःखबहुलं जगत्करुणावता
जंतिप्रस्तुतसुखैकतानमेव जनयेज्जगत्करुणया हि सृजन् अतः प्रयोजनाभावात् न ब्रह्मणः कारणत्वमुपपद्यते इत्याशंक्य कामपीठे वायन य
त्वाह तेने इत्यादिना हृदा संकल्पेनादिकवये ब्रह्मणे चतुर्मुखाय ब्रह्म धर्मादिपुरुषार्थं तत्साधनादि निरतिशयपुरुषार्थस्वरूपमुक्तमादि एवेदयमीशो
तथा तेने ते न विस्तृतवान् प्रकाशितवान् श्रुतादित्ययावत् यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति श्रुतेः अस्यार्थानुसंधेयः शास्त्रं ते नेहितार्थं
सू० एवं च तुल्यमायतयाजगत् स्थितिरपि हितार्थैवेति सूचितं तत्र कारुण्यात्तु तत्र अपवर्गोऽपि मुक्तानां प्रसूतिनिष्पादककारणकं स्वप्रदानात् जगत्स्थितिः तदपि परिपूर्ण
दितिवफलितं गर्भजन्मादिदुःखं तु भवतु स्वस्वकर्ममूल[illegible]क इति नेश्वरस्य दोषः इति भावः तेन इत्यादिना नामप्रपंचस्य स्थितिरुक्ता केचित् तद
नमस्कृत्यं तर्भावेनवयत्नमनपेक्षत्वात् नामरूपव्याकरणं हि सृष्टिः नामरूपे व्याकरवाणि तन्नामरूपाभ्यां व्याक्रियत इति श्रुतेः ब्रह्मशब्द
यपर्यायत्वाभावाच्च स हि वेदपर्यायशब्दः ब्रह्म च स एव मूलं कुलं ब्रह्म च ब्राह्मणाश्चेति प्रयोगात् एवं वरन्स्यान्नान्वयापत्तेश्च यत्शास्त्रप्रव
कीर्तितं हि तत्तद्दर्शयन्निविशिनष्टि मुमुक्षुरिति मुमुक्षुरित्यस्य अस्य ज्ञानवतः उपासकायं प्रतिमुमुक्षुः परिच्छेद्य देवत्वात्तदाकुलीभवतीत्यर्थः
धानं हि शास्त्रप्रवर्तनस्य परमं प्रयोजनं शास्त्रप्रवर्तनाभावे अपरिच्छेद्यस्वरूपत्वेन विभ्रमादौ साक्षात्तरानवगमान्निरतिशयपुरुषार्थस्य दुर्लभत्वा
स्वरूपे तद्विषयतमोमोहोऽमात्रदृष्टिः स्वेतदर्थं ब्रह्मतेनेत्यर्थः यदिति पादे यद्यस्मात् शास्त्रप्रवर्तनाभावे दुष्टं इति अतो मुख [illegible]

नू नू२

भा॰ प्र॰ शरीरतया तत्प्रकारं ब्रह्म तत् कदाचित् स्वस्माद्विभक्त व्यपदेशानर्हमिति सूक्ष्मदशापन्नचिदचिद्वस्तुशरीरं [illegible] कारणावस्थं
टी॰ ५ विभक्तनामरूपस्थूलचिदचिद्वस्तुशरीरं तच्च कार्यावस्थं तत्र कारणावस्थस्य कार्यावस्थापत्तौ [illegible] चिदंशस्य कारणादशाना
शब्दादिविहीनस्य [illegible] भोग्यत्वाय शब्दादिमत्तया स्वरूपान्यथाभावरूपो विकारो भवति चिदंशस्य [illegible]
नस्य च कर्मफलविशेषभोक्तृत्वाय तदनुरूपज्ञानसंकोचविकासात्मकस्वभावान्यथाभावरूपो विकारो भवति। [illegible] स्य सर्वपदे
[illegible] अथ प्रकारविशिष्टे नियन्तृशेतदवस्था [illegible] उभयविशिष्टता [illegible] पूर्वावस्थातः
कारणावस्थाया अवस्थान्तरापत्तिरूपो विकारः प्रकारद्वयप्रकारिणि च समानः अतएवैकस्यावस्थान्तरापत्तिरूपविकारस्य [illegible]
5 मिमेकस्मात्तेन सर्वविज्ञानप्रतिज्ञा यथा सोम्यैकेनेत्यादिना दर्शितः ईदृशज्ञानसंकोचविकासकरत्व [illegible] वस्थान्तर
प्राप्या जीवस्योत्पत्तिमरणं वा [illegible] प्रजापतिः प्रजा असृजतेत्याद्याः श्रुतयः अचिदंशस्य स्वरूपान्यथाभावाभिप्रायाः [illegible] आनन्त्या
त्वात्वादिल्प न जायते म्रियते इत्याद्याः नित्यो नित्यानामित्याद्याश्च श्रुतयः स्वरूपान्यथात्वज्ञानसंकोचविकासरूपो [illegible]
भावा। [illegible] अभिप्राया निष्कलं निष्क्रियं स वा एष महानज आत्माऽजरोऽमरो ब्रह्म नित्यो नित्यानामित्याद्याः [illegible] श्रुतयः अतः [illegible]
दचिद्वस्तुशरीरकं ब्रह्मैव कारणमिति ब्रह्मोपादानत्वेपि संघातस्योपादनत्वेन चिदचितोर्ब्रह्मणश्च स्वभावासंकरोऽप्युपपन्नतरः यथा शुक्ल [illegible]
रक्ततन्तुसंघातोपादानत्वेपि चित्रपटस्य तत्तत्तन्तुप्रदेश एव [illegible] संबन्ध इति कार्यावस्थायामपि न सर्वत्र वर्णसंकरः तथापि तत्स्वभ
दीश्वरसंघातोपादानत्वेपि जगतः [illegible] भोक्तृत्वभोग्यत्वनियन्तृत्वं कार्यावस्थायामपि न सर्वस्वभावसंकरः [illegible]
शेषः तन्तूनां पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदाचित्संहतानां कारणत्वं कार्यत्वं च इह तु चिदचितोः सर्वावस्थयोः परमपुरुष
शरीरत्वेन तत्प्रकारतयैव पदार्थत्वात् तत्प्रकारः परमपुरुषः सर्वदा सर्वशब्दवाच्य इति स्वभावभेदस्तदसंकरश्च [illegible]
तिकयोस्तुल्यः एवं च सति परस्य ब्रह्मणः कार्यानुप्रवेशेपि स्वरूपान्यथाभावाभावादविकृतत्वमुपपन्नतरं स्थूलावस्थस्य नामरू
रूपविभागविभक्तस्य चिदचिद्वस्तुन आत्मतयावस्थानात्कार्यत्वमुपपन्नतरं अवस्थान्तरापत्तिरेव हि कार्यतेति सर्वमनवद्यमिति तत्र

नयोरिति तदिदं यदग्रेऽग्रे इत्यादिविरुद्धकारणोपदेशश्रुतिविरोध इति चेन्मैवं तत्र ह्यंशान्तर्वर्तित्वम् आदित्रिवृत्कृतभूतकार्यत्वप्रदर्शनाया आदीनां
तत्र यात्मकत्वमात्ररूपरूपे तेय चेति पाठे यथायथं विनिमयः यत इति एवं सा हदुवंशः नन्वेवमपि न ब्रह्मोपादानकारणं तद्धि अपरायणं यानदत्तरमधिग
क्लि: ३ तेति ... यंति निष्कलं शान्तं निरवद्यं निरंजनं इत्यादिभिः निर्विकारमवगतं उपादानकारणत्वं च भावप्रव स्यादिशेषतः प्रागवस्थायोगित्वरूपं तच्च ब्रह्मणि
नोपपद्यते तथा सति ब्रह्मणो विकाराश्रयत्वापत्तेरुक्तश्रुतिविरोधप्रसंगादित्याशंकामभिप्रेत्याह यश्चात्र सर्गो भवेति त्रयाणां सत्व
त्मसां सांसर्गिकत्वात् इति सर्गः कर्मणि घञ् इति घञ् गुणत्रयरूपः प्रपंचो यस्मिन् यत्स्वरूपे भवति तदित्यर्थः तीति यावत् विसर्गस्य सत्
दि गुणगतत्वेन न तस्य ब्रह्मस्वरूपगतत्वमिति विकाराभावान्न निर्गुणश्रुतिविरोध इति भावः ननु विकाराश्रयत्वरूपं कारणत्वं निर्विकार
मयं परस्परं विरुद्धं कथमेकस्मिन् युज्यते इति चेत् शृणु तावदीश्वरप्रधानयोः स्वरूपभेदं सर्ववेदान्तसंप्रतिपन्नः तथा जीवेश्वरयोः शेष
मस्तात्तरं हरः क्षरात्मानावीशते देव एकः प्रधानक्षेत्रज्ञपतिर्गुणेशः स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधि
प इत्यात्मेश्वरं शाश्वतं शिवमच्युतं ज्ञाज्ञौ द्वावजावीशानीशौ नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् भो
रितारं च मत्वा तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति अजामेकां य
कृष्णामित्यादिभिः श्रुतिभिः स्वरूपस्वभावभेदः श्रावितः एवं स्वरूपतः स्वभावतश्चात्यन्तविलक्षणयोः कार्यकारणभयावस्थयो
ययोः परमात्मानं प्रति शरीरत्वं यः पृथिव्यां तिष्ठन् आत्मनि तिष्ठन् योऽव्यक्तमन्तरे संचरन् यस्याव्यक्तं शरीरं योऽक्षरमन्तरे संचरन् यस्याक्षरं
मित्यादिभिः श्रावितं एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एव कार्यावस्थाकारणावस्थाजगद्रूपे
इतीममर्थं ज्ञापयितुं काश्चन श्रुतयः कार्यावस्थकारणावस्थं च जगत् स एवेत्याहुः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत
जायेयेति तत्तेजोऽसृजत इत्यारभ्य सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्व
केतो इति तथा सोऽकामयत बहु स्यां प्रजायेयेति [illegible] स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत इत्यारभ्य सत्यं चानृतं च
मभवदित्याद्याः ननु एवं भोक्तृभोग्यनियन्तृत्वविभक्तस्वभावा श्रुतिपाद्यभोग्यगतमुत्पत्त्यादिकं भोक्तरि जीवे प्रतिषिध्यते तस्य नित्यत्वां
ग्य भूतप्रधानगतमुत्पत्त्यादिकं भोक्तृगतं चापुरुषार्थाश्रयत्वं नियन्तरि प्रतिषिध्यते तस्य नियन्तृत्वं निरवद्यत्वं सर्वज्ञत्वं सर्वशक्तित्वं सत्यसंक
धिपाधिपत्वं विश्वस्य पतित्वं च प्रतिपाद्य सर्वावस्थावस्थितयोश्चिदचितोः तं प्रति शरीरत्वं तस्य चात्मत्वं प्रतिपादितं सूक्ष्मदशा

त्पर

अत्र घटोनेति प्रतीतिसिद्धोऽभावविशेषः इदमिदानीं नेति प्रतीतिसिद्धः कालविशेषवृत्तिरभावविशेषः कालप।

नीयत्वोक्तेः

शिष्टस्य तत्राप्यावृत्तित्वेनाप्रसिद्धावपि केवलविशेष्यस्य विशेषणान्तरवित्त्वे सा जातस्य शंकायां तद्वारण।
भा. पृ. पलक्षणं वक्तृतत्त्वयतो वेत्यादिकं स्याद्वद्भ्रमणापादानत्वस्यापवर्गमात्र तस्य च मदादेर्विकारादेर्दोषस्य च वरितत्त्वदर्शनात्
टी. ६ एवं पित्तस्थदुक्तदोषशंकावारणाय निरुपाधिकधामनिरस्तकुहकत्वादिविशेषणत्रयमिति। यच्छब्द केति अत्र धामेत्यादि
षणत्रयेण सत्यं ज्ञानमनंतं इति श्रुत्युक्तं विशेषणत्रयं प्रत्यभिज्ञाप्यते धामपदेन ज्ञानपदस्य परपदेनाधिक्यवाचिनानंतपदस्य सत्यपदे
न तस्य च प्रत्यभिज्ञानात् तथा सत्यं नित्यनिरुपाधिकासंकुचितधर्मभूतज्ञानेनानवगतवस्तुरहितमित्यर्थः अनेन मुक्तजीवाद्यावृत्तिः
तेषां मुक्तिदशायां असंकुचितज्ञानेऽपि तस्य परमात्मप्रसादायत्तत्वेन सोपाधिकत्वात् बद्धदशायामभावेन नित्यत्वाभावाच्च
सत्यपदं निरुपाधिकसत्तायोगिकं परमपुरुषमाह तेन विकारास्पदमचेतनं तत्संसृष्टचेतनश्च व्यावृत्तः नामांतरभजनावस्थांतर
योगेन तयोर्निरुपाधिकसत्तायोगरहितत्वात् परशब्दोऽधिकवाची स्थानप्रमाणादपरिच्छिन्नाधिकपरः अनेन तदितरार्थः अनंतं च
त्र देशकालवस्तुपरिच्छेदरहितत्वरूपं तच्च सगुणत्वात् स्वरूपस्य स्वरूपेण गुणैश्चाभिप्रेतं अनेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणः
सातिशयस्वरूपस्वगुणा नित्यसिद्धा व्यावृत्ताः विशेषणानां व्यावर्तकत्वात् सत्यवाक्यस्य प्रत्यभिज्ञानादेव विशेष्यसमर्पकं ब्रह्म
पदमध्याह्रियते एवं च जगज्जन्मादि [illegible] नालक्षणेनावगतस्वरूपं ब्रह्मसकलेतरवस्तुविजातीयमिति [illegible] त्रदेश [illegible] परिच्छेदेना
मसर्ववस्तुसामानाधिकरण्याभावः स्यादित्यत आह वस्तुसामानाधिकरण्यं तत्त्वेऽपि तद्गुणानामसंभवा [illegible] दित्वात्तद्गुणानामपि तत्स्वभ
त ७ वति अत एव गुणपेक्षया द्वैत्व गुणानामभावादिति विवेकः सामानाधिकरण्यं च द्विविधं शब्दसामानाधिकरण्यमर्थसामानाधिकरण्यं
चेति तत्र शब्दसामानाधिकरण्यं तु भिन्नार्थानामेकस्मिन्नर्थे वृत्तिः यथा नीलत्वोत्पलं नीलं अत्र विशेष्यसमर्पणाय धाम्न इत्यादि ब्रह्मश वा
ब्दस्वभावतो निरस्तनिखिलदोषमनवधिकातिशयासंख्येयकल्याणगुणगणं पुरुषोत्तममाह तथा चाभाषि भगवद्भिः श्रीरामानुजमु म५
निभिः ब्रह्मशब्देन च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सो समस्त्योर्थ इति तत्र स्वरूपेण गुणैश्च निरतिशयबृहत्त्वं ब्रह्मशब्दप्रवृत्ति
निमित्तं स्वभावत इत्यादि विशेषणद्वयं तु ब्रह्मशब्दस्य रूढ्या तमपरत्वप्रतिपादनाय योगितयोक्तं न तु प्रवृत्तिनिमित्ततया बृहत्त्वस्य निरतिश
यत्वं नामानंत्यं न तु बृंहति बृंहयति तस्मादुच्यते परं ब्रह्म बृहत्त्वाद् बृंहणत्वाच्च तद् ब्रह्माभिधीयते इति श्रुतिस्मृतिभ्यां बृहत्त्वं बृंहणत्वं उभे च
प्रवृत्तिनिमित्ततयावगतेके घ मिह बृहत्त्वमात्रं प्रवृत्तिनिमित्तमुच्यते गुणतो बृहत्त्वे बृंहणत्वस्यापि अंतर्गतत्वादिति भावः सचानंत्यायक

यथा नीलमुत्पलमित्यादि ग्रंथ साम भावात् [illegible] सर्ववस्तुसामानाधिकरण्य ८
नाधिकरण्यं

प्रादीनं

दुपादानत्वं ब्रह्मणश्चिच्चिद्विशिष्टब्रह्मनिष्ठत्वेनेत्यादिना हृदयेनैतेन निमित्तकारणत्वं विशेष्यभूतशुद्धस्वरूपनिष्ठमिति चित्सूचितं शास्त्रप्रवर्तनात्स्मधिग
रत्कारणा नामरूपव्याकरणत्रिसर्गस्य वृत्तादेर्विशेष्यनिष्ठत्वप्रतीतेः एवमेकस्यैव ब्रह्मणो विशिष्टाकारेण जगदुपादानत्वं शुद्धस्वरूपेण नि
मित्तकारणत्वं चेत्युभयविधकारणत्वं समर्थितं एवं च जन्मादिकारणत्वविशिष्टब्रह्मणो विशेषणभूतेन लक्षणं विशुद्धस्वरूपस्वरूपल
क्षणतया लक्षणमित्यवगन्तव्यं तस्य शुद्धस्वरूपनिष्ठत्वाभावस्य यत्र विस [illegible] गोमूत्रेतानेनावगतत्वात् न च तदनिष्ठस्य कथं लक्षणत्वं
तदसाधारणधर्मस्यैव लक्षणत्वादिति वाच्यं इतरव्यावृत्तवस्तुप्रत्यापकत्वस्यैवात्रोपलक्षणत्वेन विवक्षितत्वात् जगत्कारणत्वस्य शु
द्धस्वरूपे निष्ठापितदुपलक्षणतया सकलेतरव्यावृत्तत्वेन ब्रह्मप्रत्यापकत्वसंभवात् न च तस्य शुद्धस्वरूपोपलक्ष[illegible]कत्वमपि न संभ
वति तस्य तदवृत्तित्वादिति वाच्यं तटस्थस्यापि शाखाग्रस्य चन्द्रोपलक्षकत्वदर्शनात् विशेष्यनिष्ठत्वे निष्ठत्वाभावाद्विशेषणस्योप
लक्षणत्वधर्मभेदः ततश्च कारणत्वस्य ब्रह्मनिष्ठत्वाद्याविशेषणत्वं प्रपंचगतजन्मादेस्तु ब्रह्मस्वरूपानिष्ठत्वेनोपलक्षणत्वमिति विभा
वनीयं तत्र त्रिसर्गेऽस्मिन्नेष्वन्यत्वेनोपादानत्वप्रयुक्ताविकारदोषा निवारिताः अथ चेतनगतं ज्ञानादिकमन्यच्च सर्वे [illegible] नाद्येनेति वदन् विदन्वि
घावर्तं ब्रह्मस्वरूपं शोधयन् विशिनष्टि धाम्नेति ननु जगज्जन्मादिकारणत्वलक्षणेनैव सकलेतरव्यावृत्तिसिद्धेः किमनेन यत्ने ति:
नेति चेज्जगज्जन्मादिकारणेतरकारणव्यावृत्तिसिद्धावपि जीवजडजातीयत्वशंका स्यादेव कदाचीवादिमत्त्वरूप[illegible]स्य [illegible] विशेषत्वाद
नापटादिव्यावृत्तघटादेर्गंधवत्त्वादिना मृज्जातीयत्वदर्शनात् अवादेस्तदभावेन तच्छंकानिवृत्तिदर्शनात् अतस्तां [illegible] धामेत्या
दिविशेषणानि ननु संस्थानविशेषो हि घटं पटादिभ्य एव व्यावर्तयति न तु पृथिवीमात्रात् पटस्यापि पृथिवीजात् एवं च संस्थाना
के पृथ्यः पटादिभ्यो व्यावर्तयति न द्विजातीयत्वमपि तेनैव सिद्धं अवादेरपि पृथिवीमात्रव्यावर्तकाद्वादियोगादेव हि पृथिवीवैजात्यं य
स्मात्पृथिवीजातीयात्संस्थानादिना वैजात्यं न सिध्यति तस्माद्व्यावर्तकत्वमपि संस्थानादेर्नास्ति एतेन कारणत्वं जीवादिभ्यो ब्रह्म याव
र्तयतीति कथं ते न कारणेभ्यो जीवादिभ्यो वैजात्यं तदन्तर्भावायोग्यत्वरूपं न सिध्येत् तदनिष्टजाति योग्यत्वेन धर्मा[illegible] निरस्तकुहकत्वादि
नालक्षणं तेषां विनसिध्यति कारणत्ववन्निरुपाधिकधाम निरस्तकुहकत्वादेरप्यजातिरूपत्वात् तस्माद्धामनिरस्तकुहक[illegible]ता
कारणत्वमपि स्वेतरसर्वव्यावर्तकमिति चेदुच्यते वैजात्यं हि तद्वृत्तिधर्मयोगराहित्यं तच्च व्यावृत्तिबोधककार[illegible] लक्षणसि[illegible]
धर्मिभेदग्राहकसामग्रीवत् तद्धर्माभावग्राहिका किं तु सत्त्वं चिदचिद्विशिष्टस्वब्रह्मणोलक्षणं [illegible] ज्ञन [illegible] वृत्तमि

भा॰प्र॰ तिश्रेयःसाधनत्वं धर्मशब्दप्रवृत्तिनि... न ... गीयश्रोक्रैव

टी॰ ७ मैंद्रियकत्वेपिनतद्दूषणंधर्मतेति तत्रासिद्धधर्म... वस्तुरित्या ... श

यःसाधनत्वावगमात् साध्यधर्मस्तु परमात्माराधनातिरि...पःपात्र... तुत्रसत्ताभि...धंतेऽ...देवैः श्रुतनानकान्यैर्द्रस्तत्र...

योन्मूलनमित्यंतेनसिद्धधर्मः ईश्वरइत्यादिनाप्रयोजनमुक्तं का... तत्रापिद्विविधं ...हितमव्यवहितंचेति ...

राववस्थापनमव्यवहितंफलंतापत्रयनिवृत्तिस्तुभगवदनुभवपरंपराव्यवहितंफलं संबंधोऽपिद्विविधः साध्य...मान्तेइ... प्रा...

ध्यप्रतिपादकभावरूपश्चेति तत्रप्रयोजनोक्त्यासाध्यसाधनभावरूपः विषयोक्त्याप्रतिपादकभावरूपश्च ...ईश्वरा... ...खंसिसा

...अस्माभिःकार्यो... ...यद्युपक्रम...

धर्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्रवस्तु शिव... तापत्रयोन्मूलनं

धर्मेऽपि प्रतिपित्सुरूपोमुमुक्षुरधिकारीयतोविवक्षितोवेदितव्यः तत्रसाध्यधर्ममाह धर्म... अत्रास्मिन्पुराणेप्रोज्झितकैतवः परमो

निर्मत्सराणांसतांधर्मःसाध्यतयाच्युतेरत्यर्थः कैतवं वंचनं प्रोज्झितं निःतरां त्यक्तं कैतवं यस्मिन् अनेन विपुलिप्सा... आगमात् ...

द्व्यावृत्तिः निर्मत्सराणांसतामितिसंबंधसामान्येषष्ठी निर्मत्सराणांसतांसंबंधीधर्मोत्रसाध्यतयोच्यतइत्यर्थः संबंधश्चानुष्ठेयानुष्ठातृभावरूपः

निर्मत्सराणांसतांधर्मइत्यनेनवेदोक्ताभिचारादिव्यावृत्तिः अभिचारादयोहिमत्सरादिमतामनुष्ठेयाः परमः सर्वोत्कृष्टः अनेनक्षुद्रफल

प्रदकाम्यकर्मव्यावृत्तिः यद्वामत्सरशब्दःकामादीनांप्रदर्शनार्थः शमदमाद्युपेतानांमुमुक्षूणांधर्मः अनेनस्वर्गाद्यर्थकर्मवृत्तिः ...

परमः सर्वेषांएवधर्माणामुत्तमोवेद्यावोविधिरित्युक्तप्रकारेणभगवत्संतोषैकफलत्वात्परमः एवंसाध्यधर्मरूपोविषयउक्तः ...बोधितस्य

वंविधधर्मैकप्रयोजनसाध्यधर्मस्याराध्यमेतत्पुराणवेद्यंपरब्रह्मात्मकंसिद्धधर्मरूपंविषयमाहवेद्यमिति ॥ ॥ ॥

इति श्रुतिप्रसिद्धं सकलसंकोचनिवृत्तिपूर्वकनिरवधिकज्ञानविकासरूपानंत्यावहत्वं हि बृंहणत्वं तद्धि सकलहेयप्रत्यनिक...
ण्यादिमोक्षप्रदत्वोपयिकगुणवत्त्वं ब्रह्मशब्दस्य योगरूढिभ्यां च श्रीनिवासमभिधत्ते तथा च स्मर्यते श्रीमतिगारुडपुराणे वेदेष्वपि रूपेण
गुणयोगाच्च शार्ङ्गिणि तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने इत्यन्यत्र प्रयुज्यमाने तु गुणयोगस्तूक्तलः तत्रैव मुख्यवृत्तोयमन्य
त्रोपचारत इति अनेन जगत्कारणभूतवस्तुविशेषजिज्ञासायां देवताविशेषावगमस्य सिद्धः उक्तप्रकारेण सर्वविलक्षणः श्रियः पतिर्धीमहि
उपासीमहीत्यर्थः धियं कुर्यास्मेति विग्रहे धीशब्दात्तत्करोतीति णौ चोपवृद्धौ वा लक्षुप्ते काजिति प्रकृतिभावादिलोपाभावे तस्मादाशिषि
लिङि णिच्श्चेत्यात्मनेपदे आगमशास्त्रस्यानित्यत्वादार्षत्वाद्वा सीयुटी टेरभावे रोरनिति निमित्तो पंच धीमहिरूपं वक्तोपासनध्यानानु
स्मृतिचिंतास्पष्टत्वादिरूपस्य धीशब्दस्य ध्यानमर्थः लिङस्त्वलंभावे लिङ्गारूपाशीः अनेनाशीनेर्मक्रियावस्तुनिर्देशो वेदमभि
युक्ताशीश्च कृता भवति अशेषविशेषविशिष्टस्य ब्रह्मणो ध्यातुः स्वस्मादुत्कृष्टत्वावगमात्स्वस्य ...पकृष्टत्वावगमाद्भक्तिभावावगमान्
वे ८ मक्तियापि कृता भवति एवं चैकप्रतिपाद्यार्थरूपवस्तुसंग्रहस्तु जन्माद्यस्येत्यादिना विनेमय इत्यंतेन कृतः पुरस्तादेव दर्शितः यत्र त्रिसर्गो
मृषेत्यनेन प्रकृतिपुरुषगतदोषप्रसंगपरिहारपरेण जीवदोषकीर्तनपरतातीयप्रथमपादार्थः तेनेदं स्वयमित्यादिविशेषणेन चतु
र्थलिंगपादार्थश्च निर्दिष्टः धाम्ना निरस्तकुहकमेने कुगुणविशिष्टब्रह्मणो ध्येयत्वात्कारणोपसंहाररूपाद्यर्थश्च सूचितः धीमहीत्यु
क्तेरुपासनस्यानेकसाधनत्वेपत्तत्प्रसिद्ध्या अंगपादार्थश्च सूचितः अभ्याहतश्रेष्ठ्यप्राप्त्यप्रवृत्तिनिमित्तमपरत्वं परं हरणे तेन
य५ भिप्रेतेन तु ...फला ...ध्यायार्थश्च सूचितः एवमभियुक्ताभिमते त्रिविधं मंगलं मनसापि कर्तुं शक्यमपि ...पादे प्राप्तेपि
कृतमित्यवगंतव्यं यत्र त्रिसर्गो मृषा धाम्ना स्वेन सदा निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वकीर्तनात्सगुणनिर्गुण
श्रुत्योर्विषयभेदश्च दर्शितः १ ॥ १ ॥ अथ विषयप्रयोजनसंबंधाधिकारिरूपमनुबंधचतुष्टयमाह द्वितीयश्लोकेन धर्मः प्रो
ज्झितकैतव इत्यादिना विषयो नाम प्रधानप्रतिपाद्यवस्तुरूपः स चात्र धर्मः सोपि साध्यः सिद्धश्चेति द्विविधः सिद्धरूपे वस्तुनि धर्मप्राद्यप्रं
महाभारते ह्युक्तं यथा ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ते वदंति महात्मानं कृष्णं धर्मं सनातनं इति तथा भिगुक्तैः
केतर

भा॰प्र॰ एवं विषयप्रयोजनकथनेपि प्रामाण्यनिश्चयं विना श्रवणेनोपपद्यत इत्याशंक्य वेदांतमूलत्वं वदन् चेतनानभिमुखयति … नीयुक्तो केन
टी॰८ निगमकल्पतरोरित्यादिना हे रसिकाः रसज्ञाः भावुकाः भगवत्संशीलनपराः निगमो वेदः स एव कल्पतरुः … फले … वेदैश्चैक
तेपुराणं आलयमामरणं एनः पिबत निगमस्य कल्पतरुत्वनिरूपणं धर्मार्थकाममोक्षपुरुषार्थचतुष्टयतत्साधनावबोधनद्वारा धर्मादिफल…
त॰५ नकत्वात् भागवतस्य तत्फलत्वनिरूपणं निगमसारांशरूपत्वात् स्वादुतेत्यनुक्तापि वदतेति वदन् … सूचयति आ… मादि फले … हेयानुपादेयांश
… त्वग्बीजादिरूपः कल्पतरुफलम् … स्ति किंतु केवलं ये यः … रसात्मक एव सन् पिबात् … बीजादिरनुपादेय एव
मस्मिन्नपि पुराणे नानुपादेयांशो विद्यते ऽपितु सर्वोप्युपादेय एवेति निगमद्रुमफलत्वं चास्य पुराणान्तर प्रधानं प्रति … ब्रह्मानंदसा
धनभूतभक्तिद्वारावगंतव्यं एवममृतद्रवसंयुतमित्यादीन्यपि विशेषणानि निगमद्रुमफलत्वस्वर्गादितत्साधनावबोधिवेदपूर्वभागापेक्षया
त्मककल्पसत्रादुत्पत्तीति तत्र … दासायाह अमृतद्रवसंयुतमिति अमृतं मोक्षमुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतमिति मुक्त्यादिषु

8

… निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ३

रूपर्यायत्वस्मरणात् स एव द्रवः सारांशस्तेन संयुतं रसं रसवत् गुणवत्त्वेनाम्योमतुपो लुगिष्ट इति लुक् भगवदनुभवानंदवदनेन भक्तिरूपत्वं सि
द्धं भक्तिर्नामस्नेह एवं मनुध्यानं भक्तिरित्यभिधीयत इति स्मरणात् प्रीतिमद्भगवत्स्मरणं फलमत्र समग्रज्ञानात्मकं विवक्षितं शुकमुखा
द्गलितमत्युच्चस्य फलं शुकाख्यपक्षिमुखपातितं … हं स्यान्न … शास्त्रश्रवणात् … गतं ज्ञानफलं शुकमुखसंबंधात्तु लभ्यमिमर्थः … परं
सद्यजाः सखायासमानं वृक्षं परिषस्वजाते इति श्रुत्यनुसारेण वा … शुकाख्यपक्षित्वरूपणं आलयादिति पाठे आमरणादित्यर्थः निगमद्रुम
निःफलत्वनिरूपणेन वेदमूलत्वं शुकमुखाद्गलितमित्यनेन केवलनिवृत्तधर्मपरायणत्वादितत्वप्रतीत्याशिष्टपरिगृहीतत्वमत एव प्रामाण्यं मुमुक्षु
भिरत्नीवोपादेयत्वं च स्वादिफलितं … पद्यप्येतत्प्रबंधनिर्माणं पंचमदशायामस्य शुकमुखात्स्वादितत्वेन विद्यतेनपापि भविष्यदभिप्रायेण त्रैका
लज्ञस्य निर्मातुरेवमुक्तिः ३ तदेवमनुष्ठितविविधमंगलः प्रदर्शितानुबंधचतुष्टयप्रामाण्यो भगवान् वादरायणस्त्रैकालज्ञोऽस्यापि कीर्तितस्य

सतामित्येतत्काकाक्षिन्यायादत्रापि संबध्यते अत्रास्मिन्महामुनिकृते श्रीमद्भागवताख्ये पुराणे अन्वर्थमिदं नाम भगवतः स्वरूपरूपगुणविभू
ति प्रतिपादकत्वेन भगवत इदं भागवतमिति व्युत्पत्तेः सतां वेद्यं वस्तु वास्तवं शिवं तापत्रयोन्मूलनं वास्तवत्वादिगुणविशिष्टमित्यन्वयः
महामुनिना श्रीवादरायणेन कृते मुनेर्महत्वमत्रासंभाव्यमानपौरुषेयदोषग्रंथे पौरुषेयप्रयुक्तत्वशंका तेन वाक्येन महोवाच्या [illegible] सः पाराश
र्य इत्यनेनाप्तमतयाप्याविततत्वरूपं विवक्षितं अनेनास्य पुराणस्य वक्तृवैलक्षण्यवत्त्वमिदं अतएव प्रमाणतमत्वं च इतरदेवतानामस
द्गुणारोपणस्तोत्रवत्त्वात्तद्व्यावृत्त्यर्थं वास्तवमित्युक्तं वस्तुनो भावो वास्तवं युवादित्वाण् प्रत्ययात् युवादिभ्योऽणित्यण् ततो मत्वर्थीयोऽच् स्वा
भाविकधर्मयुक्तमित्यर्थः शिवदं मंगलदं मोक्षानंदप्रदं अनेनेष्टप्रापकत्वमुक्तं तापत्रयोन्मूलनं आध्यात्मिकादितापत्रयो[illegible]तिक
रं अनेनानिष्टनिवर्तकत्वमुक्तं यद्वा वास्तवशब्देन शास्त्रांतराभ्युपेताब्रह्मात्मकस्वतंत्रप्रधानादेर्वैलक्षण्यमभिप्रेतं अ[illegible]त्मक

श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो
हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्

प्रधानादीनामप्रामाणिकत्वात् इतरविशेषणद्वयेन क्षुद्रोपद्रवशांतोपप्लुतपरिमितसुखप्रदेवतांतरव्यावृत्तिः एवंभोक्तसाधनधर्मस्त
स्प २ त्समाराध्यपरदेवता चास्य प्रबंधस्य विषय इत्युक्तं यत एवं दशविशिष्टविषयकस्तत एव नणस्त्रांतरैः प्रयोजनमस्तीत्याह किंवापरै
रिति अपरैः शास्त्रजालैः किंवा न किंचिदपि प्रयोजनमस्तीत्यर्थः अथ प्रयोजनमाह ईश्वर इत्यादिना शुश्रूषुभिः श्रवणेच्छावद्भिः
अत एव तद्गुणकृतिभिर्दूत्यैः स ग्रंथः एतत्पुराणश्रवणानंतरमेव हृदीश्वरो वरुध्यते क्षतिपथेन हृदयं प्राप्यतीत्यर्थः यत्नेन चित्ते
विनिवेशयतीत्यायेन दुर्ग्रहस्येश्वरस्यापायत्वेन हृद्यवस्थानमव्यवहितफलं तापत्रयनिवृत्तिश्च भगवद्भक्तुभवपरंपरया फलमित्युक्तं भवति
प्रयोजनेन साध्यसाधनभावरूपः विषयेण प्रतिपाद्यप्रतिपादकभावरूपश्च संबंधोऽधिकारी चार्थसिद्धः [illegible] २ [illegible] स्या
[illegible] २॥

प्र॰ त इति ते शौनकादयो मुनयः कदाचित्प्रातर्हुतहुताग्नयः हुतेत्यर्हार्थे क्तः हुतेन होमार्हद्रव्येण पयःसर्पिरादिना साधनेन हुताग्नयः आहवनी
८ याद्या यैस्तथाभूताः सत्कृतं यथोचितं बहुमतमासीनमुपविष्टं च सूतमिदं वक्ष्यमाणमादराद्दादरपूर्वकं पप्रच्छुः ५ प्रश्नमेवाह त्वयेत्यादि
ना यावदध्यायसमाप्तिः तावद्बुध्यत्यज्ञानाद्वक्तुं नाहं समर्थ इत्याशंकां निराकुर्वन्त आहुः त्वयेति हे अनघ शास्त्रार्थाज्ञाननिमित्तकर्मरूप
पापरहितेति वा त्वयेतिहाससहितानि सर्वपुराणानि उ तत्र अपि च यानि धर्मशास्त्राणि मानवादीनि तानि सर्वाण्यधीतान्याख्यातानि च ६
कानि तानि पुराणधर्मशास्त्राणीत्यत आहुः यानीति वेदविदां स्वरूपतोऽनुष्ठानपर्यन्तार्थतश्च वेदविदस्तेषां मध्ये श्रेष्ठो भगवान्
बादरायणः तथाविधा अन्ये च मुनयः पराशरादयो मन्वादयश्च परावरविदः परं परमात्मतत्त्वम् अवरं प्रकृतिपुरुषतत्त्वं तद्विदः तत्त्वत्रयपारगा

१ ते एकदा तु मुनयः प्रातर्हुतहुताग्नयः सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ५ ऋषय ऊचुः त्वया सूत पुराणानि
सेतिहासानि चानघ आख्यातान्यप्यधीतानि धर्मशास्त्राणि यानि च ६ यानि वेदविदां श्रेष्ठो भगवान्बादरायणः अ
न्ये च मुनयः सूत परावरविदो विदुः ७ वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात् ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्य

तं३
विदः यानि पुराणानि धर्मशास्त्राणि च विदुस्तान्यधीतान्याख्यातानि चेति सर्वेणान्वयः वेदविच्छ्रेष्ठो बादरायणोऽन्ये च मुनयो यानि विदुः अनेन
न स्मृतीतिहासपुराणानां वेदमूलत्वं अत एव प्रामाण्यं च दर्शितं ७ ननु अपशूद्राधिकरणन्यायेन अनधिकृतः शारीरकोऽहम् इतिहासपुराणा
हं२ ध्ययनं जानामि तत्स्मृतीतिमान् कथं भवत्प्रश्नस्योत्तरं वक्तुं प्रभुरिति मां शंकां वारयन्त आहुः वेत्थेति हे सौम्य सद्वृत्त तात्त्वतो यस्मात्तदनुग्रहा
तोस्तत्सर्वमितिहासपुराणादि प्रधानं शक्तिपाण्डित्यकृतत्वतः त्वं वेत्थ जानासि अनधिकृतः शारीरकोऽपि त्वं सदनुग्रहात् तद्वेदव्यासानुग्रहान
देत्सि न त्वा पातकं इति भावः सदनुग्रहादपि कथं शारीरकाध्ययनं निर्णीतवांस्तत्त्वं महे विद्यामित्याहुः ब्रूयुरिति स्निग्धमेवा
नुरक्तस्यात्वादृशस्य शिष्यस्य गुरवो गुह्यमपि ब्रूयुः शारीरकमखेनानुकाकेवलमपदिशेयुरिति भावः ८ विः

[illegible] वेदांतार्थोपबृंहणरूपस्य पुराणस्य परीक्षिच्छौनकशुकसूतादिप्रश्नप्रतिवक्तृप्रश्नोत्तरमुखेन भाविनीं प्रवृत्तिमालोच्य च
तेषां प्रश्नोत्तररूपान् श्लोकान्स्वयमेव तत्र तत्र निर्मिमाणस्तावत्तदुपोद्घातरूपेस्मिन्प्रथमस्कंधे प्रथमतः परीक्षितः प्रतिवक्तुः शुकस्य च
[illegible] त्र समागमे शुकस्य समागमं परीक्षितः प्रश्नाद्योगहेतुं प्रायोपवेशं तन्निमित्तविप्रशापं च विवक्षुः प्रायोपवेशनाकं जन्मावधिकं चारित्र
त्रितं वृत्तांतं ततः प्राक्तनं तत्पित्रादिवृत्तांतं तत्प्रबंधकर्तुः स्वस्यैव तन्निर्माणनिमित्तदर्शनसमागतदेवर्षिसंवादं नारदोपदेशं च तत्प्र
बंधनिर्माणं च शौनकसूतप्रश्नोत्तरमुखेन विवक्षुस्तावच्छौनकादीनां प्रश्नप्रकारं वक्तुं तदुपोद्घातमाह नैमिष इति अत्र केचिच्छौनकादिप्र
श्नरूपाः श्लोकास्तदर्वाचीनैर्निर्मिता इत्य[illegible] निबध्नाः परीक्षिदादिप्रश्नादिरूपाः स्फुस्तेनेति वदंति तदसारं त्रैकालज्ञ[illegible]स्य प्रबंधप्रवक्तुः एतन्नि
र्माणोपपत्तेः नहि सानंदवल्ली प्रतर्दनविद्यादिषु श्वेतकेतुर्हारुणेय पप्रच्छ हतह पितोवाच भृगुर्वै वारुणिर्वरुणं पितरमुपससार अधी
हि भगवो ब्रह्मेति प्रतर्दनो ह वै दैवोदासिरिंद्रस्य प्रियं धामोपजगामेत्यादीनां प्रश्नोत्तररूपाणां श्रौतवचसामाधुनिकत्वं वक्तुं युक्तं तद्वदेक

नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः सत्रं स्वर्गाय लोकाय सहस्रसममासत ४

तस्माद्वेद एव प्रश्नोत्तररूपेण प्रतिपादयिषितानर्थान्प्रतिपादयति अत्र तु पौरुषेयेन्यकर्तृकाणामपि वचसां संदर्भस्तत्र तदोषावह इति चेन्न एव
पि१ मपि कृत्स्नप्रबंधस्यैककर्तृकत्वासिद्धेः कृत्स्नस्य पुराणप्रपंचस्य प्रश्नोत्तररूपत्वेन कानिचिद्ग्रंथकर्तुर्वचांसि कानिचेतरेषामिति विभागस्याशक्य
त्वाच्च तस्माद्यथोक्तमेव युक्तं शौनकप्रमुखा ऋषयो मुनयः ब्रह्मणा विसृष्टस्य चक्रस्य नेमिः शीर्यते कुंठीभवति यत्रेति तन्निमिषं तदेव नैमिषं त
यत्र४ च्च वायुपुराणे प्रसिद्धं नैमिषा इति पाठे निमिषांतं देवनैमिषं इत्यन्वर्थं नाम नैमिषारण्यं निमिषक्षेत्रे भगवत्सान्निध्यवतीति भावः स्वर्गाय लो
काय स्वर्गो निरतिशयानंदः तादृशो लोकः परमपदं तस्मै तत्प्राप्त्यर्थं तत्साधनं सत्रं सहस्रसमं सहस्रसंवत्सरं मासत अनुष्ठितवंतः स्व लोको
न परमपदमेव अनंते स्वर्गे लोके ज्येये प्रतितिष्ठतीति ये स्वर्गे लोके अमृतत्वं भजंते इति श्रुतिप्रसिद्धेः नास्य निर्देशात् अन्यथा शौनकादय इत्यनघट
ते दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवायेति वदतः परमभागवतस्य शौनकस्य प्रसिद्धस्वर्गार्थित्वायोगात् ऋत्विज एवं यत्र दक्षभाना
स्तत्सत्रं यदासत्त्रशब्देन भगवद्गुणानुभवात्मकं ब्रह्मसत्रं विवक्षितं तदृशमेकत्र गीतायां तत्तत्साधनस्येति तुल्यकृतनयः शीलाः स्वसतीयाश्च धनाः
अपि चक्रुः प्रवचनमेकं शुश्रूषवोपरे इति अतएवासीनादीर्घसत्रेणेति वक्ष्यमाणोपपत्तिः ४ ॥ ॥ ॥ ॥

·पु·
·२०

पद्यत एवेति भावः भूरीणि भूरि कर्माणि श्रोतव्यानि विभागशः संतीति तत्र सारं ब्रूहीत्यनेन भूरिकर्माणि न श्रोतव्यानि प्रतीयंते यद्यपि कर्मा
ण्यपि फलद्वारा हानाय स्वरूपेण प्रादानाय च श्रोतव्यान्येव अन्यथा सांसारिके फलनिर्वेदासंभवेन निःश्रेयःसाधनावबोधस्य धात्मश्रा
द्धशुश्रूषाया एवासंभवात् परमात्मोपासनस्यानभिसंहितफलकर्मोपकार्यत्वज्ञानाभावप्रसंगाच्च तथाप्येकमेवोत्पासर्वं कर्मा(
णि फलतत्त्वान्युपासनांगतया यथाशक्त्यनुष्ठेयान्येतावदेव श्रोतव्यं मुमुक्षुभिरित्यभिप्रायेणोक्तं ११ एवं मुक्तिसाधनं पृष्ट्वा इ
न तदनुग्राहकेषु प्रधानतमं श्रवणकीर्तनविषयेः स्मरणमित्यादिषु प्रथमोपात्तं भगवच्चरित्रश्रवणं चिकीर्षतस्तत्रापि साधुपरित्राणाय वती
र्णस्य मनंतरं श्रीकृष्णावतारचरित्रं पृच्छंति सूतेत्यादिषड्भिः हे सूत तत्त्वं भद्रं कल्याणमस्तु सात्वतां भक्तानां पतिः पाव यतो भगवान् वसुदे

सूत जानासि भद्रं ते भगवान्सात्वतां पतिः देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया १२ तन्नः
शुश्रूषमाणानामर्हस्यंगानुवर्णितुं यस्यावतारो भूतानां क्षेमाय च भवाय च १३

वस्य संबंधविवक्षया षष्ठी वसुदेवात्तद्भार्यायां देवक्यां यस्य चिकीर्षया यत्कर्म कर्तुमिच्छया जातोऽवतीर्णः तत्सर्वं त्वं जानासीति त
दनुकुमर्हसीत्याह तदिति तच्छ्रीकृष्णचरितं श्रोतुमिच्छतां नोऽस्माकं वर्णितुमंग हे सूत अर्हसि अर्हसीत्यनेन कोऽत्र चार
त्र वेदी त्वं कृष्णभृरिति सूचितं महोपकर्तृत्वात्तदवतारचरित्रमवश्यं शुश्रूषितव्यमित्यभिप्रायेण तदवतारं ता यस्येति यस्य भग
वतोऽवतारः श्रीकृष्णरूपः भूतानां विभवाय योगपरं पर्यायः क्षेमाय तत्पालनाय च भक्तानामित्यनुक्त्वा भूतानामिति वदतां नय न
भिप्रायः शत्रूणामपि दुष्टानां एवं कमपवर्गदायितेन महोपकर्तेति किमु वक्तव्यं तदवतारो भूतानां योगक्षेमायेति १३ यतस्तन्नामैव निष्ट
प्रापणक्षममेवेत्यभिप्रायेण नामप्रभावमाहुः आपन्न इति घोरां गर्भजन्मजरामरणादिरूपां संसृतिमापन्नः प्राप्तः पुमान् शत्रुरपि विवशोपा
निवृत्यभीयर

ति १

एवं नस्मप्रति वचनसामर्थ्यमाविष्कृत्य प्रष्टव्यं पृच्छन्ति तत्रेति हे आयुष्मन् सामेकांततो नियमेन निरतिशयं श्रेयः इवा यतः साधनात् श्रेयो भवे
त्तद्भवता तत्र तत्र पुराणादिषु निश्चितं तन्निर्णीतं नोऽस्माकं शंसितुं प्रस्तोतुमर्हसि एवं मुक्तिसाधनमस्तोऽधर्मः ०१ किं निरतिशयं श्रेयः को
सौ तत्साधनमस्तो धर्म इति प्रश्नार्थः ८ अपवर्गसाधनानामज्ञातत्वात्तत्स्वरूपं न तत्त्वनिश्चितं दौर्भाग्यैः ते ये तत्र्यातां बहुत्वं च वदन्तः
सर्वेषां तत्वार्थसारभूतं मुक्तिसाधनमेव पृच्छन्ति प्रायेणेति सार्द्धाभ्यां हे सभ्य अस्मिन् कलौ युगे जना मानवाः प्रायेणाल्पायुषः अनियत
गत वर्षायुषः अनेन कृतादियुगेष्विव यथेष्टं भोगानंतरं मुमुक्षोर्यासंभवः मंदाः मंदप्रकृतयः सुमंदमतयः नितरां मंदबुद्धयः उप
द्रुताः तापत्रयवर्गेण युक्ताभ्यामिति शेषः सुमंदमतय इत्यनेन दृढितिश्रेयस्तत्साधनानवगमः सूचितः मंदा इत्यनेन श्रेयः साधनो
पसंहारासामर्थ्यं सूचितं उपद्रुता इत्यनेन क्वचिच्छ्रेयः साधनोद्योगस्यानेकांतरायनिहतत्वं अत एव ते जना मंदभाग्या दुर्भाग्याः इत्यर्थः

नत्तनत्रंज सायुष्मन्भवताय द्विनिश्चितं उंसामेकांततः श्रेयस्तन्नः शंसितुमर्हसि ९ प्रायेणाल्पायुषः साधो कलावस्मिन्युगे जनाः मंदाः सुमंद-
मतयो मंदभाग्या ह्युपद्रुताः १० भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया ब्रूहि नः श्रद्धानानां येना-
त्मा संप्रसीदति ११

१० दियल्पादुपद्रुता अत एव ते विभागशः स्वस्वापेक्षित धर्मादि साधनभेदेन श्रोतव्यानि भूरि कर्माणि यागा यासबहुलानि कर्माणि बहूनि संतीति पौंडरीक
वाजपेयादिभेदेन भूरीणि एकैकस्मिन्नेनेकेति कर्तव्यता कलापवत्वेन भूरिकर्माणीति यत एवमतो नः श्रोतव्येषु मध्ये यत्सारं भगवति निरतिशय प्रेम
एकं सारं साधनं तन्मनीषया स्वबुद्ध्या समुद्धृत्य यद्धि उद्धृत्य श्रद्धानानां नोऽस्माकं ब्रूहि सारं विशिनष्टि येनेति येन सारेणात्मा चित्तं ति २
त४ संप्रसीदति रागादिभिरकलुषं स्यात्तत्सारं ब्रूहीत्यन्वयः प्रायेणाल्पायुरादिभिः प्रत्येकं संबध्यते प्रायेणामेदाइत्यादिना तेन मनुष्याणां सद
स्वेषु कश्चिद्यतति सिद्धये इति भगवद्वचनार्थः स्मारितः येनात्मा संप्रसीदतीत्यनेनात्मप्रसादार्थे एवतावत्सुमुक्षुभिर्वर्तितव्यं सति चात्मप्रसा
दे प्रसादे सर्वदुःखानां हानिरस्योपजायते प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठतीत्युक्तरीत्या दुःखहानाद्भिर्यादेवं भवतीति सूचितं यद्वा
येन सारभूतेन साधनेना त्मा संप्रसीदतीप्रसन्नो भवतीत्यर्थः एवं च किमलभ्यं भगवति प्रसन्ने श्रीनिकेतन इति वचनमाणरीत्या ततः सर्वं सं

संकल्पेन २

अथावतारचेष्टितानामकर्ममूलत्वं वदंतः कार्त्स्न्येन तदवतारचरित्राणि पृच्छंति अथेति हे धीमन् आत्ममायया आत्मनः स्वस्य मायया आश्रयेणाश्रि
युक्तेन आश्रयत्वं मायायाश्च प्रवृत्तिनिमित्तं संकल्परूपज्ञानेन वा मायावयुनं ज्ञानं इति नैघंटुकाः माय[illegible]सततं वेति प्राणिनां च शुभं शुभमि
ति स्थाने ऽभियुक्तप्रयोगः स्वैरं यथा तथा लीला अवताराः विदधतः कुर्वत ईश्वरस्य सर्वनियंतुः हरेराश्रितदुरितहरस्य भगवतः शुभाः [illegible] नां
वदतां च शुभावहाः अवतारकथाः अथ कार्त्स्न्येनाख्याहि कथय मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथो अथेति नैघंटुकाः आत्ममायया
स्वैरं लीला विदधत इत्यनेन देवमनुष्यादिनानाजातीयानामवतारचेष्टानामात्मीयसंकल्पमूलत्वमकर्मत्वं च प्रपंचेनोक्तं तच्च सर्वविदित १८
न त्वास्मीयेन कृता एवं भगवदवतारकथा भवद्भिरनंताः किमर्थं पृच्छ्यंते तत्राहुः यद्युत्तमश्लोकचरितं शृण्वतां रसज्ञानां पदे पदे
तरणे क्षणे पुनः पुनर्वा स्वादुरुचिजनकं भवति पूर्वश्रवणापेक्षया उत्तरोत्तरश्रवणे तीव्ररुचिकमेव भवतीति अश्रुतमपि पुनः पुनर्न
नवमेव भवतीति भावः यद्यस्मात्तत्पदे पदे स्वादु तस्मादुत्तमश्लोकविक्रमे न वितृप्यामः इत्यन्वयः १९ उक्तं चैतदिमभिप्रायेणाहुः कृतवानिति

अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः लीला विदधतः स्वैरमीश्वरस्यात्ममायया १८ वयं तु न वितृप्याम उत्तमश्लोकविक्रमे यच्छृ
ण्वतां रसज्ञानां स्वादु स्वादु पदे पदे १९ कृतवान् किल वीर्याणि सह रामेण केशवः अतिमर्त्यानि भगवान् गूढः कपटमानवः २०

प्रो २

कपटमानवः छद्ममानवः मनुष्यवत्प्रतीयमान इत्यर्थः एवमपि भगवान् पूर्णषाड्गुण्यः तथापि गूढः तत्त्वतो यद्यपीश्वर इति केनाप्यनिर्गतः केश
क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनां आवां तवांगसंभूतौ तस्मात्केशवनामवानिति हरिवंशोक्तकेशव[illegible] सकलप्रसंगस
यः श्रीकृष्णो बलरामेण सहितः अतिमर्त्यान्यपि मानुषाणि मनुष्यैः कर्तुमशक्यानीति यावत् वीर्याणि कार्याणि [illegible] तन्न प्रोच्य
सिद्धिः मानुषाणि हि कर्माणि सकृच्छ्रुतानि पुनः पुनः शुश्रूषां जनयेयुः भगवद्वीर्याण्यतिमानुषत्वात् [illegible] कर्तृ[illegible]
ष यां शुश्रूषामप्युत्तरोत्तराधिकां विलक्षणां जनयंतीति तत्र किमु वक्तव्यमित्यर्थः अतस्त[illegible]न वितृप्याम इति [illegible] दतो व्याख्यादिति [illegible]
प्रधानानां नो तानि कथयेत्यर्थः २० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रव श्रेनापीत्यर्थः यस्य श्रीकृष्णस्य पङ्क्त्या नां को वा भगवतस्तस्येत्युत्तरत्रान्वयः नाम गृणन्नुच्चरन् देहावसान इति शेषः ततः संसृतेः सद्यः एव विमुच्येत मुक्तो भवेत् कथं पारवश्येनाप्युच्चारणमात्रेणापि शत्रुरपि मुच्येत तन्नोच्चारणं विशिनष्टि यद्बिभेति स्वयं भयं यन्नामोच्चारणं प्रति भवः संसारः स्वयं बिभेति भयमिति पाठेपि जन्ममरणादि भयहेतुत्वाद्भवएव भयशब्देन विवक्षितः देहावसानेन भगवन्नामोच्चारणस्याभिधानेन मुक्तिसाधनत्वमितरकालिकस्य तु कर्मज्ञानयोगादिवद्भक्तियोगानुग्राहकत्वेन तद्द्वारेति विवेकः एतच्च षष्ठेऽजामि [illegible] यदिष्यते १४ स्तां तावदवताराणां नाममाहात्म्यं तदीयानां माहात्म्यमेव वाङ्मनसागोचरमित्यभिप्रायेणाह यदिति हे सूत यस्य [illegible] पादसंश्रयाः [illegible] २१
प्राप्यत्वेन संश्रयंत इति तथा मुनयस्तत्पदारविंदमननशीलाः प्रशमायनाः शमादिगुणानामाश्रयाः तदीयाः स्पृष्टाः पादयोरिति शेषः [illegible] स्पर्श

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयः १४ यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः
सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापोनुसेवया १५ को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः शुद्धिकामो न शृणुयाद्यशः कलिमलापहं १६ तस्य कर्मा
णि [illegible] तानि सूरिभिः ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः १७

मात्रेणापीति भावः सद्यः एव पुनंति स्पृष्टानिति शेषः एवं तत्राहसं वंधिन्याः स्वर्धुन्या गंगाया आपो त्वनुसेवया स्नानपानादिरूपयासेवया पुनंति स्वर्धु
न्या यस्त्वनुसेवया पुनंति [illegible] नयस्तदीयास्तु [illegible] यस्पर्शमात्रेणापि पुनंतीति केचित् [illegible] यथा स्व
र्धुन्या पोनुसेवया पुनंति तथा मुनयो प्युपस्पृष्टाः पुनंतीति दृष्टांतो वाभिप्रेतः १५ उक्तेऽर्थे श्रवणे तं विशिषंतस्तच्चरित्रमवश्यमात्मशुद्धिकामैः श्रो
तव्यमित्यभिप्रायेणाहुः को वेति तस्योक्तविधस्य पुण्यः श्रवणतो वदतां च पुण्यावहः श्लोक्यत इति श्लोको यशो यस्य अतएव सदाचारादिभिः [illegible]
कर्म चरित्रं यस्य तस्य भगवतो यशः कलिमलापहं कलिप्रभवपापहं तच्चित्तशुद्धिकामः को वा पुमान्न शृणुयात् सर्वोपि शृणुयादेवेत्यर्थः १६ अ
तो लीलया न कर्मणेति भावः कलाः मत्स्यादीन्ववतारान्तरस्याः दधतस्तस्योदाराणि विपुलानि सूरिभिर्नारदपराशरपाराशर्यादिभिः [illegible] गीता
नि च कर्माणि चरितानि श्रद्दधानानां नोऽस्माकं ब्रूहीति लीलयेत्यनेनावताराणामकर्ममूलत्वमुक्तं कलाः विदधत इत्यनेन श्रीकृष्णस्यावतारित्व
प्रतीत्या पूर्णावतारत्वं सूचितं तेनैवावतारान्तरप्रश्नश्च कृत इत्यर्थः १७

भा॰प्र॰ एवं संपृष्टनिश्रेयससाधनतत्त्वग्राहकप्राधान्यतमश्रीकृष्णचरित्रः सूतः शौनकादीनां प्रश्नानभिनंदयंस्तदुत्तररूपं श्रीभागवताख्यंपु
राणमाह [illegible] बादरायणिः इतीति इतीत्थं विप्राणां शौनकादीनां संप्रश्नैः समीचीनैः प्रश्नैः संहृष्टो रौमहर्षणिः [illegible] रोमहर्षणस्यापत्यं प्रमा
टी॰ १२ न्सूतः तेषां विप्राणां वचः प्रश्नात्मकं वचः प्रतिपूज्याभिनंद्य प्रतिवचनरूपं पुराणमिदं वक्तुं उपचक्रमे आरेभे विप्राणामित्यनेन सापेक्षत्वादि
संप्रश्नसंहृष्ट इति ससापेक्षत्वादार्षत्वाद्वा समासः तेषां विप्राणां वचः प्रतिपूज्येति वान्वयः संप्रश्नसंहृष्ट इति पाठांतरं तदा समीचीनः प्र
श्नो यस्य तस्मै प्रतिवचनाय संहृष्टः प्रहृष्टतरं वक्तुं हृष्ट इत्यर्थः यद्वा विप्राणामित्यस्य वच इत्यनेनैवान्वयः संशोभनाः प्रश्ना येषां तैः शौनकादि
भिः संहृष्ट इत्यर्थः १ प्रश्नानामुत्तररूपमिदं पुराणं शुश्रावयिषुरस्यैवं कार्यमिति सूचयितुं एतत्पुराणप्रवचनप्रवर्तकत्वरूपमहोपका
रं बादरायणिरूपगुरुं नमस्कारतत्त्वरणात्मकं मंगलमाचरति सूतः यं प्रव्रजंतमिति द्वाभ्यां द्वैपायनः श्रीव्यासः विरहकातरः सन् उद्वे
ग्नाजुहावाहूतवान् तदा तन्मयतया तरवोभिनेदुः तं सर्वभूतहृदयं मुनिमानतोस्मीत्यन्वयः कथंभूतं प्रव्रजंतं देवपित्रादीन्परित्यज्य व्रजंतं अनु

12

व्यास उवाच इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे १ सूत उवाच यं प्रव्रजंतमनुपेत
मपेतकृत्यं द्वैपायनो विरहकातर आजुहाव पुत्रेति तन्मयतया तरवोभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोस्मि २ ॥

पे१ पेतं उत्तरहितमसहायमित्यर्थः अपेतं कृत्यं यस्य तं कर्तव्यांशरहितं निष्पन्नब्रह्मोपासनत्वात् कृतकृत्यमिति भावः प्रव्रजंतमित्यनेन
देहानुबंधित्यागउक्तः अनेन ममताराहित्यं फलितं अनुपेतमित्यनेनासहायत्वमुक्तं अनेन देहपोषकसहायांतरराहित्यं सूचितं [illegible] जचदे प्र२
हात्मभ्रमरूपाहंकारराहित्यं फलितं द्वैपायनो विरहकातर आजुहावेत्यनेन द्वैपायनादप्यतिशयितज्ञानवत्त्वं सूचितं [illegible]
नविषयवाक्यत्वात् दूराद्धूते चेति प्लुतत्वे सति प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावे च सति संधिर्दुर्लभस्तथाप्य[illegible]स्कार्य इत्य[illegible]भिप्रायः अमि
ति योगं विभज्य सर्वस्य प्लुतस्य वैकल्पिकत्वाभ्युपगमात् अग्नित्वेषणे परस्य चेति सूत्रे सर्वः प्लुतः साहसमनिच्छ[illegible]द्रष्टुपदे शास्त्रीहीति न
भाष्यकारोक्तेरप्लुताभावपक्षे संधिः सुलभ एवेति बोध्यं साहसं शास्त्रत्यागस्तदनिच्छता शास्त्रमनुसंधानेन त्या[illegible]स्कार्ये इत्यभिप्रायः कश्चित्
वस्तुतस्त्विति प्राद्स्येव वाक्यांतत्वेन पुत्रशब्दे प्लुतप्रसंग एव नास्ति अनुकरणस्य पुत्रपदस्य संबोधनविषयत्वेऽपि वाक्यांतत्वाभावाच्च(

ननु भगवद्धीर्यादीनि बहूनि महता कालेन श्रोतव्यानि भवतां तु नित्यं तपश्चरतां कोऽवसरः इत्याह। कलिमिति कलिं [illegible] करं कलियुगमा
गतं प्रवृत्तं विज्ञाय अलक्ष्य वयमुपायांतरे एकलिं जेतुं श्रीहरेः कलिकृतदोषहरस्य भगवतः कथायां [illegible] श्रोतुं [illegible]
तेऽर्थः सत्रेणाः सावसराः लब्धावसराः इति यावत्। अस्मिन्वैष्णवे विष्णोः सर्वाधिनि तत्त्वानि ध्यायति [illegible] नैमिषारण्ये [illegible]
सर्वपतेन ब्रह्मसत्रेण अध्ययनेन वसतीति वहुत्वर्थे तृतीया दीर्घसत्रायेमित्यर्थः आसीनाः [illegible] [illegible] उपविष्टाः १४
पश्चादि सारहरमत एव दुस्तरं उपायांतरैस्तं जेतुमशक्यं कलिं निस्तितीर्षतां तर्तुमिच्छतां नोऽस्माकं मर्णावं [illegible] नौस्तीर्षतां
गीधारइव त्वं धात्रा ईश्वरेण संदर्शितः उपायत्वेनेति शेषः दैववशाद् इदं संपन्नमिति भावः २२ स्वस्ववर्णाश्रमधर्मेषु एव कलितरतः किं हरि

कलिमागतमाज्ञाय क्षेत्रेऽस्मिन्वैष्णवे वयं आसीना दीर्घसत्रेण कथायां सक्षणा हरेः २१ त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षतां कलिं सत्वहरं पुंसां कर्ण
धार इवार्णवं २२ ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि इति श्रीभागवते महापुराणे प्रथमस्कंधे शौनकोप्रश्नकथनं नाम प्रथमोऽध्यायः १ स्वां काष्ठा
मधुनोपेते धर्मः कं शरणं गतः

कथाश्रवणेनेति इमां प्रश्नं कांनिराकुर्वंतः प्रश्नमुपसंहरंति ब्रूहीति ब्रह्मण्ये ब्रह्मकुले साधुः ब्रह्मण्ये तस्मिन् धर्मवर्मणि धर्मस्य वर्मणि वर्मवत्कवच
वत्पालके योगेश्वरे भक्तियोगाराधेश्रीकृष्णेऽधुनास्वां काष्ठां ममिति योगप्रकर्षस्यादिष्टं वावैकुंठलोकमिति यावत् उपेते गते सति धर्मः वर्णा
मानुकूलः कं कस्मादन्यं कं शरणं रक्षितारं गतः गच्छेत्त्वकमपीत्यर्थः अधुना धर्मगोप्तुरभावात् कलिनाभिभूतो धर्मः संजे तुम प्रभुः [illegible]
कलिघ्नं भगवच्चरितं मे ब्रूहीत्यर्थः २३ इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेश्चक्रवर्तिनः श्रीप्रेल[illegible]
न तच्चरणकमलपरिचर्याप्रसादितैतत्कृतिसममधिगत श्रीभागवतार्थहृदयेन श्रीवेलवदासेन श्रीवीर[illegible]घवविदुषा लिखितायां श्रीभागव
तचंद्रचंद्रिकायां श्रीमद्भागवतव्याख्यायां प्रथमस्कंधस्य व्याख्यायां प्रथमोऽध्यायः १ ॥ ॥ ॥ ॥ ॥ ॥

एवं श्रावयितृभिरादौ महोपकर्तुर्बादरायणेर्नमस्कारात्मकं मंगलमनुष्ठेयमिति सूचितं न केवलं बादरायणेरेव नमस्कार्यः अपि
त्वन्येपि नारायणादय इत्यभिप्रायेणाह नारायणमिति नारायणादीन्नमस्कृत्य ततो जयमुदीरयेत्कथयेत् श्रावयेदित्या
वत् जयमित्यस्य कृष्णपुराणस्यान्वर्थनामांतरं अखिलदुरितजयाविनाभूतत्वाज्जयमिति तत्र नरनारायणयोर्वेदत्वाभि [illegible]
सिनोर्भगवदवतारयोः यो वै भारतवर्षेस्मिन्नद्यापि सर्वधर्मज्ञान[illegible]शमोपेत आकल्पादास्थितस्तपः इति [illegible] पारा
रीत्याप्याद्याचार्यरूपेण स्वानुष्ठानद्वाराखिलधर्मप्रवर्तकत्वेन नारदादिमुखेनाखिलाध्यात्मप्रवर्तकत्वेन च गुरूणामपि गुरु
त्वेन च महोपकर्तृत्वात्तन्नमस्कृतिरवश्यंकार्येति भावः वागधिष्ठातृदेवतात्वात्सरस्वती नमस्कार्येत्यभिप्रायेण सरस्वतीमित्युक्तं [illegible]

13

नारायणं नमस्कृत्य नरं चैव नरोत्तमं । दे ॥
वीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ४ ॥

स चतुर्मुखस्य स्त्री देवीनां पुंयोगादाख्यायामिति ङीष् अत्र सरस्वत्याश्चतुर्मुखसंबंधप्रख्यापकदेवीत्वविशेषणेन चतुर्मुखनमस्कृ
तिरपि कार्येति सूचितं चतुर्मुखो हि अनिरुद्धाख्यभगवत्तुरीयव्यूहनाभिकमलसंभूतस्तत्प्रोक्तो [illegible] निरुद्धो [illegible]दिष्ट भागवतं
चतुःश्लोकीरूपं तेनैतत्पुराणनिदानभूतं नारदायोपदिदेश अतः सोपि महोपकर्तृत्वेन गुरुश्चेति नमस्कार्य इत्यभिप्रायः अने
नैवानिरुद्धनारदादयोपि [illegible]पि नमस्कार्या इत्यर्थसिद्धं वेदितव्यं अनिरुद्धाच्चतुःश्लोकाधिगमो नारद[illegible]दुपदेशश्च द्वितीये
स्पष्टं भविष्यति नारदाच्चतुःश्लोकीमधिगम्य कार्त्स्न्येनैतत्पुराणनिर्मा[illegible]त्वेनोपकर्तृ[illegible]त्वात् व्यासो नमस्कार्य इत्यभिप्रायेण व्या
समित्युक्तं तत्रायं क्रमो विवक्षितः तावन्नमस्कार्यः शुकस्ततो व्यासस्ततो नारदस्ततः सरस्वती तत्कल्पो ततो निरुद्धः ततश्च नरनारायणाविति ४

उपकर्तारस्तेषाम ३

तन्मयेत्यत्र मयट् प्राचुर्ये संबंधमात्रे वा तत्प्रचुरतया तत्संबंधितया वा तैर्वा भिन्नेडुः शुकात्मकावयं इमे वं तूपेणप्रतिदध्वनुरित्यर्थः तत्प्राचु
र्यं च तन्नूणां शुकेन ज्ञानेर्व्याप्याधिष्ठितत्वादवगंतव्यं संबंधमात्रेमयट् पक्षेपि ज्ञानद्वाराधिष्ठानाधिष्ठे[illegible]भिन्नत्वं संबंधोत्र बोध्यः स्वरूपे
तर्वधिष्ठातृत्वासंभवात् एषाणुरात्मा आराग्रमात्रो ह्यवरोपि दृष्टः इत्यादिभिः श्रुतिभिर्जीवस्वरूपस्याणुत्वाद्[illegible] तत्स्वरूपेणाने
त्वा४ काधिष्ठातृत्वासंभवात् यद्यपि धर्मभूतज्ञानस्यापि सर्वेचानेत्याय कृत्स्नत इत्यादिश्रुतिभिर्मुक्तिदशायामेवानंत्यं भवतः [illegible]कस्य परिनि
ष्पन्नव्रस्योपासनत्वन शुकानामि[illegible]निरंतज्ञानसंकोचककर्मरूपावारणत्वादपरिछिन्नधर्मभूतज्ञानद्वारा[illegible]धिष्ठातृत्वमुक्तं यत
एवं तन्मयतया तैर्वा भिन्नेडुरत एव सर्वभूतहृदयं सर्वभूतानां हृदयं यतेगछति ज्ञानद्वारा व्याप्नोतीति सर्वभूतहृदयस्तं अयगतावितिधातुः
यद्वा सर्वभूतानां हृदयं यस्य ज्ञानद्वारा व्याप्यं सर्वभूतहृदयस्तं यद्वा हृदयशब्देन धर्मभूतं ज्ञानं लक्ष्यते हृदयस्य ज्ञानसाहचर्यात् सर्वभूतेषुहृ

यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोधं सं
सारिणां करुणयाह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनां २॥

पः शुकः २

दयं धर्मभूतं ज्ञानमधिष्ठानं यस्य सस्तं मुनिं स्वात्मपरमात्ममननशीलं श्रीशुकमिति विशेष्यमध्याहार्यं आनत इति कर्तरि क्तः नतस्तत्वानः
स्मीत्यर्थः २ यइति यः करुणया पुराणगुह्यं विशेषणं विशेष्यण वहुलमिति बहुलग्रहणात् विशेष्यस्यापि पुराण[illegible]स्य पूर्वनिपातः गुह्यं
पुरा २ पुराणं यद्वा पुराणगतं गुह्यमाह तं मुनीनामपि गुरुं व्यास[illegible]मुपयामि शरणं व्रजामि पुराणं कथंभूतं स्वानुभावं स्वेन शुकेनानुभावं कर्मणिघं
अप्रथमं मनुभूतमित्यर्थः अखिलानां श्रुतीनां सारो यस्मिन्निति पाद्यस्त तथा वेदसर्वभागार्थभूतकर्मणामप्यत्र पुराणे भगवदाराधन मधी २
रूपतायास्तत्र तत्र प्रतिपादनाद खिलश्रुतिसारमित्युक्तं एकं स्वतुल्याधिकपुराणांतररहितं अध्यात्मदीपं आत्मानं अध्यात्ममिति विभक्त्य
र्थेव्ययीभावः स्वात्मपरमात्मयाथात्म्यप्रकाशनेदीपतुल्यमित्यर्थः अतितितीर्षतां संसृतिं तर्तुमिछतां [illegible]संसारिणां तमो धंत
मः संसृतिरुचिजनकमज्ञानमंधयतीति तिरोधापयति निवर्त्तयतीति तथा ३ ॥ ॥ ॥ ॥ ॥ ॥

भा॰ पु॰ नन्वव्यवहितेत्ययुक्तं शब्दादिविषयाक्रान्तमनसा कामेनापि मध्ये विषयान्तरानुध्यानव्यवहितत्वप्रसंगादिति शंकां निरस्यन्नुक्तभक्तेरवान्तरविशे
टी॰ १४ षफलं तावदाह वासुदेव इति भगवति षाड्गुण्यपरिपूर्णे वासुदेवे प्रयोजितो भक्तियोगः वैराग्यमाशु जनयति सर्वत्रासौ समस्तं च वसत्यत्रे
ति वेद्यतः ततः स वासुदेवेति विद्वद्भिः परिगीयते इति निरुक्तवासुदेवशब्देन सर्वान्तरात्मत्वेन सर्वाधारत्वं भगवच्छब्देन षाड्गुण्यपरिपूर्णत्वो
क्तौ सर्वान्तरात्मकत्वेन निरतिशयप्रियत्वं लब्धं आत्मैव हि निरतिशयप्रियः एवमनेन पदद्वयेन शब्दादिलौकिकविषयेभ्यो वैलक्षण्यमस्य प्रोक्तं
एवं च विषयस्य विलक्षणत्वाद्देवतदनुध्यानरूपो भक्तियोगः शब्दादिविषयेष्वनासक्तिरूपं वैराग्यमाशु जनयति कस्मिंश्चिद्वि[...]
नुरागातिशयस्य विषयान्तरवैतृष्ण्यावहत्वदर्शनात् तस्माद्भक्तियोगनिमग्नमनसः शनैर्विषयान्तरवैतृष्ण्यस्य स्याद्यो देवो स्या[...]
[...]त यो ज्ञानवैराग्याभ्यां[...]
[...]ध्यान

14

वासुदेवे भगवति भक्तियोगः प्रयोजितः जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकं ७॥
धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः नोत्पादयेद्यदि रतिं श्रम एव हि केवलं ८॥

हितत्वं भक्तेः संपत्स्यत एवेति भावः तथा यदहैतुकं नाहं वेदैर्न तपसा इत्युक्तरीत्या भक्तिव्यतिरिक्तहेतुत्वं तत्त्वज्ञानं [...]स्वरूपात्मकं तच्च ज
नयति अनेन भक्तेर्ज्ञानसाक्षात्कारात्मकत्वं विप्रा यथा उक्तं ७ तदेवं श्लोकद्वयेनोक्तविधभक्त्यनुग्राहक एवाभिसंहित[...]र्मा श्र
कधर्मः श्रेष्ठ इत्युक्तं अथास्य धर्मस्य भगवद्गुणश्रवणादिकैर्विज्ञानद्वारा भक्तियोगानुग्राहकत्वं दृष्टमभिसंहितफलं धर्म[...]भिन्न फल
माह धर्म इत्येकेन यः सम्यगनुष्ठितोपि धर्मः पुंसां विष्वक्सेनस्य भगवतः कथासु रतिं रुचिं यदि नोत्पादयेत्तर्हि स धर्मः[...] केवलं श्रम एव
फल एव संसृतिरूपानर्थावह एवेत्यर्थः रतिं नोत्पादयेदित्यनेन रत्येकप्रयोजनतयानुष्ठितो धर्मः पर[...] श्रमफलक
इति प्रतीतेः फलानभिसंधानाभिसंधिभ्यां धर्मस्योत्कृष्टत्वापकृष्टत्वे वेदितव्ये ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्तपू २७

तदेवं मंगलाचारयुक्तानां नित्यं च प्रयतात्मनां जपतां जुह्वतां नित्यं विनिपातो न विद्यत इत्युक्तरीत्या कृतगुरुदेवतोपासकमंगलस्तावस्त्रश्रमभि
मनेदति मुनयइति हे मुनयः भवद्भिः साधु यथा भवति तथा लोकमंगलमिति प्रश्नसाधुत्वे हेतुः लोकमंगलविषयत्वात् प्रश्नः साधुरित्यर्थः क
थं प्रश्नस्य लोकमंगलविषयत्वं इत्यत आह यदिति यद्यस्मात् कृष्णविषयकः संप्रश्नः कृतः मंगलानां च मंगलं इत्युक्त ता निरतिशयमंगल
स्वरूपविषयकः संप्रश्नः कृतस्ततो लोकमंगलमहं एवं इत्यर्थः कृष्णसंप्रश्नस्य लोकमंगलविषयत्वमेवोपपादयति येनेति येन कृष्णेन तद्वि
षयकप्रश्नेन वा हेतुना आत्मा चित्तं सुष्ठु प्रसन्नं भवेति प्रश्नात्तस्याप्यात्मस्वरूपस्वरूपगुणाविर्भूतिः कृष्णानुसंहिता चित्तगतमालिन्यमपनयति ति
त्प्रसादाद्देवलोकानां सर्वाणि मंगलानि सुलभान्येवेति भावः ५ तत्र यत्तावत् सृष्टं भवता यदि निश्चितं उसाम्यं ततः श्रेयस्तन्नः शंसितुमर्ह
सि इति किं निरतिशयं श्रेयः को वा तत्साधर्मः इति तत्र गर्भजरामरणाद्यनर्थरूपसंसृतिनिवृत्तिपूर्वकब्रह्मानंदानुभवात्मको मोक्ष एव निर

मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमंगलं यत्कृतः कृष्णसंप्रश्नो येनात्मा सुप्रसी ६
दति ५ स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे अहैतुक्यप्रतिहता ययात्मा संप्रसीदति

तिशयं श्रेयः तत्साधनभूतधर्मश्च परब्रह्मोपासनात्मिका विजातीयप्रत्ययान्तराव्यवहितप्रत्यया हिता पन्नाप्रीत्या भक्तिरेव तन्निष्पत्तिसा
नभिसंहितफलैर्वर्णाश्रमधर्मैर्ज्ञानयोगशमदमादिभिः सत्संगादिश्रवणाद्याच्च भगवद्गुणश्रवणादिरुचिजननद्वारा भवतीति भ
क्तियोगानुग्राहक एव वर्णाश्रमयुक्तो धर्मः श्रेष्ठस्तस्यस्त्वभिसंहितफलैः पुनःसंसृतिहेतुत्वेनानर्थावह इत्याह स वा इति त्रिभिः यतोन
भिसंहितफलाद्वर्णाश्रमानुगुणात्स्वनुष्ठिताद्धर्मात् अधोक्षजे भक्तिर्भवति स एव धर्मः परउत्कृष्टः भक्तिमपि विशिनष्टि अ कीफ
लोपाधिरहिताः अप्रतिहता अन्तरायानुपहता अव्यवहितेति पाठान्तरं तदा विजातीयप्रत्ययान्तराव्यवहिता यया भक्त्या आत्मा सुप्रसीदति एवंविध
भक्तिरूपा भक्तिप्रकर्षापादक मनोनैर्मल्यहेतुरित्यर्थः यया यया आत्मा सुप्रसीदतीत्यनेन प्रीत्यात्मकत्वमुच्यते अव्यवहितेत्यनेन तैलधा
रावदविच्छिन्नस्मृतिसंतानरूपत्वमुक्तं ६

हृता ३

जीवस्य प्रयोजनं तत्त्वजिज्ञासैवेत्युक्तं किं तत्तत्त्वं यज्जिज्ञासितव्यं इत्यत आह वदंतीति यज्ज्ञानं ज्ञानस्वरूपं ज्ञानगुणकं च अद्वयं तत्तत्त्वाभाधिकरत्वं
त्वेतररहितमवयवभेदरहितं वा जात्यादिभेदरहितं वा ब्रह्मपरमात्मभगवच्छब्दाभिहितं तदेव तत्त्वमिति ब्रह्मपरमात्मभगवच्छब्दास्ता मात्सविशेषवि
शेषप्रयुक्ताः एवं प्रयुंजानस्य सदाकाशादिशब्दा अपि कारणवाचकगता भगवत्येवेत्यभिप्रायः ११ एवं धर्मादिवर्गस्यापि परं परयापवर्गसाध
नत्वे प्रसंगाद्भजनीयवस्तुस्वरूपं चोक्तं अथ यदिवक्षितं मोक्ष एव निरतिशयं श्रेयस्तत्साधनं तु भक्तिरेव तन्निष्पत्तिश्च वर्णाश्रमधर्मा
नयोगशब्दादिभिरित्याह ... सार्द्धदशभिः तत्तस्माद्भक्तियोगानुग्राहकस्यैव धर्मस्य परत्वात्त्रिवर्गस्यापि परंपरया पवर्गार्थेत्व ... धा...
पवर्गेतिरिक्तानिरतिशयपुरुषार्थाभावाच्चेत्यर्थः श्रुतं यज्ञादिकर्म तस्य कर्तव्यतया वेदश्रुतत्वात्तेन गृहीतया अनुगृहीत ... मानुमितेः स्व
कयाभक्त्या आत्मनि जीवात्मन्यंतरात्मतया स्थितं ब्रह्मादिशब्दवाच्यं भगवंतं श्रद्दधाना मुनयः पश्यंति हे मुनयः इति सं॰ ... गादीनामिष्टवर्णाश्रम ... यति

15

वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ११ तत्त॥
॥ श्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया पश्यंत्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया १२॥

एवंविधया भक्त्या पश्यंति ज्ञानशब्देन प्रत्यगात्मयाथात्म्यज्ञानयोगो विवक्षितः वैराग्यं विषयांतरेषु वैतृष्ण्यं तेन शमदमादिसंग्रहः एभिरंगैरु
पकृतया भक्त्या आत्मनि स्थितं परमात्मानं पश्यंति साक्षात्कुर्वंतीत्यनेन भक्तेरेव परमात्मदर्शनसमनंतरभाविमोक्षसाधनत्वमुक्तं ... सी॥
गज्ञानयोगयोः शमादीनां च भक्तियोगानुग्राहकत्वं चाभिधीयते हृदयग्रंथिरि... तिश्रुत्या तदर्थानुवादिना वक्ष्यमाणश्लोकेन च ... भ
नानंतरभावित्वमवगतं एवं च भक्त्या पश्यंतीत्यस्य दर्शनरूपापन्नाया भक्तेरव्यवधानेन मोक्षसाधनत्वमित्यभिप्रायः १२ ... हेतु
नेन वर्णाश्रमधर्मस्य भक्तियोगानुग्राहकत्वमुक्तं धर्मः स्वनुष्ठितः पुंसामित्यादिना धर्मस्य भक्तियोगानुग्रहप्रकार उक्तः इदानीमन्यथा ...
दनुग्रहप्रकारं दर्शयति
... कैरे ...

॥८

तदेवममनभिसंहितफलो भगवद्गुणश्रवणादिरुचिजननद्वारा भक्तियोगानुग्राहक एव धर्मः परो न्यस्तु श्रमफलक इत्युक्तं ॥ सकामः प्रोक्तविधधर्मेऽनु
ग्राह्यभगवद्भक्तियोगसाधर्म्यात्तस्यैव निरतिशयपुरुषार्थत्वमिति दर्शितं तु धर्मार्थकामानां स्वतः [illegible] मार्थत्वं काम
स्येन्द्रियतृप्त्यर्थत्वमिन्द्रियतृप्तेर्जीवनार्थत्वं जीवनस्य पुनर्धर्मार्थत्वं इत्यादिरूपां च कवयन्ति लौकिकाभिमतां च निरस्य धर्मादीनामपि ल
पं परयानिरतिशयपुरुषार्थरूपमोक्षसाधनभक्तियोगानुग्राहकत्वमाह धर्मस्येति त्रिभिः तत्र धर्मस्य फलमर्थः अर्थफलं [illegible] कामः [illegible]तो
लमिन्द्रियतृप्तिरिति लौकिकमतं तत्र धर्मफलत्वमर्थस्य निरस्यति अर्द्धेन आपवर्ग्यस्यापवर्गसाधनस्यानभिसंहितफ[illegible] [illegible]ति [illegible]यतीति
यानिरतिशयपुरुषार्थरूपमोक्षसाधनीभविष्यतो धर्मस्यार्थो यत्प्रयोजनं नापार्थः धनं प्रकल्पते धनं धर्मस्य फलं न भवतीत्यर्थः धर्मत्वमहि
र्थफलकत्वरूपलौकिकमतानुवादेनैव स्वतः पुरुषार्थत्वमपि निरस्तं वेदितव्यं एवमुत्तरत्रापि द्रष्टव्यं एकस्यैवस्यानयागादिरूपस्य धर्मस्य
फलाभिसंधानाभिसंधिरूपाकारभेदेनोत्कृष्टापकृष्टफलसाधनत्वं गते सति तत्राभिसंहितफलत्वरूपाकारानादरेण सहेतरप्रकारो रूपा

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ९ कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता जीवस्य तत्त्वजिज्ञासा नार्थो यश्चे
ह कर्मभिः १० ॥

र्थोऽर्थत्वात्तद्रूपलौकिकानामतमतीवानादरणीयमिति भावः अर्थकामस्यार्थफलत्वं निरस्यति नार्थस्येति धर्मैकान्तस्य धर्मे[illegible]
वितस्य लाभाय प्रयोजनाय कामो न स्मृतः अर्थस्य प्रयोजनेन कामो भवतीत्यर्थः अत्र कामशब्देन काम्यत इति काम [illegible]स्यादि तन्निष्प
द्यते ९ अथ कामस्येन्द्रियतृप्तिफलकत्वं निरस्यति कामस्येति यावता अन्नपानादिना कामेन काममानेन वस्तुना जीवेत तावदेव तस्य [illegible]
वस्तुनः लाभः फलं नेन्द्रियतृप्तिः किंतु देहधारणमेवान्नपानादिकामफलमित्यर्थः अथ जीवनस्य पुनर्धर्मार्थत्वं निरस्यति जीवस्य जीव[illegible]तान्
योजनं तत्त्वजिज्ञासैव न तु इह लोके यः कर्मभिः साध्यो धर्मः सोऽर्थः प्रयोजनं अत्र धर्मार्थकामजीवनानां क्रमेणार्थकामेन्द्रियतृप्ति [illegible]र्थ
त्वं निरस्यते यः क्रमेणापवर्गे धर्मे देहधारणमात्रजिज्ञासार्थत्वोक्तेरयं भावः सति विघ्ने तेनानभिसंहितफलं धर्मं संपाद्य तेन धर्मेणापवर्ग
साधनभूतं भक्तियोगमुपकुर्यात् सति तु कामे तेन देहधारणमात्रोपयुक्तेन देहं धृत्वा तेन देहेन भजनीयतत्त्वजिज्ञासा कार्येति १० ॥ ॥

भा॰ प्र॰ यस्य भगवतोनुध्या[illegible]नुध्यानं भक्तिः सैवासिः खड्गस्तेन युक्ताः सहिताः कुशलाः कर्मैव ग्रंथिस्तद्रूपं निबंधनं बंधनं छिंदंति कर्मणो ग्रंथि
टी॰ १६ [illegible]त्वं रूपणं ग्रंथिवद्दुर्मोच्यत्वात् दुर्विमोच्येन कर्मणा निबध्यत इति निबंधनं कर्मातः संसारस्तच्छिंदंति इति वा तस्य कथासुरतिं को वा धर्मा
न्न कुर्यात् सर्वोपि कुर्यादेवेत्यर्थः यस्य भक्तिरनर्थावह संसृतिनिरासहेतुस्तस्य महोपकर्त्तुर्भक्तियोगस्यानुग्राहकतया तत्कथासु रतिं सर्वो
पि जनः कुर्यादेवेत्यर्थः १५ यद्यपि धर्मः स्वनुष्ठितः पुंसां इति धर्मस्य वासुदेवकथारुचिजननद्वारा भक्तियोगानुग्राहकत्वं नैवकथारुचे
त्व २ र्जनकं मयुक्तमेव भवति तथापि न साक्षादेव धर्मस्य रति हेतुत्वं पितु सत्संगादि द्वारा हेतुत्वं तत् एवेत्याह शुश्रूषोरिति श्रोतुमिच्छोः स्वधर्म
निरस्त शुश्रूषा प्रतिबंधकस्येत्यर्थः श्रद्दधानस्य पुंसः वासुदेवकथायां रुचिः हे विप्रा महतां सेवया पुण्यतीर्थानां संगानि[illegible] निषेवणाच्च भवे
नति

16

यदनुध्यासिना युक्ताः कर्मग्रंथिनिबंधनं छिंदंति कोविदास्तस्य को न कुर्यात्कथारतिं १५
शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवया १६
शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः हृद्यंतःस्थो ह्यभद्राणि विधुनोति सुहृत्सतां
नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥ १८ ॥ १७

कोविदाः को नि ना[illegible]

ति १६ श्रवणादीनां भक्तियोगोपकारप्रकारं दर्शयति शृण्वतामिति द्वाभ्यां उ एवं शृण्वतां कीर्तयतां च पुण्यावहं श्रवणं कीर्तनं च यस्य सः॥ [illegible] १८
सः स्वकथाः शृण्वतां सतां साधूनां हृदयांतः स्थितः [illegible] सन्नभद्राणि भक्तियोगोत्पत्तिप्रतिबंधकानि दुरितानि विधुनोति [illegible] हेतु
[illegible] र्गार्भमिदं सुहृत्वाद्धुनोतीत्यर्थः १७ ततः किमतआह नष्टप्रायेष्विति। नित्यं भागवतानां सतां सेवया तत्सेवापूर्वकं [illegible] श्रवणेन तत्
र्थः अभद्रेषु नष्टप्रायेषु सत्सुत्तमश्लोके भगवति नैष्ठिकी दृढा भक्तिर्भवति नष्टप्रायेष्विति प्रायग्रहणा[illegible] भक्ति [illegible] प्रतिबंधक
तरदुर्वाघरूपं त्ववशिष्यत इति सूचितं एवं तत्पन्यायतया स्वधर्मेण पुण्यपापो सति प्रतिबंधकमात्रमेव निरस्यत इति [illegible] क्तं प्राक् १८ ॥ ॥

अतइति यतो भक्तेरेव साक्षान्मुक्तिसाधनत्वमतो हे द्विजश्रेष्ठाः पुंभिर्वर्णाश्रमविभागशः अवस्थितस्येति शेषः तद्वर्णाश्रमानुरूपेणेत्यर्थः वर्णादि
२२ भेदेनोपस्थितैः पुंभिरितिवा सम्यगनुष्ठितस्य पंचमहायज्ञादिरूपस्य संसिद्धिः फलं हरितोषणमेव अपि भाषे [illegible] धर्माद्भक्तियोगप्रतिबंध
निरसनानुकूलसंकल्पहेतुर्हरितोषः ततश्च भक्तियोगसंपत्तिप्रतिबंधपापक्षयस्ततो भक्तियोगनिष्पत्तिरिति यद्वा हरिस्तु [illegible] नाजुष्टानेन
तद्धरितोषणं तदेव धर्मस्य स्वनुष्ठितस्य संसीद्धिः फलं भक्तियोगोत्पत्तिप्रतिबंधनिरसनद्वारा हरितोषहेतु भक्तियोगनि [illegible] रेव धर्मस्य
फलमित्यर्थः अन्यथा धर्मेणापापमनुदति अविद्यया मृत्युं तीर्त्वेत्यादिश्रुतेर्धर्मस्य भक्तियोगोत्पत्तिप्रतिबंधकपापनिराकरणत्व [illegible] विरोध
धापत्तेः धर्मस्यैव हरितोषफलकत्वे भक्तेर्वैयर्थ्यापत्तेश्च ननु ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनेति भक्तियोगस्यैव सर्वदुरितनि

अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः। स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणं १३॥
तस्मादेकेन मनसा भगवान्सात्वतां पतिः। श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा १४॥

भ२ कृत्त्वस्मरणात् भक्तियोगवद्धर्मस्यापि हरितोषहेतुत्वमयुक्तमिति चेन्न द्विप्रापकप्रतिबंधकं प्राप्तिप्रतिबंधकं चेति द्विविधं [illegible] नं तत्र प्रापकस्य भक्ति
योगस्य यदुत्पत्तिप्रतिबंधकं दुरितं तत्क्षपणीयं एवं धर्मनिरस्तप्रतिबंधके भगवत्प्रापके भक्तियोगे निष्पन्ने तेन यद्भ [illegible] प्रतिबंधकं दुरि
तं तत्क्षपणीयमिते तदभिप्रायकाणि ज्ञानाग्निरित्यादीनि वचनानि १३ एवं वर्णाश्रमधर्मस्य भक्तियोगोपकारस्तत्प्रकारश्च भक्तियोगप्रतिबंधनिरस २३
भगवद्गुणादिश्रवणस्तुतिजनननद्वाराचेतिद्विधा संदर्शितः अथ तुल्यन्यायतया भगवद्गुणस्वरूपादिश्रवणादीनामपि भक्तियोगोप
कारकत्वमुपकारप्रकारं च वक्तुं तेषामवश्यकर्तव्यतां तावदाह तस्मादिति द्वाभ्यां तस्माद्धर्मस्य भक्तियोगानुग्राहकत्वे तत्प्रदर्शने [illegible] तुल्य
नीयतया भगवद्भक्तियोगोपकारकत्वेन सात्वतां भक्तानां पतिर्भगवानेकेनैकाग्रेण मनसा नित्यदा श्रोतव्यः कीर्तितव्यः ध्येयः [illegible] तव्यः पू
ज्यश्च ध्यानमवश्रुतार्थप्रतिष्ठापनात्मकं मननात्परपर्यायं स्मरणं विवंदितं भक्त्यात्मकस्य ध्यानस्य श्रवणाद्यनंतरभावित्वं वक्ष्यते १४॥

भा·प्र·
टी·२३

ननु सृष्ट्यादिकारणेषु ब्रह्मरुद्रादिषु देवेषु सत्सु कथं वासुदेवभक्तिरेव मोक्षोपायत्वेनोक्तेति शंकायामाह सत्त्वमित्यादिना याव[द]ध्यायसमाप्तिः तत्र भगवान्वासुदेवो हिरण्यगर्भरुद्राद्यन्यजीवशरीरकतया स्वावतारस्वरूपेण च जगत्सृष्टिस्थितिलयकारणं तत्तत्र साक्षाद्वासुदेवभक्तिरेव मोक्षोपायभूता तच्छरीरभूतहिरण्यगर्भादिभक्तिस्तु यावद्यावात्तनुभक्त्यत्र स्याद्युक्त्या तत्त्वलोकादिप्राप्त्युपायः यद्यपि हिरण्यगर्भादिजीवादिशरीरकतया द्रूपेणावस्थितः परमात्मैव तथापि कर्तृत्वभोक्तृत्वादिकं जीवगतमेव न तु परमात्मगतं न हि शरीरगतधर्मेण शरीरिणि प्रसक्तिरित्यमर्थोऽत्र प्रतिपाद्यते सत्त्वमिति सत्त्वादयस्त्रयः प्रकृतेर्गुणाः प्रकृतेरिति सावधारणं प्रकृतेरेव गुणा न तु जीवस्य परस्य वेत्यर्थः तैः सत्त्वादिभिर्युक्तः परः पुरुषः परमपुरुषः योगेन शरीरात्मभावरूपो विवक्षितः एकः स्रष्टुः प्रागिति शेषः सदेव सोम्येदमग्र आसीदित्यादिश्रुत्यनुरोधात् एकत्वं च कार्यदशावस्थनामरूपविभागप्रयुक्तबहुत्वप्रतिसंबन्धि नामरूपविभागाभावप्रयुक्तविभागानर्हसूक्ष्मचिदचिच्छरीरकत्वं सृष्टेः प्राक् नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकतयैक एवासन्निधत्ते सत्त्वादिभिर्युक्तः स्थूलचिदचिदात्मकस्य जगत

सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः २३

मध्याय[illegible]

नः स्थित्यादये स्थिति सृष्टिलयार्थं स्थितिप्राधान्यं भगवत्प्राधान्यविवक्षया परमपुरुष एव ब्रह्मरुद्ररूपेणान्यद्धेत्वावतारूपेण स्थितिस[illegible] रुद्र हरिविरिंचिहरेति संज्ञा ब्रह्मविष्णुरुद्रसंज्ञाः इति शब्दः प्रकारार्थः तेन रूपसंग्रहः हर्यादिरूपाणि तद्वाचकानि नामानि च धत्ते [illegible] तत्र सत्त्वतनुः शरीरमधिष्ठेयं यस्य तस्मात्सत्त्वप्रवर्तकाद्विष्णोरेव नृणां भजतां श्रेयांसि ज्ञाननिष्पत्तिर्भवति रजोमिश्र प्राप्तिरूपाणि यद्यपि खलु

ननु त्रयाणामेव सर्वकारणत्वात्सर्वेषां संज्ञाभेद एव न वस्तुभेद इति प्रतीतिरात्र याणामैक्यमेव द्रष्टव्यं तथा च श्रूयते ब्रह्मा नारायणः शिवश्च नारायण इति स्मर्यते च ब्रह्मा नारायणात्मासौ कल्पादौ भगवान्स्वयं प्रजाः ससर्ज भगवान्ब्रह्मा नारायणात्मकः ततः स भगवान्विष्णुः [illegible] एवं यः ततः कालाग्निरुद्रोऽसौ भूत्वा सर्वहरो हरिः सर्गस्थित्यन्तकारिणीं ब्रह्मविष्णुशिवात्मिकां स संज्ञां स याति भ[illegible] तस्मात्सर्वमिति ततः श्रीवासुदेवस्य सर्वस्मात्परत्वं नोपपद्यते किं चैक एव हर्यादिसंज्ञां धत्ते इत्यनेन हर्यादिभ्यः परं तत्त्वमस्तीत्यवगम्यते उक्तं चैतत् अत एव वि

कथमभद्रेषु नष्टेष्वपि भक्तिर्भवतीत्यत्राह तदेति न एतां सततं महत्सेवैव धर्मस्तस्मात्तदाभद्रेषु नष्टेषु तन्मला: नित्तविक्षेपावरहेतवो र श्री१
जस्तमसोर्भावाधर्मा: कार्यभूता इति यावत् ये कामलोभादय: संति आदिशब्दग्राह्या: क्रोधमोहादय ... रजस्तमोभावे
भ्य एतै रजास्तमोभावैरनाविद्धं प्रमविमृद्धं चात एव सत्वे रजस्तमोभ्यामनभिभूते सत्वगुणे स्थितं सत्वप्रधानं संस्थितं ... प्रसीद १९
तिप्रसन्नेव चेतसि नैष्ठिकी भक्तिरेगु भवतीतिभाव: १९ तदेवाह एवमिति एवमुक्तरीत्या प्रसन्नं मनो यस्य तस्य विर ... ष्ठिकी
भक्तिर्भवतीति शेष: तस्माच्च भक्तियोगाद्भगवतत्वविज्ञानं भगवत्स्वरूपगुणयाथात्म्यसाक्षात्कारात्मकं ज्ञानं ... जायते ... १०
तच्च ज्ञानं परमकै: फलं भक्त्यात्वनन्यया शक्य अहमेवंविधोर्जुन ज्ञातुंद्रष्टुंच तत्वेन प्रवेष्टुंच परंतपेति वचनात् २० एवंसा ... धर्म ...

तदा रजस्तमोभावा: कामलोभादयश्चये चेत एतैरनाविद्धं स्थितं सत्वे प्रसीदति १९
एवं प्रसन्नमनसो भगवद्भक्तियोगत: भगवत्तत्वविज्ञानं मुक्तसंगस्य जायते २०
भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशया: क्षीयंते चास्य कर्माणि दृष्ट एवात्मनीश्वरे २१
अतो वै कवयो नित्यं भक्तिं परमया मुदा वासुदेवे भगवति कुर्वंत्यात्मप्रसादिनीं २२

भगवद्भक्तियोगसाध्यं फलमाह भिद्यतइति आत्मनि परमात्मनीश्वरे भगवति दृष्ट एव दृष्टमात्रे सत्येवास्य द्रष्टु: पुंस: सर्वकर्माणि भगवत्प्रा
प्ति प्रतिबंधकानि उत्तरपूर्वाघरूपाणि क्षीयंते नश्यंत्यत एव तन्मूला: सर्वे संशया: नश्यंति सर्वशब्देनास्य याज्ञान विपरीतज्ञानाज्ञानसंग्रह: त
तस्तन्मूलको हृदयग्रंथिवद्दनिर्मोच्योऽहंममाभिमानो भिद्यते समूलासंसृतिर्निवर्त्तते तन्निवृत्तौ च ब्रह्मप्राप्तिरूपस्त्वनुभवश्चायत्नासिद्ध इति ... :
२१ उक्तार्थस्यानुष्ठानं दर्शयति अतइति यतोमोक्षएव निरतिशयपुरुषार्थस्तत्साधनं तु भक्तिरेवात: निरतिशयश्रेयस्तत्साधनाभि ... परम
यो मुदा भगवति वासुदेवे भक्तिमात्मप्रसादिनीं कुर्वंति आत्मप्रसादिनी भक्तिं कुर्वंतीत्यनेनारब्धभक्तियोगस्य चित्तप्रसादोपि शनै: शनै: भक्तियो
गादेव भवतीति सूचितं २२

पुरुषनारायणादिशब्दानां चपर्यायत्वेनार्थभेदाहेतुत्वात् [illegible] ८

६२

भा॰प्र॰ मस्ति न वासुदेवं प्राप्य तत्पसीदति देशतो कालतो व्याप्तिर्मोक्षदत्वे तथैव च हरेर्विभूतिमात्रं तु केवलं संभाषितं नैव तु केशवात्परः स्वा
टी॰१८ धिराजः सर्वेषां विष्णुर्ब्रह्ममयो महान् परः परायणं सकलानयत्र ब्रह्मादयः संति परावरेश इत्यादिभिर्बहुभिः प्रमाणैर्विष्णोः स
र्वाधिकत्वप्रदर्शनपूर्वकं तदधिकदेवतान्तरनिषेधात् ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयंत इत्यत्र तु विष्णोरुत्पत्तिरवताररूपास्वसंक
ल्पमूलोच्यते न तु ब्रह्मरुद्रादीनामिव कर्ममूला। कारणवाक्येष्वेकस्यैव कृत्स्नजगत्कारणत्वावगमात् त्रयाणां समुच्चित्य कारण
त्वानुपपत्तेः कारणत्वोपास्यत्वबोधकवाक्यगतानां शिवशंभ्वादिसामान्यशब्दानां छागपशुन्यायेन विशेषवाचिनारायणशब्दार्थपर्य
पपत्तेः [illegible] अपि तु सर्वकारणत्वानुपपत्तेरीक्षणाद्यर्थविरोधाच्च रुद्रा
दीनां अनपहतपाप्मानां अहमस्मीत्यादिना कार्यत्वकर्मवश्यत्वादिश्रवणात् वासुदेवादि यदवाप्यस्य कुत्रापि कर्मवश्यत्वाश्रवणात्
तदुत्पत्तेश्च अजायमानो बहुधा विजायत इत्यवताररूपत्वश्रवणात् अजायमान इति चेदुच्यते त्रिमूर्तिमध्ये एकत्वेनावतीर्णस्य
नारायणस्य असेषणानां जगतो विष्णुपत्नीत्यादिना तस्माद्युः संभूत इत्यत्र पूर्वानुवाकोक्तं महापुरुषत्वं वेदाहमेतमित्यनेनैव वाक्ये
१७ न प्रत्यभिज्ञायमानस्य श्रियः पतित्वमहापुरुषत्वादिश्रवणात् तमेव सर्वोत्तरं महापुरुषं यस्मात्परं नापरमस्ति किंचित् यस्मान्नाणीयो न
दिविः ज्यायोऽस्ति कश्चित् वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वमिति प्रत्यभिज्ञाप्यापरि च सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ९७
18 सर्वव्यापी च भगवानिति सहस्रशीर्षत्वादिधर्मान् प्रत्यभिज्ञाप्यानयोर्वाक्ययोर्मध्ये प्रयुक्तस्य ततो यदुत्तरमिति वाक्यस्य तेदं शास्ये नना
रायणपरत्वस्यावश्यकत्वात् तत इत्यस्य शब्दतोर्थतश्च प्रत्यभिज्ञापित तद्धेतु परामर्शत्वस्यैव न्याय्यत्वादन्यथा यस्मात्पुरुषादपरं व्यति
रिक्तं परमुत्कृष्टं नास्तीति पूर्ववाक्येनोक्तं पुरुषमेव परामृश्य तद्व्यतिरिक्तस्योत्तरत्वप्रतिपादने पूर्वापरव्याघातप्रसंगाच्च ततउत्तरे
तु भयः य तु पुरुषशब्दवाच्यं तत्त्वं तदेवोत्तरं तत्त्वमिति अमृतस्यैष सेतुरित्यनेनापि विष्णोर्न तत्त्वान्तरप्रापकत्वमुच्यते तदेव [illegible]
स्वयमेव हेतुरिति दिक्. २३ ननु प्रकृतिगुणत्वेन समानेऽपि कथं सत्वं मोक्षहेतुः कथमितरौ गुणौ त[illegible]हेतु सर्वमापमोहहेतुर्नेवा २
स्यादिति शंकापादुद्धृतेन गुणानां वैषम्यमुपपादयति ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननु ततोऽपुनरुत्तरत्वश्रवणात्तस्य च प्रसूयंत इत्युत्पत्तिश्रवणात्कथं स २

युगमन्वादयः कालः यस्मिन्ब्रह्मविष्णुरुद्राः सर्वे संप्रपद्यंते तेनेदं पूर्णपुरुषेण सर्वतोमुखं तरतरं तदनूपमनामयं य एतद्विदु रमृतास्ते भवंतीति विशेषणैरपि परत्व विभूतित्वं ततउत्पत्तिः पुरुषशब्दनिर्दिष्टनारायणातिरिक्तत्वस्य मोक्षहेतु मित्यादि कं सर्वे प्रमाणं संगछते किं चामतस्य चेसमनुरितिसनवद्भगवतोन्यप्रापकत्वात्केश्वत्रिमूर्त्युत्तीर्णमेव सर्वे जगत्कारणमिति नारायण न्येने नापि तद्भजनान्मुक्तिः कारणं तु ध्येय इति श्रुतिविरोधप्रसंगादिति चेदत्रोच्यते न तावत्त्रिमूर्त्यैक्यमुपपन्नं नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते नारायणाद्वादशादित्या रुद्रा वसवः सर्वाणि छंदांसि नारायणादेव समुत्पद्यते एको ह वै नारायण आसीन्न ब्रह्मा नेशानः एको ह वै नारायण आसीन्न ब्रह्मा न च शंकरः समुनिर्भूत्वा समचिंतयत् तएते व्यजायंत विश्वे हिरण्यगर्भोग्निर्यमवरुणरुद्रेंद्राः पद्मा

श्या०७ भिप द्मभवस्य महात्मा प्रजापतिः तत्र ब्रह्मा चतुर्मुखो जायत सोग्रे भूतानां मत्स्यमसृजत अन्तेत्रिशिरस्कं त्रिपादं खड्ग परशु आयुधं प्राय ब्रह्मदत्तोदयः कालस्तेषामखिलजंतवः विभूतयो हरेरेव जगजः स्थितिहेतवः कालांतकाद्याश्च समस्ता जन्तवः चतुर्विधास्तेते सर्वे जनार्दनविभूतयः आद्यो नारायणो देव स्तस्माद्ब्रह्मा ततो भवः परो नारायणो देवस्तस्माज्जातश्चतुर्मुखः तस्माद्रुद्रो भवेद्देवी क इति ब्रह्मणो नाम ईशोहं सर्वदेहिनां आवां तवंगसंभूतौ तस्मा केश वनामभाक् तवांतरात्मा मम च ये चान्ये देहिसंज्ञिताः सर्वेषां साक्षिभूतो यो न ग्राह्यः केनचित्क्वचित् एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ तदा दर्शितपंथानौ सृष्टिसंहारकारकौ विष्णुरात्मा भगवतो भवस्यामिततेजसः सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते हरोहरति तद्वश इति प्रमाणांतरानुगुण्येनांतरात्मतया आकृत्यधिकरणन्यायेन शरीरवाचिनां शरीरिपर्यंतत्वेनाप्युपपत्तेः बहुप्रमाणावगतभेदस्य निर्वाहासंभवाच्च नापि नारायणादुत्तीर्णं तत्त्वांतरमस्ति विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति पतिं विश्वस्यात्मेश्वरं यमतः वे४ समुद्रे कवयो वदंति न तस्येशे कश्चन तस्य नाम महद्यशः परात्परं यन्महतो महांतं न तत्समश्चाभ्यधिकश्च दृश्यते अग्निरवमो देवानां विष्णुः परमः अतः परतरं नान्यत्किंचिदस्ति धनंजय आभूतसंप्लवे प्राप्ते प्रलीने प्रकृतौ महान् एकस्तिष्ठति विश्वात्मा सतु नारायणः स्मृतः न परः पुंडरीकाक्षाद्दृश्यते पुरुषर्षभः परं हि पुंडरीकाक्षान्न भूतो न भविष्यति न विष्णोः परमो देवो विद्यते नृपसत्तम न वासुदेवात्पर

प्र ३
भा·पु· अपसर्वेदेहापेस्यदमाम्ननंनितपांसिसर्वाणिच यद्वदंति इत्यादि तंवहुधाजातंजायमानंविश्वंविभर्तिभुवनस्यनाभिः तदेवाग्निस्तद्वायुस्तत्सू
टी·१·७ र्यस्तदुचंद्रमाः वेदैश्चसर्वैरहमेववेद्यः योयोयांयांतनुंभक्त इत्युक्तरीत्याभागद्वयात्मकवेदस्यतत्तद्रुद्रादिशरीरकस्तदंतर्यामितयातदभि
प्रेत्यैश्वर्यफलदश्चवासुदेवएवेत्यभिप्रायेणाह वासुदेवपराइति द्वाभ्यां वेदाः पूर्वोत्तरभागद्वयात्मकावेदाः वासुदेवपराः वासुदेवःपरस्तात्पर्य
भूमिर्येषांतथाभूताः नन्वग्न्यादिदेवतोद्देशपूर्वकयागदानहोमादिकर्मप्रतिपादकवेदपूर्वभागस्यकथंवासुदेवपरत्वमित्यतआह वासुदे
दि·५ वपरामखाइति मखाअग्न्यादिदेवतापूजात्मकायागादयोवासुदेवपराः परःप्रधानतयाआराध्योयेषांतथाभूताः अग्न्यादिशरीरकतयात
द्रूपोवासुदेवएवमखैराराध्यइत्यर्थः केवलमग्न्यादिदेवतापूजनाभिमानेनयेमखाननुतिष्ठंतितेषामपितत्त[illegible]तेफलंतेरविज्ञातोपि

१३ वासुदेवपरावेदावासुदेवपरामखाः वासुदेवपरायोगावासुदेवपराः क्रियाः २८ ॥

पर्तु
वासुदेवोग्न्याद्यंतर्यामितयाराधितः प्रयच्छतीति [illegible] एवमाराधितोंतर्यामीफलंप्रयच्छतीतिभावः तथाचोक्तं अहंहिसर्वयज्ञानांभोक्ताच
प्रभुरेवच नतुमामभिजानंतितत्वेनातश्च्यवंतितइति एवंतुल्यविज्ञापनयावेदांतेषुक्वचित्क्वचित्अग्निरुद्रोपनिषत्तदादिनविधा
दिषुरुद्रेंद्राद्युपासनात्मकायोगाअपिरुद्रादिशरीरकवासुदेवविषयाइत्याह वासुदेवपरायोगा इति वासुदेव[illegible]पर्यायेषांत
इत्यर्थः प्रायशोवेदांतेषुविहितायोगावासुदेवविषयाएवभूयंतेक्वचिदायातंतोरुद्रादिविषयत्वेनप्रतीयमानाः [illegible] तत्प्रकरणग
तैर्लिंगैरुद्रादिष्वसंभाव्यमानैस्तच्छरीरकवासुदेवविषयत्वेनैवनिश्चीयंतइतिभावः एवंनिखिलनिगमवेद्योवासुदेवएवेत्युक्तं अथेत
त्सर्वेभागोपवृंहणात्मकतन्मूलकस्मृत्यादिप्रतिपाद्यः स्मार्तक्रियाराध्यश्चसएवेत्याह वासुदेव[illegible] क्रियाः सोर्सर्गास्तीनां
तुमरत्वाइत्युक्तैरत्वेवदर्थः २८ ॥

पार्थिवादिति दारुण इति पंचमी पार्थिवात्पृथिवीपरिणामरूपाद्दारुणः काष्ठात्तावद्धूमः उत्पद्यते तस्माद्धूमात्तदग्निस्त्वधाधिष्ठितः तद्धूमो ह्यग्नेः पूर्वरूपत्वात् तस्माद्धूमाद्दने नातमग्निरुत्पद्यते सच त्रयीमयः यथा पार्थिवदारुत्वेन चाविशेषेपि धूमेन [illegible]कः न तु स्वर्गसिद्ध्युपाय अग्निस्तु प्रकाशकः त्रयीप्रतिपाद्यतारूपेण स्वर्गप्रदश्चेति तयोर्दृष्टादृष्टकार्यवैषम्यासिद्धिः एवं तु प्रकृतपुरुषस्य तमसः [illegible] सात्त्विकं तु मनसा नावित्तत्वहेतुर्यत्सत्त्वं तदेव ब्रह्मदर्शनमिति कार्यवैचित्र्यं पश्यतीत्यर्थः २४ यतः सत्त्वस्यैव ब्रह्मदर्शनमाश्रय[illegible] यतश्च सत्त्वप्रवर्तकादिस्मारेव नृणां श्रेयांस्यत एव सत्त्वतनुं विष्णुमेव मुनयः भजन्ति इत्याह भेजिर इति अथ तस्मात् पूर्वकाले मुनयः विष्णु[illegible]ज स्तमोभ्यामननुविद्धं सत्वं सत्त्वं शरीरकं तत्प्रवर्तकं भगवंतमधोक्षजं भेजिरे उपासांचक्रिरे एवमिह तान्मुनीननुसरंत्ययेनदस्त्तन्न तनुं भगवंतं ये जना उपासत इत्यर्थः ते क्षेमाय कल्पंते श्रेयो युक्ता भवंतीत्यर्थः रजस्तमःप्रधानौ ब्रह्मरुद्रौ भजंतस्तु न ते क्षेमाय कल्पंते ऽपि तु तत्फलभाजो भ

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः तमसस्तु रजस्तस्मात्सत्त्वं यद्ब्रह्मदर्शनं २४ भेजिरे मुनयो ऽथाग्रे भगवंतमधोक्षजं सत्त्वं विशुद्धं क्षेमाय कल्पंते ये ऽनु तानिह २५ मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ नारायणकलाः शांता भजंति ह्यनसूयवः २६ रजस्तमःप्रकृतयः समशीला भजंति वै पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः ॥ २७ ॥ ॥ ॥

ॐ१

वंतीति भावः २५ ननु केचिद्ब्रह्मरुद्राद्युपासका अपि दृश्यंते सर्वे ऽपि विष्णुमेव किं न भजंत इति शंकायामुपासकानां [illegible]गानुसारेणोपास्यदेवताविषयकोपासनायां रुचिर्जायत इत्याह मुमुक्षव इति द्वाभ्यां मुमुक्षवः सत्त्वगुणप्रधानाः अनसूयवः घोररूपान् भूतपतीन् रुद्रादींश्च तमःप्रधानान् हित्वा शांताः शुद्धसत्त्वप्रवर्तका नारायणस्य कलाः अवतारान् भजंति अनसूयव इत्यनेन विष्णुभक्तानां देवतांतरेष्वनुपासके ऽपि चासूयाराहित्यं देवतांतरभक्तानां तु विष्णोस्तत्स्वभावासूयोत्थं चास्तीति सूचितं २६ रजस्तमःस्वभावास्तु जनाः समशीलान् रजस्तमःस्वभावान्पितृभूतप्रजेशान् रुद्रादीन् प्रजेशान् हिरण्यगर्भादीन् आदिशब्देन संकीर्णदेवताः सरस्वतीप्रभृतीश्च प्रेतान् भूतपतीश्चान्ये यजंते तेतामसा जनाः इत्युक्तं भजंति कथंभूताः श्रीः संपत् ऐश्वर्यमाधिपत्यं च प्रजाः पुत्रादयश्च तासामिच्छं तीति तथाभूताः अनेन विष्णुभक्तानामनन्यप्रयोजनत्वमनंतस्थिरफलप्राप्तिः दीन्भूतानूर

य२ ष्ठलिति२

बुसा

भा.प. तयेति तया त्मना यया विलसितेषु रचितेषु देहेषु परिदृश्यमानेषु गुणेषु गुणशब्दो लाक्षणिकः गुणकार्येषु तै[illegible]दिस्तंवपर्यंते वि
टी.२० तार्थः विज्ञानेन जीवेन विज्ञानं यस्य तज्जेते आत्मनि तिष्ठन्तो विज्ञाने तिष्ठति प्रयोगात् तेन विजृंभितः विशिष्टः तच्छरीरकं इत्यर्थः यस
विज्ञानं शरीरं इति श्रुतेः यद्वा विज्ञानरूपेण विजृंभितः भासमानः तच्छरीरतया तदंतरात्मतया च तद्रूपेण प्रकाशमानः तार्थः अंतः क३
प्रविष्टः जीवद्वारा देवादिशरीरेष्वनुप्रविष्टः गुणवानिव साक्षाद्देवादिशरीरतच्छरीरक जीवगतधर्मवानिवाभाति इत्यन्वयः स्यायमभिप्रा
यः काठिन्यवाणाविभक्तिन्नृसिंहरूपी भगवान् स्तंभतत्कांठिन्यस्थत्वादि तच्छरीरभूतजीव देहसंबंधः न तु शरीरिणो वासुदेवे इति तथा
तस्यैकस्यैव देवादिशरीरभेदेनानेकधावस्थितिश्चेति ३१ एतदेव दृष्टांतेनोपपादयति यथेति अग्निर्व्यक्तिस्थानमात्रेण निश्चलोके न तु
दि१ पादानन्निव दूर्वाद्यवदाने किंतु निमित्तं अप्ययमर्थः अग्नेः एव्वीति हि सत्त्वे क्रमः यथा दारुमयो वह्निरवहितः व्यतिरिक्तस्याभिव्यक्तः

मु

तयाविलसितेष्वेषु गुणेषु गुणवानिव अंतःप्रविष्टआभाति विज्ञानेन विजृंभितः ३१
यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ३२

ख२

कि१ एव वासनस्वयोनिषु स्वाभिव्यंजकस्थलेषु नानेवानेकधेव भाति ज्वलति अग्निरेकरूपत्वेपि तार्ण पार्णशाखादिभेद[illegible]भात्यात्मा ति एवं प्रकृति परिणा
नाम मैरूपभेदे [illegible]भिव्यक्तो जीवो ज्ञानानंदरूपत्वेनैकरूपोपि देवोहं मनुष्योहमिति देवादिभेदभिन्नोभाती त्यर्थः एवं सत्यादेजीवं वा चितच्छरीरप
रमात्मपर्यंतः भगवान् विश्वात्मा जीवशरीरकः सर्वेश्वर एक एव देवादिरूपेण नानाभातीत्यर्थः दारुषु भूतेष्विति दार्ष्टांतिके[illegible]धिष्ठेयत्ववहु कर
त्वोक्ता यथा ह्रस्वत्वस्थूलत्ववक्रत्वादिभेदश्च दारुगत एव नाग्निगतः तथा देवत्वासदुःखित्वादिभेदोपि न विश्वात्मगतः किंतु दे[illegible]दिशरीरभेद
तू३ त्व हृतं तच्छरीरकजीवगतइति सूचितं वह्निर्विश्वात्मनोपि कत्वनिर्देशेनाग्निवद्विश्वात्मनोपि सर्वत्राविस्थितत्पस्वरूपतः स्वभावतोवानावस्थानरा
पत्तिरिति सूचितं दृष्टांस्त विशेषः दारुष्वग्निः साक्षादभिव्यक्तो नाना भाति दार्ष्टांतिके जीवद्वारा देवादिरूपेण[illegible]भाति इति यावद्विशिष्टदेवा
दिशरीराणामेवाधिष्ठेयत्वात् ३२ यथा विश्वात्मनः स्वशरीरभूत प्रकृतिपुरुषद्वारा देवादिरूपेण नानाभाने एवं सुखदुःखादिभोक्तृत्वं तन्निमि

दृष्टांतपू

नतु ५ विष २ देव २ वस्तुव्यतिरिक्तवद्धि ॐ ५ स्वच्छप्राज्ञोलब्धचेकः स्वरे ६

अथ वेदांतार्थोपबृंहणार्थं तया प्रवर्त्तकपिलाद्यागमोक्तप्रकृतिपुरुषविषयकज्ञानमपि प्रकृतिपुरुषशरीरकपरमात्मविषयमेवेत्याह वासुदे
वपरं ज्ञानमिति सांख्यप्रकृतिपुरुषविषयकं वासुदेवपरं वासुदेवविषयकं विशेषणत्वेन द्वयोर्विशेष्यपर्यवसानं [illegible]र्थः कापिलादिभिस्तु तथा
न बुद्धमिति भावः तथा वेदांतार्थोपबृंहणपरमन्वादिस्मृत्युक्तकृच्छ्रचांद्रायणानशनादितपश्च वासुदेवाराधनरूपमित्याह वासुदे
वपरं तप इति किं बहुना सर्वे वैदिकाः स्मार्ताश्च धर्मास्तत्प्राप्या गतयश्च वासुदेवाधीना इत्याह वासुदेवपरो धर्मो वासुदेवपरा गतिरिति
२९ कथं वेदादीनां वासुदेवपरत्वमित्याशंकायां तदात्मनं स्वयमकुरुतेत्यादिश्रुत्यासूक्ष्मचिदचिद्विशिष्टस्यात्मनः [illegible]शरीरेणम्य
तत्र्द्रूपेण वासुदेवस्यैवावस्थानाद्वासुदेवात्मकत्वं स्वभावादित्याह स इति द्वाभ्यां अग्रे सदवं प्राक् स एव वासुदेव एवेत्यामे[illegible]विभागानर्ह
सूक्ष्मचिदचिच्छरीरकतयावस्थित इत्यर्थः एवकारेण तच्छब्दपरामृष्टभर्गवाचकवासुदेवशब्दाद्यवार्थेन चेदं लक्ष्यं यच्चादं परिदृश्यमानं जगद्
वै

वासुदेवपरं ज्ञानं वासुदेवपरं तपः वासुदेवपरो धर्मो वासुदेवपरा गतिः २९ ॥
स एवेदं ससर्जाग्रे भगवानात्ममायया सदसद्रूपया चासौ गुणमय्यागुणो विभुः

ग्रः स इ॰ः प्राक् स एवासीदित्यधाहारः सदेव सोम्येदमग्र आसीदितिस्थानप्रमाणात् एवं चेदं दृश्यमनेन नामरूपविभागभिन्नं जगन्निर्दिष्टप
तस्य वासुदेवरूपेणावस्थानोक्त्याविपदादिवत्स्तनरश्चावनेकैवकारप्रयोगेण च प्रकृतिं पुरुषं चैव विद्ध्यनादी [illegible]ति स्मृत्युक्तरोधाद्ध
प्रधानकर्मविभागादिति चेन्नानादित्वादित्युक्तन्यायेनाकृताभ्यागमकृतविप्रणाशादिदोषप्रसंगाच्च स[illegible] [illegible]विशिष्टसंलब्ध
स इ॰ प्रागेवमवस्थितो भगवानात्मनः स्वस्य मायया गुणमय्यासत्त्वादिगुणप्रचुरतया सदसद्रूपया महदादिदृश्यमानकार्यकारण
रूपेण परिणमय्य तया विभुर्व्यापकः सदसद्रूपं परात्मतया तु प्रविष्ट इत्यर्थः अथाप्यगुणः व्याप्यगतदुःखरहितः इदं जगत्ससर्ज २८
३० एवं समष्टिसृष्ट्यवस्थाविशिष्टतयां तद्रूपेणावस्थानमुक्तं अथोभयावस्थप्रकृतिसंसृष्टजीवशरीरकतयांतर्यामितया तद्रूपेणवा
सुदेवस्यैवावस्थितिमाह ॥ मितया १ च १

भा.प्र. एकैक एव जीवः क्रमेण देवमनुष्यादिशरीरग्रहणपादानः देवोऽहं मनुष्योऽहमित्याभिमानी एवमभिप्रायात् नहि ईदृशं तेपि तात्पर्यं स्ववहेः पार्णत्वे
टी.२१ न भानुमस्ति ३२ असौ जीवः गुणमयैः सत्त्वादिगुणत्रयात्मभगवन्मायापरिणामरूपैः पृथिव्यादिभूतगंधादितन्मात्रश्रोत्रेन्द्रियकर्मेन्द्रियान्
तःकरणैर्भावैः पदार्थैः स्वनिर्मितेषु स्वकर्मानुसारेण निर्मितेषु भूतेषु भूतेषु देवादिशरीरेषु निर्विष्टः गुणान् शब्दादिविषयान् भुंक्ते तन्निमि
त्तानि कर्माणि च पुण्यापुण्यरूपाणि करोतीति च विवक्षितं वेदितव्यं यद्वा तया विलसितेष्वित्यादि [illegible] परमात्मेव प्रतिपाद्यते तद
विज्ञाने तस्य संकल्परूपज्ञानेनेत्यर्थः पुमान् परमपुरुषः गुणान् भुंक्ते इत्यस्य लीलास्वरूपान् गुणान् भुंक्ते इत्यर्थः ३३ तदेवं पुंसामेकान्त
तः श्रेयस्तन्मे शंसितुमर्हसीत्यस्योत्तरमुक्तं अथ यत्पृच्छत जानासि भद्रं ते इत्यादिनाश्रीकृष्णावतारं तच्चरित्रं [illegible] तदवतारतच्चरित्रादिकं च प
ष्टं तत्र श्रीकृष्णावतारं तच्चरित्रादिकं विशिष्य दशमैकादशस्कंधाभ्यां सर्वावतारांस्तच्चरित्राणि च विशिष्य तत्र तत्र तत्तृतीयादिषु विवक्षुस्ताव

भावयत्येष सत्त्वेन लोकान्वै लोकभावनः लीलावतारानुरतो देवतिर्यङ्नरादिषु ३४ इति
श्रीमद्भागवते महापुराणे प्रथमस्कंधे प्रश्नोत्तरकथनं नाम द्वितीयो ऽध्यायः २ रम

समासतः सर्वावतारसाधारणं प्रयोजनमाह भावयतीति एष सर्वेश्वरो लोकान् भावयत्कमेव रूपं श्वेतनात् जीवयितुं सत्त्वेनोपलक्षितः शुद्धसत्त्वम
स्लि२ तिर्यङ्नरसुरादिषु लीलावतारेष्वनुरतो भवति भावयतीति पाठे लोकभावनो लोकपालः एष सर्वेश्वरः तिर्यगादिष्ववतारः प्र[illegible] रादिषु मध्ये
लीलया अवतारेष्वनुरतः लीलावतारे भक्तेष्वनुरतो वा सत्त्वेन लोकान्भावयति त्रायति साधुपरित्राणं धर्मस्थापनं [illegible] रवतारस्य प्रयोजनमिति पः
३४ इति प्रथमे टीकायां द्वितीयः २ तदेवं प्रथमे ध्याये प्रश्नः कृतः द्वितीये तु सर्वप्रवर्तकभगवद्भक्ते रेव मोक्षप्रदत्वात् [illegible] यप्रबंध एव
श्रोतव्य इति स्थापितमवतारप्रयोजनं चोपक्षिप्तं अथ भगवदवतारविशेषास्तच्चरितानि विस्तरेण [illegible] तात्पर्येण भगवतोनेकेवता
राः संति इति प्रतिपाद्यते तृतीयाध्याये जगृहे इत्यादिना तत्रावतारास्त्रिविधाः अनुप्रवेशावताराः [illegible] ते ध्रुक मेहेतुत्वा(
विशेषाद्भयत्रावतार प्रादुः प्रयोगः द्विविधानयितात्वकुं वद्गपयोगित्वेन प्रथमं चेतनमिश्रं प्रकृतिप्राकृतजातमेकं [illegible] समयम ॥ ॥ ॥

असाविति असौ विश्वात्मा गुणमयैः सत्वादिगुणपरिणामरूपत्वेन तत्वरूपैर्भूतसूक्ष्मादिरूपैर्भावैः पदार्थैस्तैः भूतानि खादीनि सूक्ष्मा
णि गंधादीनि इंद्रियाणि श्रोत्रादीनि ज्ञानेंद्रियाणि वागादीनि कर्मेंद्रियाणि पाय्वादीनि चात्मांतःकरणं जी... गुणभिः स्वेनैव कर्त्रा निर्मि
तेषु भूतेषु देवादिषु निर्विष्टः जीवद्वाराऽनुप्रविष्टः तद्गुणान् खादिभूतगुणान् गंधादीन् विषयान् भुंक्ते जीवद्वारा विषयान् भुंक्ते नतु स्वतः इत्यर्थः
भोक्तृत्वसमव्याप्तं कर्तृत्वमप्यत्र विवक्षितं जीवद्वारा पुण्यापुण्यरूपाणि कर्माणि च करोतीत्यर्थः अत्र विश्वात्मेत्युक्त... भोक्तृत्वं कर्तृ
४ त्वं च प्रयो...कत्वेन विवक्षितं ३३ यद्वा सत्वं रजस्तम इति प्रकृतेर्गुणाः इत्यादिना सर्वकारणात् परमपुरुषाद्देवोपास्यमानान्न्यूणां श्रेयः
३ सिकारणत्वेनोपास्यं मोक्षदत्वादीनां कारणं तु ध्येयः अन्नतमे षसेतु ...रित्यादिप्रमाणैरेकनिष्ठत्वावगमात् ननु ब्रह्मरुद्रादिभ्यः तेषां कर्म
वश्यत्वसुखदुःखादिभोक्तृत्वादिनोपासकतुल्यत्वादि सूचितं अथ तदुपपादनाय सर्वजीवानां परमपुरुषसृष्टकर्मानुगुणकारणत्वं लोकरी
संबंधं तत्प्रयुक्तं कर्तृत्वमेषां कर्मवश्यत्वप्रयुक्तत्वेनोपाधिकत्वं स्वभावतस्तत्संनेकाकारत्वं चेत्याह असावित्यादिचतुर्भिः यथाक्रमेणार्थः तथे सर्वे

असौ गुणमयैर्भावैर्भूतसूक्ष्मेंद्रियात्मभिः स्वनिर्मितेषु निर्विष्टो भुंक्ते भूतेषु तद्गुणान् ३३

ति तथाऽऽत्मा यथा विलसितेषु रचितेषु गुणगुणकार्येषु ब्रह्मादिशरीरेष्वंतः प्रविष्टो जीवइति प्रोक्तः प्रमाणैरूपलोकादयकर्षो
वा विज्ञानेन स्वधर्मभूतज्ञानेन विजृंभितः देहमात्मत्वेनाभिमन्वानः इत्यर्थः गुणवानिव देवत्वादिधर्मवानिव भाति देवोहं मनुष्योहं कृशोहं स्थू
लोहमित्यभिमन्यत इत्यर्थः इव शब्देन वस्तुतो देवविलक्षणस्तद्गतधर्मैरस्पृष्ट एवेति सूच्यते ३१ तदेवोपपादयति यथेति यथैक एव वह्निः स्व
योनिषु स्वाभिव्यंजकस्थानेषु तृणपर्णादिष्वभिव्यक्तो नानेव भाति तार्णत्वपार्णत्वादिभेदेन भाति इव शब्देन वस्तुतो भिन्नत्वेन रूपेणैकरूप ए
व एवं विश्वात्मा विश्वस्याचेतनजातस्यात्मा प्रमाणजीवोपि भूतेषु देवादिशरीरेषु नानेव भाति देवोहं मनुष्योहमित्यादिरूपेण नाना भाति ज्ञा
नैकाकारेणैकरूप एवेत्यर्थः प्रमानिति जात्यभिप्रायक एकत्वनिर्देशः एकोग्निर्दिः सुप्तं पन्नगु... इत्यत्र व्रीहिशब्दवत् एवं च जी
वैकत्वभ्रमो न कार्यः इष्यन्तेपि यद्युक्त्वेनैकत्वेपि न ह्यक्तिर्भेदोऽभिप्रेतः न चैवमेकैकस्य जीवस्य देवादिशरीरस्य समुपपन्नानां प्रतिभानाभावः इति वाच्यं

मे

भा॰प्र॰ टी॰ २२

एतद् अनिरुद्धाख्यं रूपं नानाविधानामवताराणां निधानं मूलकारणं बीजं कृत्स्नजगत्सृष्टचतुर्मुखोत्पत्तिस्थानत्वादिति भावः अव्ययं षड्विधविकार
रहितं मनेनाप्राकृतत्वमुक्तं यस्येति यस्य भगवतो निरुद्धस्यांशांशेन शरीरभूतचिदचितत्वैकदेशेन देवादयः सृज्यंते ५ स देवः परमपुरुष एव ब्रह्मा
तु मुख्य शरीरकः सन् प्रथमं कौमारं सनत्कुमारादिसर्गमास्थितः सनकादीरूपेणावतीर्णः इत्यर्थः अखंडितं निर्विघ्नं ब्रह्मचर्यं अचरत् दुश्चरं तस्करत्वात् ते भग
वद्रूपा सनंदनकारते चतुष्कुमाराः प्रथमावताररूपाः प्रथममिति विशेषणाद्द्वितीयमित्यादिना एकैकस्मे चतुष्कुमारा अनुप्रवेश्यावताररूपाः तथा च तुर्
खोपि ब्रह्मरूपधरः ब्रह्मा नारायणात्मक इत्यादिभिः सृष्ट्यादिकाले तदात्मकतया योगिभिः ध्येयं सत्ववचनात् भगवतांशेनैकेन चतुर्भ्यो ब्रह्मत्वं संपा
यंता जगदंते एवं स्थिताः प्राणिनः कर्मजनितसंसारवशवर्तिनः पतन्तस्तेन तेषां नेष्वाने ध्यानितानुपकारकाः अविद्यांतर्गताः सर्वे ते हि संसारेगाच
राः पश्चादुद्भूतबोधास्तेन नैवोपकारकाः नेसर्गे कोन वैवोधस्तेषामप्यस्मतामत इति च तुर्मुखसनकादीनां जगदंते वर्तिनामविद्यावेष्टितत्वे

एतन्नानावताराणां निधानं बीजमव्ययं यस्यांशांशेन सृज्यंते देवतिर्यङ्नरादयः ५ स एव प्रथमं देवः कौमारं
सर्गमास्थितः चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितं ६ द्वितीयं तु भवायास्य रसातलगतां महीं उद्धरिष्यन्नुपादत्त
यज्ञेशः सौकरं वपुः ७ तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥ ८ ॥

न स्तु भाष्ययत्नान्हंतास्मत्कावधानामेव सतां पश्चाद्योगेनोद्भूतबोधानां स्वस्वरूपज्ञानां च सतः शुद्धिविरहेण मुमुक्षूपास्यत्वनिषेधात् सृष्टिंत
करिष्यामि त्वामाविशय प्रजापत इति श्रीजन्मरहस्यवचनैकार्थ्याच्च तदेवं चतुर्मुखसनकादयः भगवदनुप्रवेशादावि[illegible] :मञ्जेत्युक्तं भवति ब्र
ह्मत्वं यं च वारेष्ववतारप्रयोजनमुक्तमेवमुत्तरत्रापि द्रष्टव्यं ६ अथ वराहावतारमाह द्वितीयं त्विति अस्य जगतः भवाय अभ्युदया रसातलगतां
महीं पृथ्वीमुद्धरिष्यन् यज्ञेशो भगवान् द्वितीयं सौकरं वाराहं वपुः अधत्त जगद्ग्रहे वराहो द्वितीयोऽवतार इत्यर्थः अयं च स्वेन रूपेणावतारः यज्ञेश इत्य
नेन यज्ञाराध्यत्व तत्फलदत्व तच्छरीरकत्वान्युक्तेः वपुरूपादत्तेति वपुर्मात्रपरिग्रहोक्तेः अस्य भवायेति केवलसा[illegible]र्योक्तत्वं च ७ नार
दावतारमाह तृतीयं वपुरूपादानं मृषिसर्गः ऋषिरूपजन्मेत्यर्थः तत्तृतीयेवतारे स भगवान्देवर्षित्वं नारद[illegible]तात्वं जीवमनुप्रविश्य
त्यर्थः सात्वतं तंत्रं पंचरात्रशास्त्रमाचष्ट प्रोवाच यत्र वर्तनया मासेत्यर्थः तंत्रं विशिनष्टि यतस्तस्मात् कर्मिणां निरतधर्म[illegible]ने धर्मविरहं प्रवृत्ति

८ [illegible]

परं चेति रूपद्वयं भगवतोस्तीति विवक्षन्पूर्वं प्रकृतिप्राकृतात्मरूपपरिग्रहमाह जगृह इति पुरुषाः क्षेत्रज्ञास्तत्संबंधि पौरुषं तन्निमित्तमित्यर्थः एकादशेन्द्रि
य पंच भूतात्मकाः षोडश कला यस्मिंस्तत्तेषां महदादिभिः संभूतं रूपं तु कारणं समष्टितत्त्वजातमिह रूप पदे न [illegible] गुणैः महदा यस्य महदादिभिः
संपादयित्वा महदादिभिः संभूतमित्युक्तं लोकसिसृक्षया जगृहे ब्रह्माण्डं तद्वर्त्ति कार्यजातसिसृक्षया रूपं जगृहे इत्यर्थः १ [illegible] स्त्राधोसारणं रूपना
ह यस्येति प्रथमस्य यस्येति शब्दस्यार्थः स तद्वा इति तच्छब्देन परामृश्यते द्वितीयं तु यस्येति पदं चतुर्मुखपरं चतुर्मुख [illegible] देवमनुष्या
दि सृष्टिः पुराणांतरे दृष्टा यस्यावयवसंस्थाने ये शरीरावयवपरिणामैर्देवमनुष्यादिलोकविस्तारः स ब्रह्मा विश्वसृजां मरीच्यादीनां पतिः य
स्यांभसि शयानस्य योगनिद्रां वितन्वतः अनिरुद्धस्य नाभिहृदंबुजादासीत्तद्भगवतो रूपमूर्जितं विशुद्धं सत्त्वम् [illegible] लोकद्वयसेकवा

॥सूत उ॰ जगृहे पौरुषं रूपं भगवान्महदादिभिः संभूतं षोडशकलमादौ लोकसिसृक्षया १ यस्यांभ
सि शयानस्य योगनिद्रां वितन्वतः नाभीहृदांबुजादासीद्ब्रह्मा विश्वसृजां पतिः २ यस्यावयवसंस्था
नैः कल्पितो लोकविस्तरः तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितं ३ पश्यंत्यदो रूपमदभ्रचक्षुषा सहस्रपा
दोरुभुजाननाद्भुतं सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यंबरकुंडलोल्लसत् ॥ ४ ॥

कांतस्य रूपस्य ज्ञानदृश्यत्वमपरिच्छेद्यत्वं सर्वावतारनिदानत्वं चाह पश्यंतीति सार्द्धेन यद्वा जगृह इत्यादिश्लोकानामयमर्थः अनंतरोक्तानुप्रवेशरूपेणास्मे
न रूपेण चक्षुर्विधेवतारेऽनन्व प्रथमस्य देवादिष्वनुप्रवेशरूपत्वात्तत्र वक्तव्यांशाभावात्स्वेन रूपेणावतारप्रयोगि दिव्यमंगलविग्रहे योगेऽच्यते यस्यानिरु
द्धस्यावयवसंस्थानैः शरीरभूतप्रकृत्येकदेशपरिणामैर्लोकविस्तारः कल्पितस्तस्य भगवतो रूपं शुद्धसत्त्वमयमूर्जितं तदुत्कृष्टमित्यर्थः ३ पश्यंतीति अ
दृष्टात्तदनिरुद्धाख्यं रूपमदभ्रचक्षुषाऽनन्यज्ञानेन मनसा पश्यंति मनसा तु विशुद्धेन दृश्यते [illegible] त्वयया उक्तास्तत्त्वदर्शिभिरित्याद्युक्तरीत्या योगपरिशुद्ध
मनसा पश्यंतीत्यर्थः प्रत्येकं सहस्रसंख्याकैः पादादिभिरद्भुतं तथा प्रत्येकं सहस्रमूर्धादयो यस्मिंस्तत् तत्र श्रवणं श्रोत्रं सहस्रेणमौलिभिः कि
रीटैरंबरैर्वस्त्रैः कुंडलैश्चोल्लसद्भ्राजमानं रूपं भवतीति ४

पासू.स्कं २

भा. पु. टी. २३

रूपमिति चाक्षुषांतरं चाक्षुषमन्वंतरं तत्र यः संप्लवः संप्रलयः तस्मिन्स भगवान्मात्स्यं दशमं रूपं जगृहे अवतारप्रयोजनमाह नाव्यारोप्येति वैवस्वतं मनुं वैव-
स्वतमनुरूपेण जनिष्यमाणं सत्यव्रतं महीमय्यां पृथ्वीरूपायां नावि आरोप्य अपाद् ररक्ष १५ सुरेति एकादशे अवतारे विभुर्भगवान् सुरासुराणाम्
उदधिं मथ्नतां तार्थं मंथनार्थं सतां कमठरूपेण पृष्ठे मंदराख्यमचलं दध्रे धृतवान् १६ द्वादशमं वपुस्तु धान्वंतरं त्रयोदशमं [illegible] प्रवेशाय मोहिनी रूपेण वपुः ब्रह्मा
योदशमं रूपं तु पन्मोहिन्या रूपयाऽन्यान् सुरान् मोहयन् सुरानमृतमपाययत् तदेव मोहिनीरूपं त्रयोदशमित्यर्थः १७ नारसिंहे चतुर्दशं रू-
पं बिभ्रदूर्जितं बलिष्ठं दैत्यं हिरण्यकशिपुं वक्षसि करजैर्नखैर्ददार यथा कटकृत् दास्तरणं कटं कर्तुं एरकां तृणं [illegible] विदारयति

रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुं १५ सुरासुराणामुदधिं मथ्नतां मंदराचलं दध्रे
कमठरूपेण पृष्ठ एकादशे विभुः १६ धान्वंतरं द्वादशमं त्रयोदशममेव च अपाययत्सुरानन्यान्मोहिन्या मोहयन् स्त्रिया १७ चतुर्दशं
नारसिंहं बिभ्रद्दैत्येंद्रमूर्जितं ददार करजैर्वक्षस्येरकां कटकृद्यथा १८ पंचदशं वामनकं कृत्वागादध्वरं बलेः पदत्रयं याच-
मानः प्रत्यादित्सुस्त्रिविष्टपं १९ अवतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृपान् त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं २० त-
तः सप्तदशे जातः सत्यवत्यां पराशरात् चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः २१ ॥ ॥

दतुः १८ वामनकं वामनाख्यं पंचदशं वपुः कृत्वा धृत्वा बलेरध्वरं यज्ञवाटमगात् जगाम प्रयोजनमाह त्रिविष्टपं पुनः आदित्सुः इंद्राय दातुमि-
च्छुः पदत्रयं पदत्रयव्याजेन त्रिलोकीं याचमानः याचिष्यमाणः अध्वरमगादित्यन्वयः १९ षोडशमेवतारे भार्गवरूपेण [illegible]
पान्कार्तवीर्यादीन्ब्रह्मद्रुहः ब्राह्मणकुलद्रोहकान्नृपान् कुपितः त्रिःसप्तकृत्वः एकविंशतिवारं महीं निःक्षत्रां चकार बीज [illegible] करोत्
२० ततः सप्तदशेवतारे पराशरात्सत्यवत्यां जातो वादरायण इति प्रसिद्धः अल्पमेधसः कृत्स्नवेदग्रहणासमर्थान् पुंसो दृष्ट्वा
न्मानुषान् पुंसः दृष्ट्वा वेदमेवतरुस्तस्य शाखाः ऋग्यजुःसामादिभेदेन तदवांतरभेदेन च [illegible] २१ ॥ ॥
४१

अपेक्ष्यं तन्निश्चयम्

तुर्ये इति धर्मकलासर्गे धर्मात् स्त्रियां कलासर्गे देहजन्मरूपे च तुर्यावतारे नरनारायणाख्यावृषी भूत्वा आत्मोपशमेन ... सह तेनोपेतं दुश्चरं

दुस्तरं अन्यैर्दुश्चरं तपश्चकार ९ पंचम इति पंचमोवतारः कपिलो नाम कपिलाख्यः सिद्धानामीशः यथार्थप्रसंधानयोगेन सिद्धानां स्वस्वरूपसं

पन्नानामीशः कालेन प्रवर्तेपि तत्तद् रहितेन कालेन विप्लुतं तिरोहितं सांख्यं कपिलमतं तत्त्वानां प्रकृतिमहदादीनां ग्रामस्य कलापस्य निर्णयो यथा

थात्म्यनिर्णयो यस्मात् यासुरये प्रोवाच आसुरिर्नाम सिद्धेषु प्रधानस्तस्मै १० षष्ठमिति अत्रेरपत्यत्वं प्रति वृतः मम पुत्रो भव इति प्रार्थनाव

तइत्यर्थः अनसूयया भार्यया प्राप्तः तस्याः पुत्रो दत्तात्रेय आख्यो भूत्वेत्यर्थः अलर्काय प्रह्लादादिभ्यश्चान्वीक्षिकीमध्यात्मविद्यामूचिवान्

तेषष्ठमवतारं विद्यादिति पन्नमध्याहारेणान्वयः षष्ठं षष्ठरूपं लिप्तवान् ११ तत इति ततः सप्तमेवतारे रुचेस्तद्भार्यायामाकूत्यां यज्ञो जायतेत्

तुर्ये धर्मकलासर्गे नरनारायणावृषी भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः ९ पंचमः कपिलो नाम सिद्धेशः कालविप्लुतं प्रो

वाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं १० षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोनसूयया आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ११

ततः सप्तम आकूत्यां रुचेर्यज्ञोभ्यजायत स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरं १२ अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः दर्शयन्व

र्त्म धीराणां सर्वाश्रमनमस्कृतं १३ ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः १४॥

च यज्ञ इति प्रसिद्धः स यज्ञः यामआद्यो येषां तैः सुरगणैः सह स्वायंभुवमन्वंतरमपात् पालयामास १२ अष्टमेवतारे उरुक्रमो भगवान्नाभेः

स्वायंभुवपौत्रस्य भार्यायां मेरुदेव्यां जातः स च ऋषभाख्यः धीराणां योगीश्वराणां वर्त्म तु चेयं धर्ममार्गं दर्शयन् दर्शयितुं जात इत्यर्थः वर्त्म

विशिनष्टि सर्वैराश्रमैराश्रमस्थैर्नमस्कृतं पूजितं स्वाश्रयधर्मवर्त्मभ्यः उत्कृष्टमिति भावः १३ ऋषिभिरिति हे द्विजा वेनं हतवद्भिरृषिभि

र्याचितः जगत्पालनार्थं याचितो भगवान्नवमं पार्थिवं पृथोः संबंधि वपुर्भेजे प्राप्तः अंशेनानुप्रविश्य पृथ्व्याख्ये जीवानुप्रवेशेन पृथुरूपेण

वतीर्ण इत्यर्थः हे विप्राः शौनकादयः स इमां पृथ्वीं गोरूपं धृतवतीं ओषधीर्दुग्धदुदोह स उ भाव आर्षः यतो दुग्धतेन कारणेन स पृथुरुशत्तमः सर्वे

भा॰ प्र॰ एतद्वचनार्थमेवाह एते इति एतेस्वषिप्रभृतयस्तुये चोक्ता निरूपितास्तस्यांशकलाः अंशांशसंभूताः कृष्णस्तु भगवान्स्वयमिति श्रीकृष्णस्य पू
टी॰ २४ र्णावतारत्वमुक्तं उदाहृतभगवद्वचनेन विभूत्यादिमतां सत्तानाममत्वेनानुनिर्दिष्टश्रीकृष्णस्य तेजोंशसंभवत्वं श्रीकृष्णस्य पूर्णत्वं स्थापितं अत्रा
पि भगवानित्यनेन पूर्णषाड्गुण्यत्वमवगतं यद्यप्यत्रैतद्वित्यनेन पूर्वोक्तेषु हिरण्यगर्भसनकादिषु केषांचिद्वराहनारायणमत्स्यकूर्ममो
हिनीनृसिंहवामनश्रीरामावताराणां पूर्णानां सत्वेपि त्रिन्यायेन सर्वेप्यवताराः परमरूपे तेन तत्र पूर्णत्वं नाम षाड्गुण्यपूर्णत्वेन रूपेण सा
क्षादवतीर्णत्वं अंशांशसंभूतत्वं नाम तत्तत्कार्यानुरूपमतयावस्थितस्य षाड्गुण्यपूर्णस्य भगवतः केनाप्यैश्वर्यवीर्यादिगुणलेशेन जीवद्वारादि
भूतेन विशिष्टतया संज्ञातत्वं निरंशस्य ब्रह्मस्वरूपस्यैकदेशभेदनाविर्भावासंभवात् ननु धर्मिस्वरूपैकदेशवाचिनांशशब्दस्य कथं गुणपर
त्वमितिचेन्न अपृथक्सिद्धविशेषणस्यापि प्राणादिवाच्यत्वाद्विशिष्टवस्त्वेकदेशत्वस्यैवांशपदप्रवृत्तिनिमित्तत्वाद्विशिष्टवस्त्वेकदेशत्वं चैव

एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयं इंद्रारिव्याकुलं लोकं मृडयंति युगे युगे २८ जन्मगुह्यं भगवतो य एतत्प्रयतो नरः सायंप्रा
२४ तर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते २९ एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः मायागुणैर्विरचितं महदादिभिरात्मनि ३०

षेषणविशिष्टयोरेकदेशतयाप्येवं प्रतिबोधाराह अवताराणां पूर्णत्वं तु तत्र तत्र गुणादिभ्य एवावगंतव्यं [illegible] अवतारसाधारणं प्रयो
जनमुपसंहरति इंद्रेति इंद्रारिभिरसुरादिभिर्व्याकुलमुपद्रुतं लोकं युगे प्राप्ते युगे मृडयंति २८ अवतारकीर्तनादिफलमाह जन्मगुह्यमि
ति यः कश्चिन्नरो भगवतः एतज्जन्मगुह्यमवताररहस्यं सायंप्रातः समाहितचित्तो भक्त्या गृणन्कीर्तयन् दुःखजालाद्विमुच्यते संसा
रान्मुक्तो भवतीत्यर्थः जन्मगुह्यमित्यनेन भगवज्जन्मनो जीवजन्मवत्कर्ममूलत्वमपि तु स्वसंकल्पमूलमित्यभिप्रेतं २९ तदेवदर्शयितुमन
तर ३ रूपांशसंगात् केवलमवतीर्णमेव रामकृष्णाद्याख्यं भगवतो रूपमिति पुनरपि [illegible] विराडाख्यस्थूलमहदादिकृतं जगदपि तद्रूप
मित्याह एतद्रूपमिति चिदात्मनः ज्ञानस्वरूपस्यात एवारूपस्याप्राकृतरूपस्य भगवतः मायागुणैः [illegible] महदादिभिरात्मन्याधार
भूते स्वस्मिन्नेव तिष्ठति [illegible] जगदात्मकं रूपं विरचितं आत्मनीत्यनेन रूपेण सह जगतो भगवदात्मकत्वं [illegible] शरीरात्मनाधारत्व

२१ शरीरस्य।

नरदेवत्वमिति अतः परम् आद्यपोतावतारे सुरकार्यं राघवरूपं कर्तुं २१ या नरदेवत्वं चक्रवर्तित्वं प्राप्तः [illegible] इत्यर्थः समुद्रविष
यको निग्रहः आदिर्येषां तानि वीर्याणि कर्माणि चक्रे २२ एकोनविंशे विंशतितमे चावतारे भगवान् वृष्णिषु यादवेषु रामकृष्णाविति जन्मनी रामः ब
लरामः कृष्णश्चेति द्वे जन्मनी प्रादुर्भावरूपे प्राप्य भुवो भारमहरत् रामस्त्वेकोनविंशः कृष्णस्तु विंशतितमोऽवतार इत्यर्थः २३ ततः कलौ प्रवृत्ते स ३
प्रवृत्ते सति सुरद्विषाम् अर्हतानाम् असुराणां वा संमोहनार्थं भगवान् कीकटेषु जिनसुतः [illegible] विष्णुर्नाम्ना बुद्ध इति प्रसिद्धः अयमेकविंशोऽवतारः २४
अथासौ जगत्पतिः भगवान् युगयोः कलिकृतयुगयोः संध्यायां संधौ राजसु दस्युप्रायेषु चौरप्रायेषु केवलधर्मवत्सु [illegible] विष्णुयश

नरदेवत्वमापन्नः सुरकार्यचिकीर्षया समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं २२ एकोनविंशे विंशति
तिमे वृष्णिषु प्राप्य जन्मनी रामकृष्णाविति भुवो भगवानहरद्भरं २३ ततः कलौ संप्रवृत्ते संमोहाय सुरद्वि
षां बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति २४ अथासौ युगसंध्यायां दस्युप्रायेषु राजसु जनि
ता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः २५ अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः यथाविदासि
नः कुल्याः सरसः स्युः सहस्रशः २६ ऋषयः पितरो देवा मनुपुत्रा महौजसः कलाः सर्वे हरेरेव सप्रजापतयः

सो जनिता विष्णुयशसः पुत्ररूपेणावतरिष्यति स च नाम्ना कल्किरिति प्रसिद्धो भविष्यति २५ दिङ्मात्रमेतद्दर्शितमित्यभिप्रायेणाह अवतारा इति हे द्वि
जाः सत्त्वनिधेः सत्त्वमूर्तेर्भगवतो नितरां हादेतेऽवताराः असंख्येयाः स्युः प्रवर्तन्ते यथा विदासिनोऽक्षय्या [illegible] कुल्याः सरःसंदेहे
तद्वत् कुल्याः क्षुद्रनद्यः २६ केऽवतारा इत्याह ऋषय इति ऋषयो मन्वादयो वसिष्ठादयो [illegible] केवलं [illegible] प्रीताः अन्ये
दयः देवा इन्द्रादयः मनुपुत्राः प्रियव्रतादयः महौजसः महाप्रभावाः सप्रजापतयः दक्षादिभिः सहिताः प्रजापतयः ब्रह्माद्यर्थः तत्र ते सर्वे हरेरेव कलाः अंशाः
भगवदंशेनैव सम्भूता इत्यर्थः तथा चोक्तं भगवता यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवमिति २७ ॥ ॥

भा.प्र. टी.२५ तर्हि केनोपायेन प्रकृतिसंगमत्वकृपुनर्भवस्य निवृत्तिः कीदृशं वा निवृत्तं पुनर्भवं जीवस्वरूपमित्यत आह यत्रेति द्वाभ्यां सदसद्रूपे कार्यकारणे
ये अस एवेदमग्र आसीत्ततो वै सदजायत इति प्रयोगात्कारणावस्था च प्रलयदृश्या ततश्चायमर्थः यत्रात्मनीमे स्थिते सद्रूपे उत्प
त्तिविनाशाविति अर्थः अविद्ययात्मनि कृते आरोपिते च तस्मिन्नात्मनि स्वसंविदा स्वरूपस्य रकारणत्वविज्ञानेन आत्मनि प्रति
षिद्धे निरस्ते भवतः अनेन स्वसंविदैव पुनर्भवनिवृत्तिरिति दर्शितं इतिशब्दः प्रकारवाची इत्येवंविधं स्वसंविन्निरोधो यः सम्यक् ज्ञानमित्य
र्थः अत एव दर्शनं ज्ञानं प्रकृतिसंगविमुक्तं केवलपरिशुद्धजीवात्मस्वरूपज्ञानं यत्तद्ब्रह्मणोऽनेन सहत्वाद्ब्रह्मशब्दवाच्यं ज्ञानात्मकं रूपं
ब्रह्मभवनायकल्पते ब्रह्मणो हि प्रतिष्ठाहमिति भगवता तस्यापि ब्रह्मशब्दप्रयोगाद्दृश्यते ३३ यदीति यदा दिव्यदारुजादेव्या...

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनं ३३
यद्येषोपरता देवी माया वैशारदी मतिः संपन्न एवेति विदुर्महिम्नि स्वे महीयते ३४

ये स्वरूपेण त्रिगुणा एषा माया तन्मयत्वात्मतिरभिमतिर्देहात्माभिमानात्मिका चोपरता निवृत्ता भवति उपरति...
...तीर्यागो रनाद्यं तर्वृत्तिर्हि मायाशब्दवाच्यायाः प्रकृतेर्नित्यत्वावगमेन विनाशायोगात् एवमस्य तदेत्यादि तदैव संपन्ने... आसं...
केवलस्वकीयमहिम्नि गुणाष्टकरूपे मुक्ते स्वस्वरूपात्मके महिम्नि महीयते महः पूजायामिति धातोः स्वरूपेण संज्ञया... ऋतिर्मा... महि
म्नि गुणके स्वयं संपन्नत्वात्स्वास्यार्थः महीयत इति निर्विशेषत्वेन प्रकृतिसंबंधनत्वकार्यनिवृत्तावाविर्भूतगुणः... यस्य...
लब्धाहेतुना परमव्योमवासि निर्वृत्तमतो भवतीति विदुः मुक्तात्मस्वरूपयाथात्म्यविदः यद्वा संपन्न इति परमात्मसंबंधेन स्वरूपस्थितिर्वेदे
ऽभवन्परमव्योमनिवासि वृद्धमतो वति एतेऽन्यपि अपहतपाप्मत्वादिगुणाष्टकमहिम्नः प्रकाशयंते वजन्मांतरं... स्वर्गादि वेतिचिर
भाविकत्वावगमात्स्वमहिम्नीत्युक्तं भवति ३४ तदेवं प्रसक्तानुप्रसक्तं व्याजी... तं अथ... वसंतं व्रतं विभ्रं ।।

एवं जगदंतर्देवमनुष्यादिशरीराणामपि भगवद्रूपत्वे सति जीवानां केवलं देवोऽहं मनुष्योऽहमित्यभिमा... क एवेत्याह यथेति यथा मे
घसमूहान् नभस्याकाशः बुद्धिभिराकाशव्याप्यत्वाविद्धिरारोपितः यथा च पार्थिवाः संबंधी रेणु ... रंजितो रेणुव्याप्यत्वाविद्धिरारो
पिता एवमबुद्धिभिः प्रसंगात्स्वव्याप्यत्वाविद्धिर्द्रष्टरि जीवे दृश्यपत्वमारोपितं देवादिशरीरजातमहं ममाभिमानविषयः नाणि
र्दितात्मनां दुःखैराध्यात्मिकादिभिः पीडितः आत्मा मनो येषां तेषां यत् क्लेशानि र्वाणं क्लेशा आध्यात्मिकादयः निर्वाप्यन्ते येन अन्यथा पापा
नां तोरणानि निर्वाप्यते तथा विधं यथा स्यादेनि उशन्ति वा ईर्यते तादृशं प्रख्याहीत्यन्वयः ४० इति प्रथमे पंचमः ५ अन्तर्वा चनेन गमिष्यन्तः कृष्णा
दीन्वत्सला इत्युक्तं तत उपरितने देवर्षिवृत्तान्ते जिज्ञासुः पृच्छति आसदित्याह सूतः एवमिति इत्यं वार्तान्तदेवर्षेर्जन्मकर्म च योऽवेदे किं निश
म्य समवत्सः कृष्णो भगवान् व्यासः तं देवर्षिं हे ब्रह्मन् शौनक भूयः पुनः प्रपप्रच्छ १ प्रश्नमेवाह भिक्षुभिरिति त्रिभिः तेन तद्विज्ञानाद्देष्टृभिर्विज्ञानोप
८१ तु त्वमप्यदभ्रश्रुत विश्रुतो विभोः समाप्यते येन विदां बुभुत्सितं प्रख्याहि दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशन्ति [illegible] ४० इति श्रीमद्भाग॰
श्रु स्कंधे नारदपूर्वजन्मविज्ञानप्राप्तिर्नाम पंचमोऽध्यायः ५ सूत उ॰ एवं निशम्य भगवान्देवर्षेर्जन्म कर्म च भूयः पप्रच्छ तं ब्रह्मन् व्या[illegible]वतीसुतः १
व्यास उ॰ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव वर्तमानो वयस्याद्ये ततः किमकरोद्भवान् २ स्वायंभुव कया वृत्त्या वर्तितं ते परं वयः कथं चेदमुदस्रा
३२ क्षीः काले प्राप्ते कलेवरं ३ प्राक्कल्पविषयामेतां स्मृतिं ते मुनिसत्तम न ह्येष व्यवधात्काल एष सर्वनिराकृतिः ४ नारद उ॰ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम वर्तमा
देष्टृभिः भिक्षुभिः संन्यासिभिर्विप्रवसिते चातुर्मास्यान्ते अन्यत्र गते सति ततः पश्चात्तस्यां दास्यां वा नाद्ये वयसि वर्तमानः किं कृतवान् २ हे स्वायंभुव तेन
या परं वयः भिक्षुविप्रवासप्रभृति वयः कया वृत्त्या वर्तितं नीतं कथं वा प्राप्ते काले इदं कलेवरमुदस्राक्षीः त्यक्तवानसि प्राक्कल्पीयमपि कलेवर
वृत्तान्तकथनप्रसंगेन प्रस्तुतत्वादिदमिति सन्निहितनया पृच्छ्यते ३ हे मुनिसत्तम प्राक्कल्पविषयां पूर्वकल्पीयामेतां भिक्षूपदेशमारभ्य
वत्स्मृतिं एष कालो न व्यवधात् तिरोहितवान् अनुभावमाह आगमशास्त्रस्यानित्यत्वात् तानव्यधात् किमिति प्रश्नो विवक्षितः व्यवधापकत्व
सूचनाय कालं विशिनष्टि एष कालः सर्वनिराकृतिः सर्वविनाशकः ४ इत्यं पृष्टः [illegible] तां तं वक्तुमारभेन नारदः भिक्षुभिरिति
नन्वित्यंतस्य पूर्ववदेवार्थः एतद्वक्ष्यमाणमकारिषमकार्षं कृतवानिति ५

म२

गुणनामसंस्मरणादिपूर्वकमनभिसंहितफलकर्मानुष्ठानं कारमेव दर्शयंस्तत्र कुर्वाणएवात्रमोधिकारी स्यादू ओं भिन्दि चास्मां ओं ब्रह्मणे ओं
नमस्त इति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः इति भगवद्वचनात् वासुदेवादिचतुर्व्यूहरूपेणात्मस्मितायभगवते नमो नमः इति नामस्मरण
रचितं २ प्रकारप्रदर्शनं धीमहि ओं मामिति तकल्याणगुणविशिष्टं परमात्मानं ध्यायेमस्मरेमेति गुणस्मरणप्रकारप्रदर्शनं तत्र वाचकतोऽन्तो निष्कृष्टेनो
मित्यनेन सर्वेष्टत्वकत्वमकारोकारमकाराणां संहितावर्णान्निष्पन्नेनोमित्यनेन तु सर्वकारणत्वं सर्वशेषित्वादिरूपमुभयविधेनोमित्य
नेन प्रत्यभिज्ञापितब्रह्मशब्देन स्वरूपतो गुणतश्च … नेन सं … महतामपि बृहत्वात् … वासुदेवपदेन सर्वाधारत्वं सर्वान्तरात्मत्वं च
प्रद्युम्नशब्देन तत्र सर्वाभासितान्युक्तविधनिरतिशयदीप्तियुक्तत्वमनिरुद्धपदेन सर्वव्यापकत्वं संकर्षणपदेनानीन्द्रियार्थविषयकज्ञानपा

ओं नमो भगवते तुभ्यं वासुदेवाय धीमहि प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ३७ इति मूर्त्यभिधानेन मंत्रमूर्तिममूर्तिकं ३९
यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ३८ इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितं अदान्मे ज्ञानमैश्वर्यं स्वस्मिन्भावं च केशवः

दकत्वं च फलितं उपलक्षणमिदं एतत्संभूतयोगुण … अनुसंधेया इत्यर्थः संकर्षणशब्दनिरुक्तिः पंचमस्कंधे वक्ष्यते ३७ इतीत्यमूर्तिकंकर्म
वपुःप्राकृतमूर्तिरहितं मन्त्रमूर्तिमोमित्याद्युक्तमंत्रप्रकाशमूर्तिः एवं कृतां कर्म मूला स्वेच्छोपात्तां च यस्य तं मंत्रशरीरकं वा अभिधायकं ओमादि
नामान्यनुरणंश्च यज्ञाराध्यं परमपुरुषं यो यजते स्वधर्मेणराधयति स एवं पुमान्सम्यग्दर्शनः ज्ञानी त्वात्मैव मे मतमित्युक्तविधोधिकारीत्यर्थः ३८
एवं यजतामाशु भक्तियोगो निष्पद्यते इत्यभिप्रायेणात्मानं दृष्टांतयति इमिति हे ब्रह्मन्मदनुष्ठितमिम … स्वस्य भगवतो निगमं च शासनं म४
मेवत्य दृष्ट्वा केशवः स्वस्मिन्भावं भक्तिं तत्साध्यं दर्शनात्मकं ज्ञानमैश्वर्यं चदेवर्षित्वादिलक्षणमदादित्यर्थः ३९ ॥ ॥

भा॰पु॰ टी॰ २९ अतिपातोऽतिक्रान्तः एकोऽसहायः एवाहं नलाद्रिभिर्जुष्टं महद्विपिनं वनमद्राक्षं दृष्टवानस्मि तत्र नलो ग्रन्थिपर्णी वेणवः स्थलवंशाः शरः कुशाः की
चकास्तम्बाः सच्छिद्राः शरस्तम्बाः ऋक्षव्यालाः कुशाः प्रसिद्धाः विपिनमेव विशिनष्टि घोरं दुष्प्रवेशमत एव व्यालानां दुष्टगजानां सर्पाणां
उलूकानां शृगालविशेषाणां चाजिरं क्रीडास्थानं अतीवप्रतिभयाकारं प्रतिभयं भयोत्पादकं १४ तत्राहं परिश्रान्तानीन्द्रियाणि आत्मा देहश्च यस्य तृ
षा पिपासया परीतः व्याप्तः बुभुक्षितः क्षुधितः स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टः कृतार्चिकः आचान्तः पीताजलो गतः श्रमो यस्य तथाभूतः १५ तस्मिन्नि
र्मनुष्यरहिते विपिने पिप्पलस्य उपस्थे मूले आश्रितः उपविष्टः आत्मस्थं जीवात्मनि स्थितं हृदयकमलस्थं परमात्मानं आत्मना मनसा चिन्तयं ध्यात

नलवेणुशरस्तम्बकुशकीचकगह्वरं एक एवातियातोऽहमद्राक्षं विपिनं महत् घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरं परिश्रान्तेन्द्रियात्मा
ऽहं तृट्परीतो बुभुक्षितः स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः १५ तस्मिन्निर्मनुजेऽरण्ये पिप्पलोपस्थ आश्रितः आत्मनात्मा
नमात्मस्थं यथाश्रुतमचिन्तयं १६ ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः १७ प्रेमाति
भरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतः आनन्दसम्प्लवे लीनो नापश्यमुभयं मुने १८ रूपं भगवतो यत्तन्मनःकान्तं शुचापहं अपश्यन्त्स
हसोत्तस्थौ वैक्लव्याद्दुर्मना इव १९ दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः २०

वानस्मि १६ भावनिर्जितेनाभ्यासवशीकृतेन चेतसा चरणाम्भोजं ध्यायतः चिन्तयतः औत्कण्ठ्यात् अश्रुकला अश्रुबिन्दवः लोचनयोर्यस्य तस्य तथाभूतस्य मे
लाविर्भावोपपत्तेः अतिशयस्य मम हृदि शनैः हरिरासीत् आविरासीत् १७ तदा प्रेमाधिक्येन हेतुना निर्भिन्ना अभिव्यक्ताः पुलका रोमाञ्चा यस्मिन् तदङ्गं शरीरं य
स्य सः अतीवनिर्वृतः सुखितः आनन्दसम्प्लवे आनन्दप्रवाहे लीनो मग्नः हे मुने उभयं देहमात्मानं च नापश्यं न दृष्टवानस्मि १८ यदाविर्भूतं मनःकान्तं
मनसोऽतीव प्रियमत एव शुचापहं शुचां शोकस्यापहन्तृ भगवतो रूपं तत्पुनरपश्यन् वैक्लव्यात् दर्शनरूपात् ... दुःखितमनाः सहसा
आसनस्थानादुत्थितवानस्मि वैक्लव्यादिति पाठान्तरं १९ ततः सहायत्वात् तद्रूपं भूयः पुनः द्रष्टुमिच्छुरहं हृदि मनः प्रणिधाय स्थापयित्वा ईक्षमाणोऽपि
तन्नापश्यमत एवातुर इव विषयान्तरस्यावितृप्तोऽहं भवन्नस्मि २० ॥

८

तदेवाह एकात्मजेत्यादिना कल्पांत इत्यतः प्राक्तनेन ग्रंथेन एकोहमात्मजः पुत्रो यस्याः सा मम जननी माता योषित् स्त्री जातिः जननीत्यनेनैव स्त्री
त्वोक्तेः अत एव मूढा किंकरी अनेन पराधीनत्वमुक्तं अनन्यगतेः गतिः पोष्यापोष्यः अनन्य पुत्रके मय्यात्मजे स्नेहानुबंधनं स्नेहपाश
रूपं चक्रे ६ सा मम जननी अस्वतंत्रा किंकरीत्वात् तदेव मम योगक्षेमं विधातुमपि न कल्पं न समर्था बभूव योगक्षेमम् अतः योगः समाहारः यो
गः लब्धलाभः लब्धपरिरक्षणं रक्षितविवर्द्धनं तस्य पात्रे प्रतिपादनं च क्षेमः ७ अहं च तदा पंचहायनः पंचवर्षवयस्को बालकः अत ए
व दिग्देशकालानभिज्ञः दिग्देशकालस्वभावानभिज्ञः तद्वेत्त्वया मात्रवेत्त्वया तदेहावसानप्रतीक्षणेन हेतुना तत्र यः तस्मिन् ब्रह्मकुले ब्राह्मण
गृहे उषितवानस्मि ८ एकदा स्थितेकदाचिन्निशि गेहान्निर्गतां गां दुहंतीं दोग्धुं प्रवृत्तां कृपणां मम मातरं पथि मार्गे ... पादेन स्पृष्टः कालेन ९

एकात्मजा मे जननी योषिन्मूढा च किंकरी मय्यात्मजेनन्यगतौ चक्रे स्नेहानुबंधनं ६ सास्वतंत्रा न कल्पासीद्योगक्षेमं ममेच्छती ईशस्य हि वशे लो
को योषा दारुमयी यथा ७ अहं च तद्ब्रह्मकुले ऊषिवांस्तदपेक्षया दिग्देशकालाव्युत्पन्नो बालकः पंचहायनः ८ एकदा निर्गतां गेहाद्दुहं
तीं निशि गां पथि सर्पोऽदशत्पदा स्पृष्टः कृपणां काल चोदितः ९ तदा तदहमीशस्य भक्तानां शमभीप्सतः अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्त
रां १० स्फीताञ्जनपदांस्तत्र पुरग्रामव्रजाकरान् खेटखर्वटवाटीश्च वनान्युपवनानि च ११ चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान्
जलाशयाञ्छिवजलान्नलिनीः सुरसेविताः चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः १२

चोदितः कालशरीरकेण देवेन चोदितः सर्पः अदशत् दंशमास्थितवान् अपिततो दृष्टवान् ९ तदाहं तन्मरणं भक्तानां शं सुखम् ... अतः कामयमानस्ये
शस्य भगवतोऽनुग्रहरूपं मन्यमानः उत्तरां दिशं प्रातिष्ठं प्रस्थितवानस्मि १० तत्र प्रस्थाने स्फीतान् समृद्धान् जनपदान् देशान् क्षितीपं तानापी ...
तेः तत्र परिच्छदत्वयः पुराणि पट्टणानि ग्रामान् व्रजान् गोपालनिवासान् आकरान् रत्नाद्युत्पत्तिस्थानानि खेटान् कृषीवलग्रा
मान् खर्वटान् पर्वतादिग्रामान् वाटीः पुष्पवाटिकाः वनानि अरण्यानि उपवनानि कृत्रिमवनानि च ११ तथा चित्रैर्नानाविधैर्धातुभिर्गैरिकादि
भिर्विचित्रान् अद्रीन् पर्वतान् इभैर्गजैर्भग्नाः विच्छिन्नाः भुजाः शाखा येषां तान् द्रुमान् शिवानि निर्मलानि जलानि येषु तान् जलाशयान् सरांसि ...

भा.प्र.
टी.४०

ततो नेतस्य भगवतो नामान्यनंतस्य गतलज्जः १८ भद्राणि लोकानां मंगलावहानि गुह्यानि वक्तुं योग्यानि जन्मानि कर्माणि च स्मरन् गां भूमिं पर्यटन् तुष्ट
ष्टं मनो यस्य गता स्पृहा शब्दादिविषया यस्य विगतो मत्सरो भूतविषयको यस्य विगतः मदो देहाद्यभिमानरूपो यस्य सः [illegible] यद्वा इति पाठे निःकेतः
कालं देहावसानकालं प्रतीक्षन्नासमिति क्रियापदमध्याहार्यं यावत्कालावसाने जीवितवानित्यर्थः २७ हे ब्रह्मन् कृष्णे भगवत्येव मतिर्यस्य
तत एवामलो विशुद्ध आत्मा मनो यस्य न एव शब्दादिविषयेष्वसक्तस्य मम काले तद्देहारंभकप्रारब्धावसानकाले कालः मृत्युकालः प्रादुरभूत् [illegible] स्थि
तोऽभवत् मृत्युकालस्य तडित्कल्पत्वं ज्ञापनायोपपत्तिमाह सौदामिनी इति सुदाम्नः पर्वतस्य उद्भवा सौदामिनी वा तडिद्यथा कालेऽप्रतिहतप्रकाशादेवं तथा
तडित्प्रसादस्थिनी त्यपि पाठः २८ तदा तां प्रसिद्धां सर्वजीवलयाधारभूतां शुद्धामप्राकृतां भागवतीं मनिरूढा त्वा त्वं प्रति मयि [illegible]

नामान्यनंतस्य हतत्रपः पठन् गुह्यानि भद्राणि कृतानि च स्मरन् गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन् विमदो विमत्सरः २७
एवं कृष्णमतेर्ब्रह्मन्नासक्तस्यामलात्मनः कालः प्रादुरभूत्काले तडित्सौदामनी यथा २८ प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुं आरब्ध-
कर्मनिर्वाणो न्यपतत्पांचभौतिकः २९ कल्पांत इदमादाय शयानेऽम्भस्युदन्वतः शिशयिषोरनुप्राणं विविशेंऽतरहं विभोः ३० सहस्रयुगपर्यंते उ-
त्थायेदं सिसृक्षतः मरीचिमिश्रा ऋषयः प्राणेभ्योऽहं च यज्ञिरे ३१ अंतर्बहिश्च लोकांस्त्रीन्पर्येम्यस्कंदितव्रतः अनुग्रहान्महाविष्णोरविघातगतिः क्वचि-

प्रयुज्यमाने संश्लिष्यमाणे लयं प्रायुक्त इत्यर्थः आरब्धकर्मनिर्वाणः तद्देहावस्थितिनिमित्तस्य प्रारब्धकर्मणो महा [illegible] वसाने यस्य सः पांचभौतिको दे-
हो न्यपतत् २९ एवं प्राक्कल्पीयवृत्तांतः कथितः अथ तदुपरितनवृत्तांतमाह कल्पांत इत्यादिना कल्पांते इदं जगदादाय स्वस्मिन्नुपसंहृत्य उदन्वतः प्रल-
यार्णवस्यांभसि शयाने निरुद्ध्य भगवतो शिशयिषोः स्वप्नाभिप्रेते विभोरंतर्मध्ये तस्य प्राणमनुविवेश प्रविष्टवानस्मि मनः पत्त्व विवक्षि-
तः ३० सहस्रयुगावसाने उत्थाय नाभिकमलादिति शेषः इदं [illegible] स्थूलात्मकं जगत्सिसृक्षतोऽस्य अनुप्रविष्टस्य प्राणेभ्यः प्राणादिभ्यः मरीचिमिश्रा ऋषयो यत्र
प्रादयः अहं नारदश्च जज्ञिरे उद्भवः अहं च जज्ञे इति पुरुषपरिणामेनान्वयः ३१ ततो महाविष्णोरनुग्रहात् क्वचित् अविघातः प्रतिहतो [illegible] गतिर्यस्य
अस्कंदितमखंडितं व्रतं ब्रह्मचर्यं यस्य सोऽहं त्रिलोक्या अंतर्बहिश्च पर्येमि [illegible] विचरामि ३२

40

नौ

एवं द्रष्टुं पुनः पुनः यतंतं यत्नं कुर्वंतं मामुद्दिश्य गिरामगोचरः यतो वाचो निवर्त्तंते इत्युक्तरीत्या वागविषयः अपरिच्छेद्यत्वादिति भावः अदृश्यः स
न्निति तात्पर्यं भगवानिति विशेष्यमध्याहर्त्तव्यं गगने गंभीरया वाचा शुचः शोकान् प्रशमयन्निवाह २१ उक्तिमेवाह हंतेति चतुर्भिः हे हे लोकस्मि
न् जन्मनि भवान् मां द्रष्टुं माऽर्हति नार्हतीति तिमाशब्दो नञ्पर्यायः अतो माद्रिक्षुरिति लुङ्भावः दर्शनानर्हत्वे हेतुर्वदन्नात्मानं विशिनष्टि अवि
पक्को विनष्टः कषायः दर्शनप्रतिबंधकः पुण्यपापात्मकः कषायः कषायवदुरपनेयः कर्मोपाधिर्येषां तेषां कुयोगिनां मंदबुद्धीनां दुःखेनापि
दृष्टुमशक्यः २२ तर्हि सकृत्कथं दृष्टोसीत्यत्राह सकृदिति हे अनघ सकृद्रूपं मदीयं दर्शितं इति यत्तत्तव मत्कामाय मद्विषयकेच्छायै एतत्का
नै६ मयतेइति पाठांतरं तत्र ते तुभ्यं सकृद्दर्शितं रूपं एतत्कामयेद्रष्टुमिति शेषः निवृत्तप्रेरणात्मार्थे णिजंतात्कर्महेतुमणि विशिष्टा चक्रेति वैकल्पिक परस्मै

एवं यतंतं विजने मामाहागोचरो गिरां गंभीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव २१ हंतास्मिन् जन्मनि भवान् मा मां द्रष्टुमिहा
र्हसि अविपक्वकषायाणां दुर्दर्शोहं कुयोगिनां २२ सकृद्यद्दर्शितं रूपमेतत्कामाय तेनघ मत्कामः शनकैः साधुः सर्वान्मुंचति हृच्छयान् २३ य
त्सेवयादीर्घयापि जाता मयि दृढा मतिः हित्वावद्यमिमं लोकं गंता मज्जनतामसि २४ मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित् प्रजासर्गनिरोधेपि स्मृति
श्च मदनुग्रहात् २५ एतावदुक्त्वोपराम तन्महद्भूतं नभोलिंगमलिंगमीश्वरं अहं च तस्मै महतां महीयसे शीर्ष्णावनामं विदधेनुकंपितः २६

पदं किं कामनामात्रेण नेत्याह मत्कामः मां द्रष्टुं कामयमानः साधुचरितः शुभान् शनैः सर्वान् हृच्छयान् रागादिदोषान्मुंचति ... ते २३ यत्स्तेनवा
दीर्घया स्वल्पकालिकयैव सत्सेवया मयि दृढा मतिः जाता तेन त्वमपि ममवद्यं लोकमिति लोकादेहं त्यक्त्वा दूरे हित्वा पापं हित्वा त्वं मज्जनतां म
द्भक्तां गंतासि प्राप्स्यसि कल्पांतरे इति शेषः २४ मदनुग्रहात् हेतोः कर्हिचिदपि प्रजासर्गनिरोधे प्रलयकालेपि तव निबद्धा मयि स्थिता मतिः स्मृतिश्च
न विपद्येत न नश्येत कर्हिचिन्मयि निबद्धा मतिः प्रजासर्गनिरोधेपि स्मृतिश्च न विपद्येतेति वान्वयः २५ अलिंगकर्म ... नभोलिंगमाकाशश
रीरकमीश्वरं सर्वनियंतृ ऐश्वर्यमिति पाठे ईश्वरशब्दस्य चोतनमहत्त्वं ... स्वाधीनसत्ताकं भूतं तस्मै महतां महीयसे शीर्ष्णावनाममित्युक्ते
एतावदुक्त्वा विरराम तूष्णीमास ततो महद्भ्यो ... तेजस्विनामपि महीयसे तस्मै महते भगवते अनुकंपितोहं मवनामं प्रणामं विदधे कृतवान् ... २६

नौ

भा॰ प्र॰ टी॰ ४१

वासुदेवीसुतमासं अनारदोयपाविनिष्कृतेन तु परीतनं व्यासहृतान्तं पृच्छति शौनकः निर्गत इति हे सूत तदभिप्रेतं किं वा भगवतोश्वर्मीनद्वापेलीन
त्पिताइत्यनेनसूचितमेव नारदस्याभिप्रेतं श्रुतवान् भगवान् निर्वादरायणः किमकरोत् १ इत्यमोपृष्ट आह सूतः ब्रह्मनद्यामित्यादिभिः सप्तभिः
ब्रह्मनद्यां ब्रह्मर्षिभिः सेवितायां स्त्रीसरस्वत्याख्यायां पश्चिमतटे शम्याप्रास इति प्रसिद्धो व्यासस्याश्रमः सर्वर्षीणां सत्रवर्द्धनः सत्राणि वर्द्धन्ते यस्मिन्निति
तथा २ तस्मिन् बदरीखण्डमण्डिते आश्रमे शम्याप्रासे व्यासः ३ उपस्पृश्य आचम्य स्वयमात्मना मनः प्रणिदध्यौ विषयान्तरेभ्यः प्रत्याहृत्यात्म
न्येवमकरोदित्यर्थः ३ भगवद्भक्तियोगेनाम[illegible]लेमनसि सम्यक्प्रणिहिते पूर्वं तावत्पुरुषं परमपुरुषमपश्यत् ततः तदाश्रयां पृथगपाश्रयां तदा
धेयां तत्करीस्मतामिति यावत् मायां चापश्यत् ४ मायां विशिनष्टि ययेति परेणैव मायाख्यप्रकृतेर्विलक्षणो पि जीवो यया मायया मोहितः त्रिगुणा

लोकेनक॰ निर्गते नारदे सूत भगवान् बादरायणः श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः १ सूत॰ ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे शम्याप्रा-
स इति प्रोक्त ऋषीणां सत्रवर्द्धनः २ तस्मिन्स्व आश्रमे व्यासो बदरीखण्डमण्डिते आसीनोऽप उपस्पृश्य प्रणिदध्यौ मनः स्वयं ३ भक्तियोगेन मनसि सम्यक्
प्रणिहितेऽमले अपश्यत्पुरुषं पूर्वं मायां च तदपाश्रयाम् ४ यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकं परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ५ अ-
नर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम् ६ यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे भक्तिरुत्पद्यते पुंसः शोकमोहभया-

कं गुणत्रयपरिणामात्मकं शरीरमेवात्मानं मनुते मन्यते तत्कृतं देहात्मभ्रमकृतमनर्थं च तापत्रयस्वरूपं प्रतिपद्यते ५ किं च अनर्थोपशमं तापत्रय
पत्रूपानर्थोपशमनात्मकं उपायमजानतो लोकस्यार्थे साक्षात् भक्तियोगमेवानर्थोपशमं विद्वान्सर्वज्ञात्तवान् व्यासोऽपश्यदित्यनुषङ्गः भगवद्भक्तियो
गमेवानर्थोपशमोपायत्वेन निश्चितवानित्यर्थः ततः सात्वतसंहितां श्रीभागवतरूपां संहितां संहितासंदर्भ[illegible]विशेषः सात्वतशब्देन प्रमुक्तादे
व निरुक्तः ६ तामेव विशिनष्टि यस्यामिति यस्यां सात्वतसंहितायां श्रूयमाणायां शोकादिपहन्तरि परमपुरुषे कृष्णे भक्तिरुत्पद्यते नामलाहाना
मात्तात्मन्यात्मवद्धियोऽश्रुस्वेस्वमिति या मतिरित्युक्तविधः शोको बाष्पलोलः दुःखं मनो भयमन्याविदुःखदर्शनजं प्रातःकालेऽस्तानपूर्वपर्शः ७ यत्स्येत्

दे

देवेन भगवता ब्रह्मणा वेदं तां स्वर [illegible] निषादर्षभगांधारादयुमध्य [illegible] तं [illegible] तण्व ब्रह्म तेन विभूषितां स्वरैः सन्निधापिते
नब्रह्मणा भगवता विभूषितामिमां पाणिस्थां वीणां मूर्छयित्वा वादयित्वा मूर्छा [illegible] वादनं मूर्छनाकेति वैजयंती [illegible] कोश
त् हरिकथां गायमानोहमेवं चरामि ३३ प्रियं यश्च कानां श्रीतावहं श्रवः यशो यस्य तीर्थां पादे गंगादेती र्थं यस्य पादेपस तीर्थपादः स
ति वा स भगवान्स्ववीर्याणि यशांसि प्रगायतो मम चेतस्याहूत इव शीघ्रं दर्शनं याति दृष्टो भ [illegible] वतीत्यर्थः ३४ तदेवमाह एष यावदनुवर्णयापसु ते
यातं हरिचरित्रा सेपवानुवर्णपत्नमिति पाप [illegible] तापत्र यातुरचित्तानां भगवद्गुणवर्णनानुश्रवणमंतरेण तापत्रय विघातकं नोपायांतरमस्तीत्या
ह एतदिति द्वाभ्यां आसकल्मात्रा स्पर्शेच्छया मात्राः शब्दादिविषयास्तासां स्पर्शेच्छयातुरभवत्तस्य यात्रातुर पी [illegible] हं चित्तं येषां तेनानां [illegible]
धोः प्रवः पूरः सहियस्मात्कारणाद्दृष्टो भवति तदेतदेवाकिह ऐच्चर्यायान्तुवर्णनमिति ३५ मुहुः कामलोभाभ्यां हतस्त्रात्मामनः यदयम् ऽद्ध

देवदत्तामिमां वीणां स्वरब्रह्मविभूषितां मूर्छयित्वा हरिकथां गायमानश्चराम्यहं ३३ प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः
आहूत इव मे शीघ्रं दर्शनं याति चेतसि ३४ एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः भवसिंधुप्लवो दृष्टो हरिचर्यानुवर्णनं ३५ यमादिभि
र्योगपथैः कामलोभहतो मुहुः मुकुंदसेवया यद्वत्तथात्माद्धा न शाम्यति ३६ सर्वं तदिदमाख्यातं यत्पृष्टोहं त्वयानघ जन्मकर्मरह
स्यं मे भवतश्चात्मतोषणं ३७ सूत उ० एवं संभाष्य भगवान्नारदो वासवीसुतं आमंत्र्य वीणां रणयन्ययौ यादृच्छिको मुनिः ३८ अ
होदेवर्षिर्धन्योयं यत्कीर्तिं शार्ङ्गधन्वनः गायन्माद्यन्निदं तन्त्र्या रमयत्यातुरं जगत् ३९ इति श्रीम० महापुराणे प्रथमस्कंधे नारदव्यासंवादे नाम ६

द सेवयाचरणानुस्मरणादिरूपया साक्षात् शाम्यति कामादिरहितो भवति यथात्र यमादिभिर्योगमार्गैर्न शाम्यति ३६ प्रश्नोत्तरमुपसंहरति सर्वं
मिति हे अनघ यत्त्वयाहं पृष्टस्तदेतत्सर्वं मयाख्यातं आख्यातमेव संजन्म रहस्यं यत्ति मे मम जन्म कर्म रहस्यं तत्र पाभ [illegible] वतस्तवात्मा मनः तुष्यते यत
द्वैतत्सर्वं मयाख्यातमित्यन्वयः ३७ व्यासनारदसंवादमुपसंहरति सूत उः एवमिति एवमित्थं संभाष्य भगवान्नारदो मुनिः वासवीसुतमुपरिचरवसु वीर्यं
जायाः सत्यवत्याः सुतं व्यासमामंत्र्य आपृच्छ्य वीणां रणन्यन्यादृच्छिकः स्वच्छन्दचारी ययौ ३८ देवर्षिं स्तौति अहो इति धन्यत्वे हेतुमाह यस्य चरणारविं
पादकत्वे तदेवाह यो देवर्षिः शार्ङ्गधन्वनो भगवतः कीर्तिं गायन्तन्त्र्या वीणया स्वेनेन हर्षेण सन्निमग्नः अनुतापत्रयातुरं जगदपि रमयति [illegible]

भा॰प्र॰
४२ टी॰

तदेवं कस्मिन्युगे प्रवृत्तेयमित्यादि प्रश्नानामुत्तरमुक्तं अथ यत्स्य पुत्रो महायोगी त्यादि प्रश्नस्योत्तरं विवक्षितं तावदभिमन्युसुतं सूत प्राहुर्भागवतोत्तमं तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि न इत्यादि प्रश्नानामुत्तरं सोपोद्घातं वक्तुं प्रतिजानीते परीक्षित इति परीक्षितो राजर्षेर्जन्मकर्माणि च विलापं किं च यं च तेषां समाहारः तदुपोद्घातरूपं पाण्डुपुत्राणां संस्थानं स्थितिर्वृत्तान्तमिति यावत् तदेतत्सर्वं कृष्णस्य भगवतः कथा याउदयः प्रसक्तिर्यस्मिंस्तद्रूपं संस्थांच कृष्णकथोदयामिति च पाठान्तरं तदा कृष्णकथोदयामिति संस्थाविशेषणं संस्थाशब्दस्य यथोक्त एवार्थः तत्र पाण्डुपुत्राणां संस्थानं परीक्षिज्जन्मकर्मणः उपोद्घातरूपं परीक्षिज्जन्मकर्मादिकं त्वितः प्रभृति प्रधानप्रतिपाद्यं तदुभयं तत्प्रसक्तकृष्णकथा सर्वोपस्कंधः कृत्स्नप्रबंधोपोद्घातरूप इति विवेकः १२ तावत्परीक्षितो जन्मकर्मादिकं त्वितः प्रभृति प्रधानप्रतिपाद्यं पाण्डुपुत्राणां संस्थानमग्रे हपदेनाद्विनायावत्तंत्रुदशाध्यायसमाप्तिः तत्र परीक्षितो जन्मरूपोद्घात एवात्र भाव्यते कर्मादिकं तु ततउपरि नवग्रंथेनेति विवेकः यदेत्यस्य तदेति तृतीयेनान्वयः मृधे युद्धे कौ

92 परीक्षितोथ राजर्षेर्जन्मकर्मविलापनं संस्थांच पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयं १२ यदा मृधे कौरवसृञ्जयानां वीरेष्वथो वीरगतिं गतेषु वृकोदराविद्धगदाभिमर्शभग्नोरुदण्डे धृतराष्ट्रपुत्रे १३ भर्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि उपाहरद्विप्रियमेव तस्य जुगुप्सितं कर्म विगर्हयंति १४ माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना तदारुदद्बाष्पकलाकुलाक्षी तां सान्त्वयन्नाह किरीटमाली १५ ॥ ॥ ॥

वीरेषु रवाणां सृञ्जयानां च वीरगतिं वीराणां गतिं गतेषु प्राप्तेषु सत्सु धृतराष्ट्रपुत्रे दुर्योधने वृकोदरेण भीमेनापविद्धायाः प्रयुक्ताया गदाया अभिमर्शेनाघातेन भग्नो रुरूप एव दण्डो यस्य तथाभूते सति १३ द्रौणिरश्वत्थामा स्वचिकीर्षितं भर्तुर्दुर्योधनस्य प्रियमिति पश्यन्मन्यमानः स्वपतां प्रयातानां कृष्णायाः द्रौपद्याः सुतानां शिरांसि उपाहरत् छित्वानीतवान् इदं कर्म तस्य धृतराष्ट्रस्य विप्रियमेव पश्चात्संपन्नमत एव कर्म विगर्हयंति सर्वे लोकस्तापीति शेषः अत एव जुगुप्सितं विगर्हयंते अद्यापि विनिंदयंति १४ यदेवं तदा माता द्रौपदी शिशूनां सुतानां घोरं निधनं मरणं निशम्य श्रुत्वा परितप्यमाना बाष्परूपकुलेश्रुबिन्दुभिराकुले व्याप्ते अक्षिणी यस्यास्तथाभूता रुदतीति तदा तां द्रौपदीं सान्त्वयन्नुपायन् किरीटमाली किरीटानां राज्ञां तत्र किरीटानां मालाऽस्यास्तीति किरीटमाली श्रीमदर्जुनः गदाचाकृष्णादिश्याङ्गतिमत्वर्थीय इति वक्ष्यमाणमाह १५ ॥ ॥ ॥ ॥

समासेनानुक्रम्य विवृत्तितात्पर्यानुक्रमं विशेषेण विन्यस्य नदनुक्रमेणैवेमां संहितां कृत्वा सुतं शुकमध्यापयामास प्रस्तावसरदानायशुकं विशिन
ष्टि निवृत्तिनिरतं सांसारिकधर्मेभ्यः सुखदुःखादिकेवलचिन्तकाग्राद्विरहाशमदमादिभिर्निवृत्तिः तत्र निरतं मौनं परब्रह्म पाषाणमननं मुनिस्तु भगवाधा ने२
वसरः ८ इति शौनकः सइति वाऽस्य वधारणे निवृत्तिनिरतः मुनिरतएव सर्वत्र आत्मन्यपि अधीते न्यपेक्षोपेक्षकः आदररहितः आत्मारामः प्रायः । ...
एवं विधं कस्य वा हेतोरिति शेषः कस्माद्धेतोरर्हतीं विपुलामेतां संहितामभ्यसदधीतवान् कथमेकाग्रचित्तोभगवन्मननपरस्तद्विरोधि ग्रामेतां संहि
संहितामभ्यसदिति प्रश्नाशयः ९ नेयं संहिता भगवन्मननविरोधिनी प्रत्युत तदुपयुक्ते भगवत्स्वरूपगुणविवरणरूपत्वात्तेनाधीतवानित्युत्तरं वक्तुं तेषु श्रेष्ठं
स्वरूपगुणविषयकतामाह सूतः आत्मारामा इति यद्यपि मुनयस्तु आत्मारामाः परमात्मैककनिष्ठा अतएव निर्ग्रन्थाः लौकिकार्थप्रबन्धकरणरहिताः अनियतार्थं
व०१ इति पाठे ग्रन्थिच्छेदनीया अपरप्रेरणया निरपत्राऽस्त्यपि तथापि तेउरुक्रमे भगवत्यहैतुकीं फलसम्प्रयोजनाभक्तिं कुर्वन्ति सा विषयाया भक्तेः स्वरूपमाह
स संहितां भागवतीं कृत्वानुक्रम्य चात्मजं शुकमध्यापयामास निवृत्तिनिरतं मुनिः ८ शौनक० स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः कस्य वा बृहतीमेतामात्मारामः समभ्यसत् ९
सूत० आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः १० हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ११
इत्थमिति इत्थंभूता विधागुणा यस्य तथाविधो हरिरिति एवंविधां भक्तिं कुर्वन्तीत्यन्वयः हरिरेवं विधगुणकः स्वरूपकः इतीममनन्याननं त्वाङ्के
तत्र भजनीयस्वरूपगुणविषयकज्ञानस्यापेक्षितत्वात्तद्विवरणरूपामिमां संहितामधीतवानिति भावः १० तदेवाह हरेरिति हरेर्गुणैरेवेदान्ते प्यावग
तैरनुभूयमानैस्तैर्गुणैराक्षिप्ता आकृष्टा मतिर्यस्य स भगवान्बादरायणिः शुकः नित्यं विष्णुजनप्रियः महदिदमाख्यानमध्यगादधीतवानतएव ताहि
मते विष्णुजनप्रिय इति विशेषणद्वयं हेतुगर्भं विज्ञेयं जनाभक्ताः प्रियायस्येति बहुव्रीहिः अयं भावः यद्यप्यत्र भगवद्गुणा वेदान्तेष्वावगतास्तथा
पि तदध्यायात्रिभगमासीत्तयोगात्तदध्यायवानभवदित्युक्तिर्न भक्त[illegible] गुणप्रतिपादकप्रबन्धसंश्लेषणतत्स्वावश्यापेक्षितत्वात्कार्त्स्न्येनास्य प्रबन्धस्य भग
वद्गुणप्रतिपादकत्वात्तावतारतद्गुणाकर्षविश्रुतिकसभक्तितद्गुणस्येव भगवतो जन्माद्यन्वादवतारतद्गुणानां विशेषत्वे वेदान्तेष्ववगतानां वेदान्तावग ने२
तगुणेभ्योऽप्यतिशयितानां अस्मादाख्यानादवगमा [illegible] दिदमध्यगादिति अनेन प्रबन्धप्रशस्त्यं सूचितं ११ रारारा ममम सजे

तदेवाह कृष्णेत्यादिपंचभिः प्रादुः कृतं तेजो यापाप्तस्वरूपसंहारानभिज्ञस्तदुपसंस्थापनाय भगवंतं कृष्णे पुः कामो नाहमपि वैं [illegible] तिमावोचाद्यपि [illegible]
येण नानुद्र गवंतं स्वाभाविके दुर्मे स्तौति चतुर्भिः हे कृष्ण कृषिर्भूवाचकः शब्दोणश्च निर्वृत्ति वाचकस्तत्क कृष्ण शब्दोपस्थापित सर्व [illegible]
व हल्लस्वरूपणानुसंधान कृत संभ्रमाद्विहक्तिः हे महाबाहो बाहू राजन्यः कृत इत्युक्तरीत्या राजन्यकुलप्रभव वाहो भक्तानामभयंकरोतीति त्वाम् [illegible]
तस्य सेवो धनंदृप्तमानानां जनानां संस्तुते स्त्वपवर्गः पारम्भतः संसारादिमोचकरति यावत् त्वमेक एव कृत्स्नजगत्सु स्वावह स्पत चादिभक्ताभय [illegible]
संस्तुति रूपमहाभयेन्तु पृण त्वमस्यत वाकि पाने तदुपस्थितभयापनयने प्रयासइतिभावः २२ नन्वेवंविधस्त्वीश्वरो नाहमित्यत आह त्वमिति त्व [illegible]
साक्षादीश्वरः यत्किं चिदीशितव्यं [illegible] पत्यासर्वोपिलोकईश्वर एवेत्यतिनरसाधारणैर्धर्मैरभिप्रेतमीश्वरमितरस्मान्न्यावर्तयति आद्य आदेभव।
निखिल जगत्कारणत्वेनावस्थितः पुरुषः सर्वांतरात्मतया सर्वे प्राणाश्रित त्वेन सर्वेरूपेणवर्तीत्यर्थः आपायोपि प्रकृतेः परः स्वमेरणानला [illegible]
स्वमनोवृत्तिरवच्छ आपरयमित्तस्त्वं माइत्यादि श्लोकद्वयोक्त प्रकृति द्वयादिलक्षणः पुरुषशब्देन पुःसंज्ञे वै शरीरेऽस्मिन् शयनात्पुरुषो हरिरिति निरु

43

अर्जुन० कृष्णकृष्ण महाबाहो भक्तानामभयंकर। त्वमेको दह्यमानानामपवर्गोसि संसृतेः २२ त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृ
तेः परः मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि २३ स एव जीवलोकस्य मायामोहितचेतसः विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्ष
केन सर्वांतरात्मत्वं सर्वाधारत्वं च फलितं प्रकृतेः परइत्यनेन प्रकृतिगत धर्मास्पर्शश्च नन्वीश्वरश्च सर्वधारकश्चेत सर्वधारके दे [illegible] लक्षणस्यापि जीव
स्य देवोहं मनुष्योहमिति देहधर्मस्पर्शदर्शनात्कथं तस्य प्रकृतिधर्मास्पर्शश्चेन्मैतो विच्छिन्नेष्टि चिच्छक्त्या शक्तिशब्दः सर्वत्र [illegible] पृथक्सिद्ध
विशेषणवाची चिच्छक्त्या ज्ञानशक्त्या नित्याविर्भूतापरिच्छिन्न धर्मभूतज्ञानशक्त्या मायां प्रकृतिं चेतनाचेतनात्मिकां व्युदस्य मायाशब्दोत्रोपचारात्मा
याधर्मपरः मायाधर्मान् व्युदस्य मायाधर्मैरस्पृष्टइत्यर्थः केवल एव कैवल्यः स्वार्थेष्यञ् केवले आत्मनि स्थितः स्वमहिम्नि प्रतिष्ठितः इत्युक्तरीत्या
धारेतात्मपरेत्यर्थः जीवस्तु कर्मणा संकुचितज्ञानत्वाद्देहात्मभ्रमेण देहधर्मान् आत्मन्यध्यस्यति ईश्वरस्तु चिच्छक्त्याततज्ञत्वात्तस्य तत्तज्जीवांतरात्मतया
तत्त ज्जीवकर्मानुरूपफलं प्रयच्छन्तत्तद्याथार्थ्येन तिष्ठतइतिभावः २३ तदेवाह स इति उक्तविध ईश्वर एव त्वमायया देहात्मभ्रमस्वतंत्रात्मभ्रमादिरूपमाया
वैण मोहितं चेतो यस्य तस्य जीवलोकस्य धर्मादिलक्षणं धर्मार्थकाममोक्षरूप [illegible] पुरुषार्थचतुष्टयरूपं श्रेयस्त्वद्विषयं रूपमश्रेयः [illegible] कर्मानुगुणं स्वेन स्वेन

नाम॰

नदेवाह हे भद्र ब्रह्मवंधो र्द्रुमरणौधम स्या ततायिनः अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारापहर्ता च षडेते आततायिन इति शस्त्रपाणे एतना यित्वस्मरणा दाततायिन इत्युक्तं शस्त्रपाणिर्नामशस्त्रधारी अन्निरपराधिष्वपि घातकः तस्य शिरो गांडीवमुक्तै र्विशिखैः शरै हरेयं पश्यतस्तव हृत शिरः पादेनाक्रम्य दग्ध्वेत्वा त्वस्त्रास्यसि तत्र तच्च विभजामि भाजे मा नि १६ इती संवल्गुभिः सुदैविचि त्रै अर्जुनो भीषणैः प्रियांद्रौपदीं सांत्वयित्वा अच्युतः कृष्णो मित्रस्सूतः सारथिश्च यस्य सारथीकृता च्युत इत्यर्थः दंशितः कवचितः उग्रधनुः गांडीवं यस्य कपिध्वजः हनुमच्चिह्नितः ध्वजो यस्य सोऽर्जुनः रथेन साधनेन गुरोर्द्रोणाचार्यपुत्रमश्वत्थामानमन्वाद्रवदन्वधावत् १७ आपतंतंतमर्जुनं दूरादेवविल

अर्जुन॰ तदा शुचस्ते प्रमृजामि भद्रे यद्ब्रह्मबंधोः शिर आततायिनः गांडीवमुक्तैर्विशिखैरुपाहरेत्वाक्रम्य यत्स्नास्यसि दग्धपुत्रा १६
सूत॰ इति प्रियां वल्गुविचित्रजल्पैः स सांत्वयित्वाच्युतमित्रसूतः अन्वाद्रवद्दंशित उग्रधन्वा कपिध्वजो गुरुपुत्रं रथेन १७ तमापतं तं स विलक्ष्य दूरात्कुमारहोद्विग्नमना रथेन पराद्रवत्प्राणपरीप्सुरुर्व्यां यावद्गमं रुद्रभयाद्यथार्कः १८ यदाशरणमात्मानमैक्षत श्रांत वाजिनं अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः १९ अथोपस्पृश्य सलिलं संदधे तत्समाहितः अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते २० ततः प्रादुष्कृतं तेजः प्रचंडं सर्वतो दिशं प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह २१ ॥ ॥ ॥ ॥

त्य प्रत्यभिज्ञाय कुमारहा कुमारघाती सोऽश्वत्थामा उद्विग्नं भीतं मनो यस्य तथाभूतः प्राणपरीप्सुः प्राणान्त्रातुमिच्छुर्जिगीषुरित्यर्थः उर्व्यां भूमौ यावद्गमं यावद्गंतुं शक्यं तावद्रथेन साधनेन पराद्रवत्पलायितवान् कोऽवत् पथा रुद्रभयात् अर्कः १८ यदा शरणं रक्षकं रहितं श्रांतवाजिनं यस्य तमेवात्मानं पश्य तदा पलायितवान् न तत्सद्विजात्मजो द्रोणात्मजो अश्वत्थामा आत्मत्राणं स्वरक्षणोपायं ब्रह्मशिरो नामकमस्त्रं मेने अवबुध्यत ब्रह्मशिरोस्त्रेणार्जुनं हत्वा स्वात्मानं रक्षिष्यामीति मनसि कृतवानित्यर्थः १९ अथ सलिलमुपस्पृश्याचम्य समाहितः अस्त्रप्रयोगोपक्रमे मनः प्रणिधान .. संहारमजानन्नपि प्राणकृच्छ्रे प्राणापद्युपस्थिते तद्ब्रह्मशिरोस्त्रं संदधे प्रयुयोज २० ततः सर्वतो दिशं सर्वदिक्षु प्रादुः कृतं प्रादुर्भूतं प्रचंडमुग्रं तेजः प्राणापदमभिप्रेक्ष्य प्राणविपत् .. मत्वेन

ने१

भा.प्र. ततआसाद्यसमीपमेत्सदारुणाग्रजगेतस्माद्द्रोणपत्न्याः कृपाःसुतेद्रोणिःममर्षेणक्रोधेनताम्रलिप्तीयस्यसोर्जुनस्तस्मावलेनव९ णपशुं
टी.४४ तहृतं ३३ रिपुंद्रोणिंबलाद्बद्ध्वाबध्वाशिबिरायराजन्निवे पशिबिरंप्रतिनीनीषंतमनेतुमिच्छंतमर्जुनंभगवानंबुजेक्षणःकृष्णःकुलक्रोधात
धर्मपरित्रार्थमितिभावः ३४ तदेवाहमेनमितिपंचभिः हेपार्थइमंब्रह्मवंधुंत्राजीवयितुंनैवाहसिकिंतुजहि आततायिनमापानहन्यादेवा
विचारयेन्निति स्मृतेरितिभावः तदेवाह योसावनागसःसुप्तानवधीत् ३५ धर्मवित्तुमान्मत्तादिरूपंरिपुंनहंतितदेवत्रथ
मीस्थितिरित्यर्थः तत्रमतेमधुना प्रमतमनवहितंउन्मत्तंपित्तादिनाजडंकेवलमज्ञं ३६ योघृणःनिष्कृपःअतएवखलोदुरात्मायःअमान्सैयेःप्राणैः

।ततःआसाद्यतरसादारुणंगौतमीसुतं ववंधामर्षताम्राक्षःपशुंरशनयायथा ३३ शिबिरायनिनीषंतंरज्ज्वावध्वारिपुंबलात् प्राहार्जु
नंप्रकुपितोभगवानंबुजेक्षणः श्रीकृष्णउ० मैवंपार्थार्हसित्रातुंब्रह्मबंधुमिमंजहि योसावनागसःसुप्तानवधीन्निशिबालकान् ३५ म
तंप्रमत्तमुन्मत्तंसुप्तंबालंस्त्रियंजडं प्रपन्नंविरथंभीतंनरिपुंहंतिधर्मवित् ३६ स्वप्राणान्यःपरप्राणैःप्रपुष्णात्यघृणःखलः तद्वधस्तस्य
हिश्रेयोयद्दोषाद्यात्यधःपुमान् ३७ प्रतिश्रुतंचभवतापांचाल्यैश्रृण्वतोममआहरिष्येशिरस्तस्ययस्तेमानिनिपुत्रहा ३८ त
दसौवध्यतांपापआततायात्मवंधुहा भर्तुश्चविप्रियंवीरकृतवान्कुलपांसनः ३९ सूतउ० एवंपरीक्षिताधर्मंपार्थःकृष्णेनचोदितः
नैच्छद्धंतुंगुरुसुतंयद्यप्यात्महनंमहान् ४० अथोपेत्यस्वशिबिरंगोविंदप्रियसारथिः न्यवेदयत्तंप्रियायैशोचंत्याआत्मजान्हतान् ४१

स्वप्राणान्पुष्णाति तस्यवधस्तस्यैवश्रेयस्करः अन्यथायस्मात्दकृतप्रायश्चित्तात्दोषात्पुमानधःनरकेपतति ३७ किंचममशृण्वतःसतोभवता
पांचाल्यैद्रौपद्यैप्रतिश्रुतंप्रतिज्ञातं किमितिहेमानिनियस्तवपुत्रहंतातस्यशिरःआहरिष्यःआहरिष्यामीति ३८ तत्तस्मात्दसौपापःपात्माआततायी
आत्मनःस्ववंधुहाकुमारघातीहेवीरभर्तुर्धृतराष्ट्रस्यविप्रियमिदंकर्मकृतवान्कुलपांसनःकुलदूषकस्मात्वध्यतां ३९ इत्थंधर्मपरीक्षता।।
धर्मपरीक्षार्थंएवंकृष्णेनचोदितोपिपार्थोर्जुनआत्मजहनमपितंगुरुसुतंद्रोणिंहंतुंनैच्छत् यतोर्जुनोमहान्गुरुकृतोपकारभि
सः ४० ततोगोविंदप्रियसारथिश्चयस्यसोर्जुनःस्वशिबिर[illegible]शोचंत्यैप्रियायैद्रौपद्यैतंद्रौणिंन्यवेदयत् ४१

न केवलमंतरात्मतयैवंविधत्वमपि त्ववतारैरपीत्याह तथेति भुवो भा[illegible]हर्तुमिच्छतो जिहीर्षयाऽवतारेण ध्यानस्य भावनाम
नन्यप्रयोजनभक्तिपराणां स्वकीयानामसकृदनुध्यानाय चाप [illegible] एवं संस्तुत्य कृतं पृच्छति किमिति इदं तेजः किंस्विद्
तिष्ठा प्याम्यप्रश्नः कुतो वेति हेतुप्रश्नः कुतो वाऽऽगच्छतीति कुतस्त्वं [illegible] तीत्यर्थः स्वस्य तदज्ञानमावेदयति न वे[illegible]हमिति नहि किं जाना
श्री४ सीत्यत आह सर्वतोमुखं परमदारुणं तेजः आयाति मे तावदेवं वेद्मीत्यर्थः २६ इत्थं संस्तुतो विज्ञापितश्च भगवान्सर्वज्ञस्त्वाह वेत्थेति द्रोणपुत्रेण
धे ऽपस्थिते सति द्रोणपुत्रस्य तिकर्तरि पृष्टो तेन प्रदर्शितं प्रयुक्तं ब्राह्ममस्त्रमिदं तेजो वेत्थ जानीहि असौ द्रोणपुत्रः संहारं प्रयुक्तब्रह्मा
स्त्रोपसंहारं न वेद न जानाति २७ तर्हि किं कर्तव्यमित्यत आह नेति अस्य द्रोणपुत्रप्रदर्शितस्य ब्रह्मास्त्रस्य [illegible] तवैवमन्यत्किंचित्प्रतिभट
मस्त्रं ततो यत्तमस्त्र किंचिदपि न विद्यते तो स्त्रज्ञः ब्रह्मास्त्रप्रयोगोपसंहाराभिज्ञस्त्वमस्त्रतेजसा [illegible] स्त्रतेजसैवान्द[illegible] [illegible]मस्त्रतेजः अस्त्र

तथायं चावतारस्ते भुवो भारजिहीर्षया स्वानां चानन्यभावानामनुध्यानाय चासकृत् २५ किमिदं स्वित्कुतो वेति देवदेव न वेद्म्यहं सर्वतोमुख
मायाति तेजः परमदारुणं श्रीभग० वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितं नैवासौ वेद संहारं प्राणबाध उपस्थिते २७ न ह्यस्यान्यतमं किंचिदस्त्रं प्र
त्यवमर्शकं जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा २८ सूत० श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीरहा स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्मास्त्राय संदधे २९ सं
हत्यान्योन्यमुभयोस्तेजसी शरसंवृते आवृत्य रोदसी खं च ववृधातेऽर्कवह्निवत् ३० दृष्ट्वास्त्रतेजस्तु तयोस्त्रींल्लोकान्प्रदहन्महत् दह्यमानाः प्रजाः सर्वाः सांव
र्तकममंसत ३१ प्रजोपद्रवमालक्ष्य लोकव्यतिकरं च तं मतं च वासुदेवस्य संजहारार्जुनो द्वयं ३२

स्त्रतेजो जहि त्वमपि ब्रह्मास्त्रेणैवैतदभिभावयेत्यर्थः २८ इत्थं भगवता प्रोक्तमस्त्रसंहारोपायं श्रुत्वा परवीरहा फाल्गुनोऽर्जुनः अपः स्पृष्ट्वाऽऽचम्य तं कृष्णं
टी२ परिक्रम्य प्रदक्षिणीकृत्य ब्रह्मास्त्रायप्रतिभटं ब्राह्ममेवास्त्रं संदधे प्रयुयोज २९ ततस्तयोरुभयोरस्त्रयोस्तेजसी शरैर्वाणैः संवृते अन्योन्यं संहत्य संगत्य रोदसी द्यावापृथि
व्यौ खमाकाशं चावृत्य वेष्ट्य अर्कवह्नी इव ववृधाते वर्द्धिते ३० किंच ततस्त्रींल्लोकान्प्रदहत्तयोर्द्रौण्यर्जुनयोरस्त्रतेजः तत्प्रकारस्त्वनेनोक्तो दृष्ट्वा तेन दह्य
मानाः सर्वाः प्रजाः सांवर्तकं प्रलयाग्निममंसतामन्यन्त ३१ लोकव्यतिकरं लोकोपमर्दनरूपं प्रजोप[illegible] वासुदेवस्य मतमभिप्रायं चालक्ष्यार्जुनो [illegible]
स्त्रद्वयं संजहारोपसंहृतवान् ३२

किंचेदं कर्मास्मत्कुलस्याप्यनर्थकारीत्याह यैरिति अजितात्मभिरजितः क्रोधपरवशश्चात्मा मनो येषां तैर्यै राजन्यैर्ब्रह्मकुलं विप्रकुलं कोपितं कोप
विषयीकृतं अत एव शुचार्पणेनार्पितं प्रापितं दुःखितं सदित्यर्थः तेषां राजन्यानां कुलं सानुवंधमनुवंधिसहितं शाघ्रं हन्ति अत्र प्रदहनात्क्रियाक्ष
तं ब्रह्मकुलं कर्म तु राज्यकुलं ४८ हे द्विजा इत्थं धर्म्यं धर्मादनपेतं न्याय्यं न्यायाद्वीरेतनपेतं सकरुणं करुणया युक्तं निर्व्यलीकमसत्ता
रहितं समं मम विषमम् अनुरूपं महदुदाशयं भीरुं च राज्ञ्या द्रौपद्या वचांसि निशम्य धर्मसुतो युधिष्ठिरः प्रत्यनन्दत ४९ तथा नकुलादयः ये
चान्ये तद्व्यतिरिक्ताः पुरुषा याश्च स्त्रियः सर्वे ते प्रत्यनन्दन्ति ते वचनं विपरिणामेन पूर्वेणान्वयः ५० तत्र भीमस्त्वमर्षितः आहातमिति त
ना ऽस्य ब्रह्मबंधोर्वध एव श्रेयान् स्मृतः कुतः यतोऽयं भर्तुर्द्रोहेन राष्ट्रस्यात्मनः स्वस्य चार्थप्रयोजनाय सुप्तान् शिशून् हतवान् किं तु स्वपं वहतवानिति

यैः कोपितं ब्रह्मकुलं राजन्यैरजितात्मभिः तत्कुलं प्रदहत्याशु सानुबंधं शुचार्पितं ४८ सूत० धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत् राजा धर्म ५
सुतो राज्ञ्याः प्रत्यनंदद्वचो द्विजाः ४९ नकुलः सहदेवश्च युयुधानो धनंजयः भगवान्देवकीपुत्रो ये चान्ये याश्च योषितः ५० [illegible]मर्षि ५
तो भीमस्तस्य श्रेयान्वधः स्मृतः न भर्तुर्नात्मनश्चार्थे योऽहन्सुप्तान् शिशून्वृथा ५१ निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः [illegible] वदनं स
ख्युरिदमाह हसन्निव ५२ श्रीभग० ब्रह्मबंधुर्न हंतव्य आततायी वधार्हणः मयैवोभयमाम्नातं परिपाह्यनुशासनं ५३ कु[illegible]तं सत्यं
यत्सान्त्वयता प्रियां प्रियं च भीमसेनस्य पांचाल्या मह्यमेव च ५४ सूत० अर्जुनः सहसाज्ञाय हरेर्हार्दमथासिना मणिं जहार मू[illegible]जस्य सह मूर्द्धजं
वैः

५१ भीमस्य द्रौपद्याश्च गदितं [illegible] श्रुत्वा चतुर्भुजो भगवान् श्रीकृष्णः सख्युरर्जुनस्य वदनमालोक्य स्मयन्निव ईषद्धसन्निव इदं वक्ष्यमाणमाह ५२ तदेवाह
ब्रह्मबंधुरिति द्वाभ्यां ब्रह्मबंधुरिति हेतुगर्भं ब्रह्मबंधुत्वादयं न हंतव्य आततायी[illegible]त्वादप्ययं वधार्हणः वधमर्हतीति वधार्हणः नंद्यादित्वात्कर्तरि ल्यु
मयैवोभयमाम्नातं तथा हेत्वमनर्हत्वं चेत्युभयमपि सहेतुकमुक्तं अनुशासनमस्मदनुशासनं न ब्राह्मणं हन्यात् आततायीनमायांतं हन्यादेवावि
चारयन्नित्यादिशास्त्रात्तु मतमिदमुभयं पाहि पालय नातिक्रमस्व यथेदमुभयं पालितं स्यात्तथा कुर्वित्यर्थः [illegible] करोत्य[illegible]कृतं सान्त्वना
ऽनुचितमित्यभिप्रायेणाह कुर्विति प्रियां द्रौपदीं सांत्वयता त्वया यत्प्रतिश्रुतं प्रतिज्ञातं शिरोऽस्य च्छे[illegible]त्स्यामीति तदपि सत्यं यथा स्यात्तथा कुरु भीमादीनां प्रियं च कु
रु ५४ तत एव श्रीकृष्णेनोक्ताभावज्ञो हार्दं हृद्गतमभि[illegible] [illegible] साधु[illegible]स्य द्रौणेर्मूर्द्धन्यं मूर्ध्नि धारितं [illegible] मूर्द्धजैः केशैः सहितं यथा

तथाहृते मानीतं पशुनाज्ञस्यं पशुवत्सा शेनवद्धं पसुर्यथा पाशेन वध्यते तद्वद्वद्धं कर्मणाः स्वकृतस्य जुगुप्सितेन जुगुप्साशब्दात्स्वार्थसन्नन्ता द्रावेकः
निंद्यः पोरुस्तुनात्र वाङ्मुखम पकृतम पकारिणम र्जुनेनाप कृतवा गुरोः सुतं वा वत ... ... दृष्ट्वा द्रौपदी वामस्वभावादृतगर्भमिदं कुरुषु
स्वभावत्वान्ननाम ४२ अस्य गुरुसुतस्य वैधनेनापनं वृधन पूर्वकमान धनं वधने वान पुनश्चवा अस्यार्जुनस्यार्जुनकृतेकंवधनानवगीप
तिवा अस्तु हंती सतो द्रौपदीउवाच उक्तिमेवाहमुच्यतामित्यादिभिः सार्द्धैः पेचभिः एषद्रौणिर्मुच्यतांमुच्यतावस्याद्विरुक्तिः मोचनीयत्वेह
तुंद र्शयती विप्रिन एष्विवास्त्रणस्तश्चापिगुरुः ४३ नयथष्टुरुरीपन्नस्याः पिते त्यत्स्याह सरहस्यः इति भवताय स्मान्यहा दूरस्य न सहितो धनु
र्वेदः सविसर्गो पसंयमः प्रयोगो पसंहारसहितोऽस्त्रग्रामः अस्त्रसमुदाय स्त्रं प्रापितः ४४ स भगवान्न द्रोणएव एष प्रजोरूपेण वर्त्तते एतत्स्वद्रौ
द्रोणस्येवाकारांतरेण वस्थितिपरामर्शकः आत्मा वै पुत्रनामासीति श्रुतेरितिभाव उक्त विषयापकारेण यितेवा पक्षिपतेइति भावः ननुसत्सर्गतः

तथाहृतं पशुवत्पाशवद्धमवाङ्मुखं कर्मजुगुप्सितेन निरीक्ष्याकृ साधुकृतं गुरोः सुतं वामस्वभावाकृपयाननामच ४२ उवाच चास्यकृत्स्नस्य वैधना
नयनेसती मुच्यतामुच्यताभेष ब्राह्मणो नितरां गुरुः ४३ सरहस्यो धनुर्वेदः सविसर्गोपसंयमः अस्त्रग्राममशेषं भवता प्रापितो यदनुग्रहात् ४४
सएष भगवान्द्रोणः प्रजारूपेण वर्त्तते तस्यात्मनोर्द्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी ४५ तद्धर्मज्ञमहाभाग भवद्भिर्गौरवं कुलं वृजिनं नार्हति
प्राप्तुं पूज्यं वंद्यमभीक्ष्णशः ४६ मा रोदीदस्य जननी गौतमी पतिदेवता यथाहं मृतवत्सार्त्ता रोदिम्यश्रुमुखी मुहुः ४७ ॥ ॥

इत्याहृतस्येति तस्य द्रोणस्यात्मनः शरीरस्यार्द्धमर्द्धांशरूपा तत्पत्नी कृपी वीरसूः पुत्रवत्सा तेनान्वगात्तत्सामरणं कृतवती अर्द्ध मिति शरीरस्याभिप्रा
येणानपुंसकनिर्देशः अर्द्धो वा एष आत्मनो यत्पत्नीतिश्रुतेः प्रायेणार्द्ध मित्युक्तं द्रोणस्य स्वर्गतत्वेपि तदर्द्धशरीरभूता तत्पत्न्यपक्षि यतेवेति भावः
४५ तत्तस्माद्धे धर्मज्ञमृदुकः धर्माभिज्ञहे महाभागगुर्वे पत्नीनाहित्यस्य महाभागस्य युक्तं भवद्भिर्गुरूणांवहु मंतव्यं गौरवं कुलं गुरोः सं वधिकं वंशजमदुः
खं प्राप्तुं प्रापयितुं भवद्भिर्हेतुभिर्वृजिनं प्राप्तुं इति वा नार्हतिकिंत्वभीक्ष्णशः पौनःपुन्येन पूज्यं वंदनीयं च भवद्भिरित्यनुषंगः ४६ एतद्विषयाकृत्यान् पौनि
तराम हेमिवदुःखेवतास्यात तत्र वाजुचितमित्यभिप्रायेणाह मृतावत्साश्चापस्याः सातरवात्ता दुःखेन मुहुर्मुहुरश्रुमुखी यथा रोदिमि तथा ... स्य
जननी पतिरेव देवतायस्याः सा गौतमी गोतमस्य दुहिता कृपी मा रोदीत् ४७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ पुनः तत्र

भा.प्र
टी.४६

कितवैरस्तहृता छद्मपायेन वंचकैर्दुर्योधनादिभिर्हृतमजातशत्रोर्युधिष्ठिरस्य स्वंराज्यं साधयित्वा राज्ञः सादोपघ्नाः कचस्पर्शनेन क्षताप्रायुर्येषां तोने ।
वदत्तंतीणमायुर्येषां तानसतोदुष्टान्दुःशासनादीन घातयित्वा अर्जुनादिभिरितिशेषः ५ उत्तमकल्पकैः सुख्यकैरेरस्तैरमंत्रदर्शितैः त्रिभि
रश्वमेधैः युधिष्ठिरंयाजयित्वा पावनं पवित्रं तस्य युधिष्ठिरस्य यशः शतमन्योः शक्रस्य यशइव व्यततो दिक्षु विस्तारयामास ६ ततः पांडुपुत्रान् श
साद्दन्यांश्च आमंत्र्य आपृच्छ्य शैनेयः शिनेर्नप्ता सात्यकिः शैनेयोद्धवाभ्यां सात्यकिउद्धवाभ्यां सहितः आत्मनापूजितैः द्वैपायनआदिमुख्यैर्यथात
विप्रैः प्रतिपूजितः द्वारकांप्रतिगंतुंकृतमतिर्निश्चितमतिर्हेब्रह्मन् रथमास्थितः अधिष्ठितः ७ ततोऽभिधावंतीं भयेन विह्वलां उत्तरामभिमन्युपत्नीं
इत्थं विज्ञापयंतीमिति शेषः उपलेभे पश्चिद्ददर्शेत्यर्थः यद्वाभिधावंतीविज्ञापन पूर्वं मत्तवर्तमानां उपलेभ इत्यन्वयः ८ विज्ञापनमेवाह पाहीति द्वाभ्यां

साधयित्वाजातशत्रोः स्वंराज्यंकितवैर्हृतं घातयित्वासतोराज्ञः कचस्पर्शक्षतायुषः ५ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः तद्यशः पा ४
वनंदिक्षुशतमन्योरिवातनोत् ६ आमंत्र्यपांडुपुत्रांश्चशैनेयोद्धवसंयुतः द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः ७ गंतुंकृतमतिर्ब्रह्मन्
द्वारकांरथमास्थितः उपलेभेऽभिधावंतीमुत्तरांभयविह्वलां ८ उत्तरोवाच पाहिपाहिमहायोगिन्देवदेवजगत्पते नान्यंत्वदभयंपश्येयत्रमृत्युः
परस्परं ९ अभिद्रवतिमामीशशरस्तप्तायसोविभो कामंदहतुमांनाथमामेगर्भोनिपात्यतां १० सूतउ० उपधार्यवचस्तस्याभगवान्भक्तव
त्सलः अपांडवमिदंकर्तुंद्रौणेरस्त्रमबुध्यत ११ तर्ह्येवाथमुनिश्रेष्ठ पांडवाः पंचसायकान् आत्मनोऽभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाददुः १२॥

हे देवानामपि देव हे जगत्पते निखिलजगत्त्रातः हे महायोगिन् सर्वार्थदर्शिन् पाहि पाहि न विद्यते भयं यस्मात् तादृशं त्वत्तोऽन्यं न पश्ये अदर्शने हेतुं वदन्त
मान्विशिनष्टि यत्र त्वद्व्यतिरिक्तेषु परस्परं मृत्युर्मृत्यत्वस्मादित्यर्थः न हि स्वयं मृत्युवशोऽन्यं मृत्योस्त्रातुं प्रभुरिति भावः ९ ननु किं तव भयमुपस्थितं यस्मात्त्वम
या रक्षणीयेत्यत्राह अभिद्रवतीति हे ईश हे विभो तप्त अयसा लोहेन आयसो विकारः शरः मां मामभिद्रवति सम्मुखमागच्छति हे नाथ स शरो मां कामं यथेष्टं दहतु मम गर्भ
स्य यथा मा निपात्यतां तत्र यानं त्वद्धार्णो सर्वः १० सूत उवाच यावद्वचो वधार्यो भक्तवत्सलो भगवान् आबुध्यत किमिति अपांडवं पांडवशून्यं कर्तुं इदं द्रौ
णेरश्वत्थाम्नो द्रौणेरस्त्रं द्रोणिप्रयुक्तं ब्रह्मास्त्रमिति ११ यथा भगवानेदमबुध्यत तर्ह्येव हे मुनिश्रेष्ठ शौनक पांडवा अपि आत्मनोऽभिमुखमागच्छतः दीप्तान् पंचसायक

ग्र ५

ततो दृष्ट्वा विमुच्य पूर्वमेव बालानां हत्वा याहतप्रभा यस्य तेजसा तेजः प्रदेनमरिनाञ्चव नं रहितं सुतरां हतप्रभं शिबिराद्भिः सायथद्वा हि निः सारयामा
स। ५८ तत्रैवमापि स्वप्रतिश्रुतं भीमग दितं च न कृतमेवेत्याह शोकमानं शोन कं प्रमोह [illegible] मिति वृपमे जुदुनं दु विशा दानं धोनापहरणं स्था
नान्नियोपरणं च तत्पूर्वं एव द्विवृक्षवं धनं वधः अन्योदेहिकः शिरः पात्यादेर्द्धः दृः एः नास्ति हि तदेतत्त्र [illegible] तमेवेतिनै व वधो विकृत प्राणनेति ॥ तेन
भावः ५७ ततः सर्वे पाण्डवा युधिष्ठिरादयः कृष्णया द्रौपद्या सह शोकपीडिताः संतो मृतानां स्वानां पुत्रबन्धूनां युक्तं तथा निर्हरणादिकं तत्र चक्रुः ५८ इति
ना ५ प्रश्नमे सप्तमः ७ अथ ते पाण्डवाः सं परेतानां स्वानां उदकं तिलोदकं एतच्च आद्यादीनामप्युपलक्षणं इध्वतां पुत्रं तर्पणकामयमानानां सतुं उदकं दातुं स्त्रियः
पां ८ द्रौपद्यादिस्त्रीः पुरस्कृत्य कृष्णेन सहिता गंगां ययुः १ तत्र ते सर्वे पाण्डवादयो भूयः पुनः विलप्य संपरेतानामुदकं निनीय प्रदाय हरेः कृष्णस्य पद्याञ्जयोः रजसा ॥

विमुच्य सेनावर्ध्वं बालहत्याहतप्रभं तेजसा मणिना हीनं शिबिरान्निः सारयामास ५८ वपनं दुविशासनं स्थानान्निर्यापणं तथा एष हि द्विवृक्ष वधः नां
वधो नान्योस्ति देहिकः ५७ पुत्रशोकातुराः सर्वे पाण्डवाः सह कृष्णया स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं ५८ इति श्रीम [illegible] सौप्तिके पर्वणि
[illegible] नाम सप्तमोऽध्यायः ७ स्त ३० अथ ते संपरेतानां स्वानामुदकमिच्छतां दातुं सकृष्णा गंगां ययुः पुरस्कृत्य पत्नीः स्त्रियः १ ते तिनी [illegible] विलप्य
च भूयः पुनः अस्तुना हरिपादाज्वरजः पूतसलिले २ तत्रासीनं कुरुपतिं धृतराष्ट्रं महात्मजं गान्धारीपुत्रशोकार्तं पृथा कृष्णा च मा [illegible] २ सा ॥
ग्र ५ न्त्वयामास मुनिभिर्हतबंधून् ... चापितान् अतेकाल समागति दर्शयन्न प्रतिक्रिया ४ ॥

नाता: ८ १ ते सरितः गंगाया जले आप्लुताः स्नात्वा विशुद्धा बभूवुरित्यर्थः २ तत्र गंगातीरे आसीनमुपविष्टं महात्मजं कुरूणां पतिं धृतराष्ट्रं पुत्रशोकार्तमिति
गान्धारीकृष्णयोर्विशेषणं तत्र गान्धारी धृतराष्ट्रभार्या पृथा कुन्ती कृष्णा द्रौपदी माधवः कृष्णः सान्त्वयामासे त्युत्तरेणान्वयः सहात्मजैर्मित्रैश्चानुजप्रादः
पाण्डुसुत धर्मराजादीनां उपलक्षकः तेषां मप्यपुत्रशोकार्तत्वेन सांत्वनीयत्वान्न त्वविदुरपरं तस्य पूर्वमेव धृतराष्ट्रेण निर्यापितत्वाद्यादवत्वं तथा नेत
रमोगामिन स्तर व स्थानां संभवात् ३ हता बंधवोयेषां तान् तत एवदुःखशोकेनार्पितान् हतान् धृतराष्ट्रादीन् बंधून् मृतेषु लोकेषु न विद्यते प्रति
क्रिया प्रत्युपायो यस्यास्तां कालस्य गतिं जन्ममरणाद्यापादन रूपां दर्शयन् मुनिभिः सह सान्त्वयामास माधवः स्वजनानुपगं योजनोपः एवकुरु
स्वापितेषु ४ ॥

नमस्ये२

भा॰प्र॰ मंतरेणनास्माकं शरणमस्त्यतः कथमनन्यात्मनोस्मान् विहाय परं नु मुकुंदेहीति विज्ञापयंति तत्र तावल्लौकिकपुरुषेव जातज्ञापनापानितरसाधार
टी॰ ४ णैर्धर्मैर्विशिष्टं नमस्करोति नमस्य इति आद्यं सर्वजगत्कारणं प्रकृतेः परं पुरुषमीश्वरं त्वां नमस्करोमि नमस्कारेण भजामीत्यर्थः नमः
शब्दाद्ध्वन्वेरकलहाश्च क एवमग्रेपि करणे इत्यतः करण इत्यत्र वर्तमानेन धाम्ना परिवर्जितः कमिति करोतेः कृत्वा र्थत्वादात्मनेपदं सां
ख्याभिमतपुरुषव्यावृत्त्यर्थमीश्वरमित्युक्तं सोपि चेश्वरत्वं ब्रह्मादिसाधारणमिति तद्व्यावृत्त्यर्थं सर्वभूतानामंतर्बहिरवस्थितमित्युक्तं
ते५ अनेन यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति श्रुतिरूपमुक्तं भवति अनेन दृश्यतावशेषत्व
फलितं सर्वभूतानां ब्रह्मादिस्थावरांतानामंतर्बहिश्च व्याप्य नियंतृतयावस्थितमित्यर्थः प्रकृतेः परत्वे हेतुरलक्ष्यमिति प्रकृतिवन्न लक्ष्यते न भि२
दृश्यत इत्यत एव यद्यंतर्बहिश्चावस्थितं तमप्यलक्ष्यमदृश्यं १८ तत्र हेतुः मायाजवनिकाच्छन्नं मायैव जवनिका तेन पच्छन्नं तिरोधायकत्वात्तया आ

कुंत्युवाच नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परं अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितं १८ मायाजवनि
काच्छन्नमज्ञाधोक्षजमव्ययं न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा १९ ॥

च्छन्नत्वाद्धेतुमतः पाच्छन्नं तिरोहितं इंद्रियाविषयमिति यावत् किं सर्वेषामप्यतींद्रियं नेत्याह अज्ञेति अज्ञा इंद्रियवशगा अधोक्षजाय स्मात्
सोऽधोक्षजः इंद्रियैरविषय अज्ञानामनुपासकानामधोक्षजमज्ञाधोक्षजं तत्र हेतुरव्ययमिति नव्येति विविधं विकारं गच्छतीत्यव्ययं विविधवि
कारभागेवाज्ञानज विषयत्वव्यंपात्वादज्ञाधोक्षजइत्यर्थः— अनेनैतत्सूच्यते योगविशुद्धमनसां तु ग्राह्य इति तथाचश्रूयते नचक्षुषा पश्यति
कश्चनैनं नमांसचक्षुरभिवीक्षतेतं दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः हृदा मनीषया मनसाभिक्लृप्ता य एनं विदुरमृतास्ते भवंतीत्यादि नत्वाह न ल
क्ष्यसे मूढदृशेति योगापरिशुद्धधियानः न लक्ष्यसे न दृश्यते न तु सर्वेषामदृश्य एवेत्यत्र हेतुमाह नटो नाट्यधरो नटो यथा दृश्यते तथा दृश्य सइत्यर्थः य
था मूढदृशा नट यथात्म्यमजानता पुंसा नाट्यधरो नटो यथा न लक्ष्यते अयमेवेविधशक्तिर्ज्ञायते किंतु नाट्योपयुक्तवेषविशिष्टतयैव दृश्यते त
द्वत् अनेनाज्ञाधोक्षजइत्यनेन च योगपरिशुद्धमनोग्राह्यः परिशुद्धमनसां ग्राह्य इति तत्तत्प्रसंगेनैवानाद्यलक्ष्यमुपपादितं १९ ॥ ॥

कुतोने२ न२ न२

नदाऽनन्यविषयआत्मा मनो येषां तेषाम नुचरद्व काशंपांडवानांत द्व सनंदुः खमवलोक्य विभुः कृष्णः स्वासाः धारोन सुदर्शनेनास्त्रेण
स्वानो पांडवानां रक्षां मधात् करोत् सुदर्शनेन तान्स्वापकान्निरस्य पांडवानरक्षेत्यर्थः १३ अंतः सर्वांतरात्मतयावस्थितः आत्मांतः प्रविश्य
धारक श्च भगवान् तएव योगेश्वरः निरतिशयस्त्वा पांडवीउत्तराया गर्भं प्रविश्य पांडवान् स्वदर्शीत्यर्थः हरिः कृष्णः कुरुतंतवे कुरुवंशाभिवृद्धये
पा० राप्य वैराटन्या विराटपुत्र्याउत्तरायाः गर्भं स्वमायात्मने वा स्त्रेण वैराटन्याउदरे स्व पंचप्रविश्य तद्गर्भं यथा ब्रह्मास्त्रेण न दह्येत तथा रक्षत् गर्भं प्राप्तं सुद
र्शनेनास्त्रं विच्छेदेत्यर्थः १४ कथम प्रतिभटं ब्रह्मास्त्रं सुदर्शनेनापि निरस्तमिति शौनकाभिप्रेतं चोद्यमनूद्य न प्रतिवंतिः यद्यपीति ब्रह्मशिरोनामा
स्त्रम प्रतिक्रियं केनाप्य निवार्यं च तथापि अप्रतिहतं तत्पापि हे भृगूद्वह वैष्णवं विलासः संबंधितेजः तेजा रूपं सुदर्शनं प्राप्य प्रशमम प्राप्तं सु
८५ दर्शने तदप्रतिक्रियं ब्रह्मास्त्रं सुदर्शनमेव सर्वाप्रतिक्रियमितिभावः १५ नेत्र न विस्मयः कार्य इत्याह मेति सर्वेभ्यो वाश्चर्येभ्यो वाश्चर्यमयेत्रा

व्यासनं विचित्रते षामनन्यविषयात्मनां सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः १३ अंतः स्थः सर्वभूतानामात्मा योगेश्वरो हरिः स्वमायया
वृणोद्गर्भं वैराटन्याः कुरुतंतवे १४ यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियं वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह १५ मामंस्था ह्येत
दाश्चर्यं सर्वाश्चर्यमयेऽच्युते य इदं मायया देव्या सृजत्यवति हंत्यजः १६ ब्रह्मतेजो विनिर्मुक्तैरात्मजैः सह कृष्णया प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती

श्चर्यं शक्तिप्रवर्तके अच्युते स्थाश्रिताऽन्ब्रह्मशापादिभ्यस्त्वादीन्न च्यावयतिन विहतान्करोतीत्यच्युतः तथाभूते भगवते न सुदर्शनेन ब्रह्मास्त्रं निरस्तमिति
तदाश्चर्यं मामंस्थाः नमन्यस्व सर्वाश्चर्यमयत्वमेव व्यंजयितुं विशिनष्टि यो भगवानच्युतः अजः स्वयं कर्मापेतोऽपि मायादिषड्भावविकार [illegible] ६
देच्छिदचिदात्मकं कृत्स्नं जगन्मायया देव्या देवस्य स्वरूपभूतया चिन्मायया आश्चर्यशक्त्या सृजत्यवति हंति च कृत्स्नजगत्सृष्टिस्थितिलयलीलस्य
क्रियेदं तत्सुदर्शनं निरस्तं ब्रह्मास्त्रमिति चित्रं तेनाश्चर्यं कार्यमित्यर्थः १६ ततो ब्रह्मतेजसा ब्रह्मास्त्रेण विनिर्मुक्तैरात्मजैः धर्मराजादिभिः कृष्णा
पद्या च सह सती पतिव्रता कुंती प्रयाणाभिमुखं कृष्णं इदं वक्ष्यमाणमाह १७ तदेवाह नमस्ये इति षड्भिः प्रयाणाभिमुखं कृष्णमवलोक्य तां हे
पमसहमाना तत्तत्तानि वृत्तान्तस्मितं लौकिकोपि कश्चिदृणाद्युपमानाश्चितान्नरहस्य कुमस्कृत्य परमकारुण्येतन्नाना चिंतविधिं विधंतिंच स्तुपाक
स्ववृत्तयोपलाषा कृतान्यर्थादिभ्यतेनोपाश्रितवान्न सज्जनलधेराश्मिवर्तिर्हरसतिरयतिपयसस्तदपेपारसस्मनसैव गोचरसादिज्ञानानिर्विशेषितस्य

स्कं॰ स्पानाः २

भा० पु० ५८

कोसौ विपद्गणः यस्माद् विमोचितेत्यत्राह विषादिति महाग्नेर्लाक्षागृहाग्नेः पुरुषादानां राक्षसानां दर्शनाद् भयात् वनवासकृच्छ्रतः वनवासक्लेशात् मृधेषु युद्धेषु अनेकमहारथानामस्त्रेभ्यः द्रौणेरस्त्रतः ब्रह्मास्त्रात् हरे रक्षितास्म [illegible] विषादिभ्यो रक्षणमहाभारत एवगंतव्यः विस्तरभयान्नात्र लिख्यते २४ यदेतद् विपद्गणनिवारकत्वं तदेतन्नवक्तिं यद्यपि देवतान्तरे तेषामपि प्रार्थयन्नाह विपद इति हे जगद्गुरो तत्र तत्र शश्वत्सदा नास्त्यानिरसनी याश्वाश्रितानां विपदः संतु [illegible] नमतन्निरसनाय यत्नस्त्वया कार्य इति भावः यद्यस्तु नु भवदर्शनं भवतो दर्शनं स्यात् न विद्यते पुनर्भवस्य संसारस्य दर्शनं यस्मात् तथाभूतं भवदर्शनं यदि स्यात् संभावनायां लिङ् सकलायत्नमूल संसारनिपरिहारकत्वमंतद्यदि स्यात् विपदः संतु नाम अर्थादेव नान्ये वर्तेरिति भावः २५ नन्वहमीश्वरश्च नहि त्वमिव सर्वे पि मामेवं विधं किं न वदंतीत्यतआह जन्मेति ऐश्वर्यशब्दो धनपरः श्रुतशब्दो विद्यापरः जन्मैश्वर्यश्रुतानां सत्कुलप्रसवधनविद्यानां श्रीभिः समृद्धिभिरेधमानः मदो यस्य स पुमान् त्वाम् अभिधातुं न चार्हति त्रिमदोन्मत्तत्वेन नश्वरया थाश्च विवेकाभावादिति भावः अनर्हत्वमेव

विषान्महाग्नेः पुरुषाददर्शनादसत्सभायावनवासकृच्छ्रतः मृधे मृधेनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेभिरक्षिताः २४ विपदः संतु नः शश्वत्तत्र तत्र जगद्गुरो भवतो दर्शनं यत्स्यादपुनर्भवदर्शनं २५ जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान् नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरं २६ नमोकिंचनवित्ताय निवृत्तगुणवृत्तये आत्मारामाय शांताय कैवल्यपतये नमः २७ मन्ये त्वां कालमीशानमनादिनिधनं विभुं समंचरंतं सर्वत्र भूतानां यन्मिथः कलिः २८ ॥

कस्तर्हि त्वामभिधातुमर्हति तत्राह अकिंचनगोचरं नास्ति किंचन येषां ते अकिंचनाः निःकामास्तेषां गोचरं २६ अत एव त्वं विरक्तिविद्यावर्तकैरीश्वरासाधारणधर्मैर्विशिंषंती नमस्करोतीति नमइति अकिंचनानां वित्ताय विद्लृ लाभे इति धातुर्विद्यते लभ्यत इति वित्तः तस्मै निवृत्ता गुणानां रजआदीनां वृत्तयः कामक्रोधादयो यस्य तस्मै अनेनाविद्यावृत्तिः शांताय ऊर्मिषट्करहिताय अशनायापिपासाशोकमोहजरामृत्यवः षडूर्मयः अनेन बद्धजीववद्यावृत्तिः तत्र हेतुरात्मारामाय स्वानुभवैकपराय कैवल्यं प्रकृतिसंबंधराहित्यं मोक्ष इति यावत् तस्य पतिं तस्मै मोक्षप्रदायानेन मुक्तनित्यजीवव्यावृत्तिः २७ ननु ब्रह्मरुद्रेन्द्रादयस्तान्नमः कस्मिन्वद्धत्वविधो न [illegible] मिमत्राह मन्य इति ईशानं ब्रह्मादीनपि स्ववशीकुर्वाणं काले त्वां मन्ये कालशरीरकं त्वां मन्य इत्यर्थः अत एव कालकृतजन्ममरणादिरहितं नन्वहमपि प्राकृतवद्वैषम्यादिमानेव ततः कालविशिनष्टि सर्वत्र स[illegible] चरन्[illegible] [illegible] कालानिमित्ताद्भूतानां मिथः कलिः कलहो भवति समंचरंतं मित्यनेन कालशरीरकस्य न वैषम्यनैर्घृण्यादिकमस्तीति सूचितं यन्मिथः कलिरित्यनेन नाप्यापितु

भूतानां कलहे जीवकर्मानुसारेण सुखदुःखादीन्यपि भिन्नमात्रमस्तीति वृत्तिः २८ ॥ राम ५८

मत्यस्वरूपगतं

अथ परिशुद्धमनोभ्यास्त्वं वदती योगानधिकारिण्यो परिशुद्ध [illegible] स्त्रियो वयं कथं जानीमहि इत्याह तथेति तथा [illegible] त्यर्थः मुनीनां सदात्मस्वरूपमननशीलानाममलात्मनां विशुद्धमनसां परमहंसानां [illegible] मार्ग शब्देन विषय [illegible] र्थवाची भक्ति योगश्च पंचस्यार्थे विषयभूतं भक्तियोगरूपं त्वां स्त्रियो वयं कथं पश्येमहि जानीमहि नहि किंचि [illegible] नटं नाट्य धरं नाटयाः पपुक्तनामरूपादिविशिष्टत्वेनैव जानते तेन तु तत्वतो ऽपि न जानाति नामरूपं [illegible] इति तद्द्वितीयाद् [illegible] तारे यानि कृष्णवासुदेवकी नन्दनादिनामानि यच्च पंकजनाभाद्यवयवो ये तं तान्येव सर्वेषामेव [illegible] समानानि केवलं जानीमह इत्यभिप्रायेण उक्तनामरूपविशिष्टं नमस्करोति कृष्णायेति श्लोकद्वयेन निगदेनैव व्याख्यातं २० २१ २२ नन्ववतारदशायामयोगपरिशुद्धमनोभिरपि सर्वैर्दृश्यमानस्य भगवतः कथमलक्ष्यमलक्षिताधोक्षजमनलक्ष्य इत्यादिना [illegible] नमास्य चक्षुरभिवीक्षितेनैवेन चक्षुषा यश्यति क [illegible]

तथा परमहंसानां मुनीनाममलात्मनां भक्तियोगविधानार्थं कथं पश्येमहि स्त्रियः २० कृष्णाय वासुदेवाय देवकीनन्दनाय च नंदगोपकुमाराय गोविंदाय नमो नमः २१ नमः पंकजनाभाय नमः पंकजमालिने नमः पंकजनेत्राय नमस्ते पंकजांघ्रये २२ यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात् २३ ॥

दिभिः श्रुतं च अदृश्यत्वमिति चेन्न सर्वैर्देवमनुष्यादिभिरज्ञानेन दृश्यमानत्वेपि तद्विलक्षणत्वेनादृश्यत्वाद्विलक्षणदर्शनमेव च लक्ष्यामित्यादिभिः प्रतिपाद्यते नरदृष्टेनापि तद्देवावगन्तव्यं जानन्त्याः अपि कथं पश्येमहि स्त्रिय इत्युक्तिलौकिक परिपाद्यभिप्रायिका यतस्त्वं सा [illegible] कृतेः परः परमपुरुष ईश्वरस्तत एवास्यामवतारदशायामपि स्वस्वभावमजहत्स्वासाधारणान् धर्मान् दर्शयसीत्यभिप्रायेणाह यथेति हे हृषीकेश खलेन दुरात्मना कंसेन चिरं शुचा शोकेनार्पि [illegible] नि धापिता शोकं प्रापितेति यावत् या च देवकी यथा विमोचिता तथाहमपि सपुत्रा हे विभो सर्वशक्ते त्वयैव नाथेन विपद्गणान्मुहुर्मुहुर्विमोचिता किं किमेतस्मान्नेत्यादि विमोचितेत्यर्थः अनेन स्वार्थनिरपेक्षत्वं परदुःखनिराचिकीर्षात्वं कृपालुत्वं आश्रितानिष्टपरिहर्तृत्वं निर्मलान्तःकरणत्वं [illegible] निरूपितं भवति २३ ॥ ॥ ॥

ति २

भा० पू०
४९

यतोविडंबनमात्रंनतुतात्विकमतएवचतदवतारप्रयोजननिमित्तंचेदमेवेतिनिश्चेतुमशक्तास्तत्रनानातर्कयंतीत्याह केचिदिति पंचभिः
केचित्तदवतारप्रयोजननिर्णयाय प्रवृत्तानांमध्ये अजमपित्वांप्रियस्यभक्तस्यपुण्यश्लोकस्ययदोःकीर्तयेतद्वंशेजातमाहुः यदुवंश
कीर्तिजननायतद्वंशेजातमाहुरित्यर्थः यथामलयस्यपर्वतस्यकीर्तयेचंदनंजातंवदंतितद्वत् ३२ अपरेतुसाधुलोकस्यक्षेमाय
सुरद्विषांवधायचाजस्त्वंवसुदेवस्यदेवक्यांताभ्यांपूर्वजन्मनियाचितःअभ्यगात् पुत्रत्वेप्राप्तइत्याहुः वसुदेवस्योत्पादा[illegible]
त्वविवक्षयाषष्ठी ३३ अन्येतूदधौअर्णवेनावइवभूरिभारेणसीदंत्याःक्लिश्यंत्याभुवोभारायहारायात्मभुवाचतुर्मुखेनार्थितोभ
गवान्जातइत्याहुः ३४ केचनतुअस्मिन्लोकेविद्यादिभिःक्लिश्यमानानांजनानांश्रवणस्मरणार्हाणिचेष्टितानिकरिष्यन्

४३

केचिदाहुरजंजातंपुण्यश्लोकस्यकीर्तये यदोःप्रियस्यान्ववायेमलयस्येवचंदनं ३२ अपरेवसुदेवस्यदेवक्यांयाचितोऽभ्य
गात् अजस्त्वमस्यक्षेमायवधायचसुरद्विषां ३३ भारावतारणायान्येभुवोनावइवोदधौ सीदंत्याभूरिभारेणजातोह्यात्मभु
वार्थितः ३४ भवेस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः श्रवणस्मरणार्हाणिकरिष्यन्निति केचनः ३५ शृण्वंति
गायंतिगृणंत्यभीक्ष्णशःस्मरंतिनंदंतितवेहितंजनाः तएवपश्यंत्यचिरेणतावकंभवप्रवाहोपरमंपदांबुजं ३६ ॥श्री॥ ॥

नन्वाहुरित्यर्थः अविद्यादेहात्माभिमानादिनिमित्तमज्ञानं कामस्तन्मूलकशब्दादिविषयाभिलाषः कर्माणितदनुकूलव्यापारात्मका
नि ३५ अविद्यादिभिःक्लिश्यमानानांजनानांश्रवणाद्यर्हाणिइत्यनेनभगवच्चेष्टितानांक्लेशापहर्तृत्वंसूचितं तच्चनसा
क्षात्किंतुसंसृतिनिवर्तकभगवच्चरणारविंदसाक्षात्कारावहभक्तियोगनिष्पादनद्वारेत्यभिप्रायेणभगवच्चेष्टितश्रवणादिपर ५०
णांतच्चरणांबुजसाक्षात्कारेणनैर्भयमित्याह शृण्वंतीति येजनास्तवेहितंचेष्टितं शृण्वंति वक्तृसान्निध्ये गृणंतिश्रोतृसान्नि
ध्येतदुभयासंनिधौचस्वयंगायंतिस्मरंतिनंदंतिच तएवभवप्रवाहस्यसंसारस्यप्रवाहस्योपरमोयस्मात्तत्तावकंत्वदीयंपदांबुजम
चिरेणपश्यंति ३६

नत्वहमपि कांश्चिदनुगृह्णन् कांश्चिन्निगृह्णन् कथं वैषम्यादिरहितः [illegible] नेति हे [illegible] विडंबनं यन्मनुष्याकारमीहमानस्य कुर्व
णस्य तव चिकीर्षितं न कोपि वेद कश्चिन्निगृह्यते यं तं तथानुगृह्णन् तथा करोतीति न वैषम्यादिकम् [illegible] पूतनाशकटयमलार्जुनधेनु
कके शिकुवलयापीडचाणूरमुष्टिकतोसलकंसादिवधनिग्रहस्यापि तत्तेषां निरतिशयपुरुषार्थ [illegible] समुक्तिहेतुत्वदर्शनादिति भावः
यत एव मत एव त्वयि वैषम्यादिरहिते तदापाययतां नृणां मतिरेव विषमेत्याह नयस्येति कर्हिचिदपि दयितः प्रियो द्वेष्यश्च नास्ति यस्मिन्नृ
णां मतिर्विषमा रजस्तमोत्वपादयथा भवंति नृणां विडंबनमीहमानस्य मनेन नरचेष्टानुकारमात्रमेव न तु सर्वथा तत्सजातीयचेष्टि
तं जन्मकर्म च मे दिव्यमिति भगवतो वोक्तत्वादित्युक्तं सूचितं २८ विडंबनत्वमेवान्यथानुपपत्त्या द्रढयति जन्मेति अजस्य [illegible] रहितस्य
कर्मयिन्नोत्पत्तिरहितस्याकर्तुः प्राचीनकर्मानुरूपप्रवृत्त्यधीनकर्मरहितस्यात्मनः सर्वांतरात्मनस्तव तिर्यगादिषु जन्म न तु सजातीयं क

नवेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडंबनं नयस्य कश्चिद्दयितोस्ति कर्हिचिद्द्वेष्यश्च यस्मिन्विषमा मतिर्नृणां
२९ जन्मकर्म च विश्वात्मन्नजस्याकर्तुरात्मनः तिर्यङ्नृषिषु यादस्सु तदत्यंतविडंबनं ३० गोप्याददे त्वयि कृतागसि दाम
तावद्या ते दशाश्रुकलिलांजनसंभ्रमाक्षं वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति ३१

र्म चेति यत्तदत्यंतविडंबनमेव अजस्याकर्तुरात्मनः [illegible] घटन इति भावः तत्र तिर्यक्षु वराहादिषु ऋषिषु भार्गवात्रेयकार्द
सुत्सु राघवयादवादिषु यादस्सु मत्स्यकूर्मादिषु जन्मेति [illegible] सु विडंबनमात्रं ३० न चेदं घटत इत्यभिप्रायेणाह गोपीति तावद्यदा ह
कृतमागोऽपराधो येन तथाभूते सति गोपी यशोदा दाम रज्जुमाददे बंधनार्थं परिजग्राह तदा अश्रुभिः कलिलं कलुषितं अंजनं य
स्तत्संभ्रमेण भयस्य चकाटाय युक्तं [illegible] वक्त्रं निनीय उन्नीय ऽन्नाम्य अश्रुकलिलेत्यादिक्रियाविशेषणं वा अश्रुकलिलांज
संभ्रमाक्षं यथा तथा वक्त्रं निनीय प्राप्येत्यर्थः यस्मात्त्वत्तो भीरपि बिभेति तस्य तव भयभावनया भयाभिनयेन स्थितस्य तस्य सा दशा
मां विमोहयति अत्र भीशब्देन सर्वेषां भयहेतुः मृत्युर्लक्ष्यते भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषादग्निश्चेन्द्रश्च मृत्युर्धावति
पंचम इत्युक्तविधस्यासंभावितभयस्य तव यत्सर्वथा तावद्विमोहयति मूढं करोति यस्मान्न नरचेष्टानुकरणमात्रमिदमिति तात्पर्यमिति तात्
पर्याशयः ३१

भा०पु०
५०

साभिप्रेततरमनुमताञ्जलिः परमात्मृ इति पूर्वं देवप्रसादिनी त्युक्तविधांजलिरेवोयायोनततोन्योस्तीत्यभिप्रायेणकेवलमनितरसाधारण
गुणविशिष्टसंबोधनंनमस्करोति श्रीकृष्णेति हे श्रीकृष्ण सर्वलोकसुखकर कृष्णोर्जुनस्तस्य सखा कृष्णसख इत्यसंबोधनं वसीना
न्वयभवा वृष्णयस्तेषु ऋषभ निजुद्धामवत्युपलक्षितलोको यद्ववक्वावनिराजन्यानांवंशस्यदहन यथावेणूनांदहनोग्निर्नाशकः तद्वद्राजन्यकुल
नाशकः अनपवर्गमनंतवीर्यं यस्य हे गोविंद गवां द्विजानां सुराणां चार्तिंहिरावतारो यस्य योगेश्वर सूक्ष्मदर्शिन्नखिलगुरो हितोपदेष्टः
४३ इत्थं कलानिमधुराणि यदानीवचांसितैः प्रथयाकृत्याकर्त्रापरिणुतः परिगीतो खिलउदयो महिमा यस्य स वैकुंठः श्रीकृष्णः
मायया हासात्मिकया प्रत्यशक्त्या लोकं मोहयन्निव मंदमीषज्जहास हसितवान् मंदमिति क्रियाविशेषणं ४४ तावत्स्वपुरं यानु

श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविंद गोद्विजसुरार्तिहरावतार योगेश्वराखिलगुरो
भगवन्नमस्ते ४३ सूत उवाच इत्थं पृथायैत्यकलपदैः परिणुताखिलोदयः मंदं जहास वैकुंठो मोहयन्निव मायया ४४ तावा
दुमित्युपामंत्र्य प्रविश्य गजसाह्वयं स्त्रियश्च स्वपुरं यास्यन् प्रेम्णा राज्ञा निवारितः ४५ व्यासाद्यैरीश्वरेहाज्ञैः कृष्णेनाद्भुतक
र्मणा प्रबोधितोपीतिहासैर्नाबुध्यत शुचार्पितः ४६ आह राजा धर्मसुतश्चिंतयन्सुहृदां वधं प्राकृतेनात्मना विप्राः स्ने
हमोहवशं गतः ४७ अहो मे पश्यताज्ञानं हृदि रूढं दुरात्मनः पारक्यस्यैव देहस्य बह्व्यो मेक्षौहिणीर्हताः ४८ ॥श्री॥

मुपुक्तो भगवान् सांप्रत्यामन्त्याः स्त्रीश्चवाह्नमोमित्युपामंत्र्यांगीकारपूर्वकमनुज्ञाप्य प्रेम्णा राज्ञा युधिष्ठिरेणच निवारितः गजाह्वयं हास्तिनपु
रमेव प्राविशत् प्रविश्येति पाठे प्रविश्य तत्रैव कंचित्कालमुवासेति शेषः ४५ तदा ईश्वरेहाज्ञैरीश्वरचेष्टाभिज्ञैर्व्यासाद्यैरद्भुतकर्मचेष्टित
यस्य तेन श्रीकृष्णेन भगवताच इतिहासैः प्रतिबोधितोपि धर्मसुतः अत एव शुचार्पितः नाबुध्यत कालस्य गतिरीदृशीति न विज्ञातवान् ४६ किं
तु हे विप्राः बंधुसुहृन्मोहयोर्वशं प्राप्तः अत एव प्राकृतेन देहे नतदनुवं आदिप्रवणेन आत्मना सुहृदां वधमेव चिंतयन् धर्मसुतो राजा
जायुधिष्ठिरमब्रवीत् ४७ तदेवाह यावत्समाप्तिः अहो दुरात्मनो मम हृदि रूढमज्ञानं पश्यत तदेव दर्शयति पारक्यस्य श्व
गालादिभक्ष्यस्य देहस्यैव देहसुखार्थमेव मम यावत्यः अक्षौहिणीर्बह्व्यो हि एपः हताः ४८ ॥ ॥ ॥श्री

रास
५०

मना

तदेवं संस्तुत्य अधुनाभ्यागमुपसंहरेति सूचयितुं तत्पदांभोजैकशरणान् स्मान् महाननुभूय सहसेकिमितिकाक्वाह त्रयीति षड्भिः स्वकृतेस्वा
र्थं त्वमपीहितः किं त्वरतः किमित्यर्थः यूयं स्मात्प्रभो सुहृदो नु जीवितो अन्त्यो भवतो स्मान् अधुना जिहासतिस्वीकर्तुमिच्छसि हीनाः त्यागान् अर्हतां सू
चयितुमात्मनो विशिनष्टि येषां भवतः पदांबुजाद् अन्यत् परायणं प्रेप्सुः प्रापकं आश्रयं च नास्ति अतएव राज्ञा तु राज्ञां मध्ये जिनोहमेव जो
जितदुःखानां येषाम् अन्यत्परायणं नास्ति तान् अस्मान् इति अन्वयः ३७ सर्वमिदं निर्दिशति कयावत् अत्रूपैः संपन्नेन अस्माकं तयानिरीक्षणेनास्मे
भायेणाह क इति नामरूपाभ्यामुपलक्षितस्येति शेषः मनुष्यसजातीयनामरूपाभ्यामुपलक्षितस्य तव दर्शनं हृषीकाणां इन्द्रियाणां
ईशितुः करणाधिपस्य देवतास्य दर्शनमिव यर्हि यदा यदोपेक्षां जानीते पाण्डवाः वयं यदुभिः सह के न केनापि तव दर्शनेनैव नागुणेन यु
क्ताः किंतु वत्कृपयैव सज्जनामिति भावः तेवयं नामरूपाभ्यां कइतिवान्वयः तव दर्शनात् सुखादिनामानायसादिरूपेणवानित्यादि

अप्यद्य नस्त्वं स्वकृतेहित प्रभो जिहाससि स्वित्सुहृदोनुजीविनः येषां न चान्यद्भवतः पदांबुजात्परायणं राजसु योजितांह
सां ३७ के वयं नामरूपाभ्यां यदुभिः सह पाण्डवाः भवतोदर्शनं यर्हि हृषीकाणामिवेशितुः ३८ नेयं शोभिष्यते भूमिर्यथे
दानीं गदाधर त्वत्पदैरङ्किता भाति स्वलक्षणविलक्षितैः ३९ इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः वनाद्रिनद्युद
न्वन्तो ह्येधन्ते तव वीक्षितैः ४० अथ विश्वेश विश्वात्मन्विश्वमूर्ते स्वकेषु मे स्नेहपाशमिमं छिन्धि दृढं पाण्डुषु वृष्णिषु
४१ त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् रतिमुद्वहतादद्धा गङ्गेवौघमुदन्वति ४२

स्वैः स्वासाधारणैर्लक्षणैश्चिह्नैः ध्वजवज्राङ्कुशादिरेखारूपैर्विलक्षितैश्चिह्नितैस्त्वत्पदैरङ्किता सती भातीत्यादि ... र्थः ३८ हे गदाधर अधुना इयं भू
कालेन शोभिष्यते ३९ तव वीक्षितैरेवेमे जनपदादेशा अधुना स्वृद्धाः सुष्ठु समेवाह सुपक्वौषधिवीरुधः गुल्मानि च येषु तथा
१९ नित्याद्युपस्थानधर्मादन्वन्तः ... ४० मद्गमिष्यति त्वज्ञानास्मस्वेतत्समभिप्रायेण संबोधयन्ती स्नाह अथ शाद्वस्मद्वो पो
हे विश्वेश सर्वतः करणातियन्तः हे विश्वात्मन् सर्वान्तरात्मन् विश्वशरीरक स्वकेषु पाण्डवेषु मे ममयि विभक्तिव्यत्ययार्षं वृष्णिषु न
वेषु चेमं दृढं स्नेहपाशं छिन्धि यद्वा वृष्णिषु पाण्डवेषु चस्वस्नेह पाशः त्वयि तु मत्स्नेहपाशः इत्यभिप्रायेणाह त्वयीति ४१ ॥
देवं जयन्ती प्रार्थयते त्वयीति हे मधुपते यादवानामेव माधवाश्रितिना मातरं त्वं न वसस्व यिम विष्यति त्वं प्यनन्यो विषयो वि
तरः विषयालम मतिरसकृद् रत्नं उद्वहतु इति समदेवगङ्गा जलौघमिव उद्दनात् ... मम प्राप्य नस्वत्सलो घं वोढुं तम

ततस्तस्य युधिष्ठिरस्य भ्रातरो भीमादयः सर्वे संतोऽश्वायैर्यानैः स्वर्णभूषितैः रथैरन्वगच्छन् तथाहि विप्राः व्यासधौम्यादयश्चान्वगच्छन् २
हे विप्रर्षे सधनंजयः सार्जुनो भगवान् श्रीकृष्णोपि रथेनान्वगच्छत् तदासन्ते युधिष्ठिरो चक्रे यथा गुह्यकैर्मद्वैः कुवेरस्तद्वत् ३ दिवः
स्वर्गाद्युतं ममरमिव स्थितं भूमौ निपतितं भीमं रथ्यास्वानुगाः सभ्रात्राः पांडवाः चक्रिणा श्रीकृष्णेन सह प्रणेमुः ४ तत्र भरतपुंगवेभ
रतवंश्यकुष्टे भीष्मं दृष्ट्वा देवर्षिप्रभृतयः आसन्नाणाप्यस्थितवंतः ५ तानेव कांश्चित् दर्शयति पर्वतः नारदः इति द्वाभ्यां रेणुकासुतो भार्गवरामः
कौशिको विश्वामित्रः ६, ७ हे ब्रह्मन् स्मेव स्थाननः शुक आदिर्येषां तैः अमला मुनयः शिष्यैरूपेताः कश्यपादयश्चाजग्मुः ८॥

ततस्ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः अन्वगच्छंस्तथा विप्रा व्यासधौम्यादयस्तथा २ भगवानपि विप्रर्षे रथेन सधनं
जयः स तैर्व्यरोचत नृपः कुवेर इव गुह्यकैः ३ दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरं प्रणेमुः पांडवो भीष्मं सानु
गाः सह चक्रिणा ४ तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम राजर्षयश्च तत्रासन् दृष्टं भरतपुंगवं ५ पर्वतो नार
दो धौम्यो भगवान् बादरायणः बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ६ वसिष्ठ इंद्रप्रमदस्त्रितो गृत्समदो सितः
कक्षीवान् गौतमोत्रिश्च कौशिकोथ सुदर्शनः ७ अन्ये च मुनयो ब्रह्मन् ब्रह्मरातादयोमलाः शिष्यैरूपेताः आजग्मुः कश्यप
आंगिरसादयः ८ तान्समेतान्महाभागानुपलभ्य वसूत्तमः पूजयामास धर्मज्ञो देशकालविभागवित् ९ कृ
ष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरं हृदिस्थं पूजयामास माययोपात्तविग्रहं १० पांडुपुत्रानुपासीनान् प्रश्र
यप्रेमसंगतान् अभ्याचष्टानुरागास्रैरंधीभूतेन चक्षुषा ११ तान्ब्रह्मर्षिप्रभृतीन्समेतान्समुदितानुपलभ्याभिज्ञा
यधर्मज्ञो देशकालविभागज्ञश्च वसूत्तमो भीष्मः यथार्हं पूजयामास पूर्वजन्मनि वसुत्वाद्वसूत्तमः इत्युक्तं ९ तथा कृष्णं
च तत्प्रभावाभिज्ञो हृदिसंपूजयामास ध्यानेन हृदिस्थं कृत्वा मानसैरुपचारैः पूजयामासेत्यर्थः कथंभूतमासीनमग्रतः
पविष्टं जगदीश्वरं मायया स्वेच्छया स्वरूपज्ञानेनोपात्तो विग्रहो येन तं १० ततः आसीनान् उपविष्टान् अनुवर्तमानान् वा प्रश्र
यभयार्थकत्वात् प्रश्रयेण विनयेन प्रेम्णा च संगतान् पांडुपुत्राननुरागास्रैरनुरागजैरश्रुबिंदुभिरंधीभूतेन चक्षुषा अभ्याचष्ट दर्शनाच्चकार
रूपभयार्थकत्वात् प्रचलितं लोमयस्मै पिबिवा वदितं ११॥

कं वचो भागवद्धवः न त्मनवो धायविवेकायनकल्पते विवेकं जनयितुं न समर्थ मित्यर्थः धर्मयुद्धस्य धर्मत्वेपि तदनुबंधितया महतः पापस्यैव प्राप्ते

बालादिद्रुहः बालादिहंतुर्मम वर्षायुतानामयुतैरपि निरयान्मोक्षो न हि भवेत् ४९ ननु शौर्यतेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं ध
र्म्यो हि युद्धं क्षत्रियस्य नत्वित्रियस्यन विरुद्धं तस्मादि शास्त्रे धर्मयुद्धस्य धर्मत्वावबोधनात्तत्र कस्मात् शंकसे इत्यतआह नेति प्रजानांतुः
पोषणार्थं कृतस्य राज्ञो युद्धे हि बांधवधो धर्मो न भवेत् तेन नपापं किंतु धर्म एवेति यदनुशासनं नाम तद्बोधयितुमिति भावः ५० ननु धर्मो यथ
तमानस्यावर्जनीयतया प्रसक्तमपि पापं वर्णाश्रमधर्मैरपोहितुं शक्यमेव धर्मेण पापमपनुदतीति शास्त्रादित्यतआह स्त्रीणामिति
मया हतानां धवाः पुत्रा यासां तासां स्त्रीणां योसौ द्रोहः पापात्मकः इह धर्मयुद्धप्रवृत्तेन मया कृतः स महान् गृहमेधीयैर्गृहाश्रमिणः कर्त
व्यैर्धर्मैर्व्यपोहितुं न कल्पः न प्रभुः बहुकालानुभाव्यफलो विपुलो द्रोहोऽल्पकालनिर्वर्त्यैर्गृहमेधीयैः कर्मभिर्नापोहितुं कल्पः क

बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः ४९ नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्वि
षां इति मे न तु बोधाय कल्पते शासनं वचः ५० स्त्रीणां मद्धतबंधूनां द्रोहो योसाविहोत्थितः कर्मभिर्गृहमेधीयैर्नाहं क
ल्पो व्यपोहितुं ५१ यथा पंकेन पंकांभः सुरया वा सुराकृतं भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ५२ इति श्री० प्रथम
युधिष्ठिरानुतापो नामाष्टमोऽध्यायः ८ सूत ३० इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया ततो विनशनं प्रागाद्यत्र देवव्र

र्गृहाणां कर्म निर्हार इत्याशुक्त इति भावः ५१ एतदेव सदृष्टांतमुपपादयति यथेति पंकांभः पंकसंसर्गदूषितं जलं पंकेनैव यथा मार्ष्टुं शोधयितुं लो
कः यथा च सुराकृतं सुराकृतदोषदूषितं भांडं पुनः सुरया च मार्ष्टुं नार्हति न पार्यते एवं यज्ञैरेकामपि भूतहत्यां न मार्ष्टुमर्हति पंकांक इति
पाठे पंकांकितं यथा कश्चिदवयवः पुमान्पंकेनैव तज्जानं मार्ष्टुं नार्हतीति तद्वदित्यर्थः पंकांकमिति द्वितीयांतपाठे पंकस्यांकोयस्मिं
स्तदंगं पंकेन मार्ष्टुं नार्हतीति तद्वत् ५२ इति प्रथमेऽष्टमः ८ नवमे तु भीष्मं प्रजाद्रोहाद्भीतो युधिष्ठिरः सर्वधर्मान्बोद्धुमिच्छन्यानि
शासनं विशसिताहिंसितायत्र बंधवः तद्विशसनं कुरुक्षेत्रं प्रागात्प्रागमत् तस्य विनशनं विशिनष्टि यत्र देवव्रतो भीष्मोऽपतत् भी
ष्माद्धर्मान्बोद्धुं प्रपद्याविशर्थः

भा॰पु॰ ५२

एवं तत्त्वानुशास्य लोकानुग्रहकाम्यया श्रीकृष्णस्य याथात्म्यमावेदयति एष इति एष श्रीकृष्णः साक्षाद्भगवानाद्यः एव परिपूर्णः आद्यो जगत्कारण-
भूतः परमपुरुषो नारायण एव स्वमायया लोकं मोहयन् गूढः तिरोधापितस्वकीयवेषः वृष्णिषु यादवेषु चरति कौन्तेय यादव इवानुकरो-
ति २८ त्वमेव इममित्थं जानासि तथापि तस्य त्वत्कृतं न वैषम्यमसीत्याह यमिति द्वाभ्यां यं कृष्णं मातुलेयं मातुलपुत्रं प्रियं प्रीतिविषयं च मित्रं
स्वतुल्यं च सुहृत्तमं महोपकारकं च मन्यसे यं च त्वं सचिवं मन्त्रिणं च कदाचित् दूतं कदाचित् सौहृदात् सारथिं चाकरोः कृतवान-
सि २९ तस्यानुभावं भगवान् शिवो वेदेति पूर्वेणान्वयः देवर्ष्यादयो विदुरिति चाहे नृप युधिष्ठिर ३० यद्यप्येवं मन्यसेऽकरोश्चेत्
त्वत्कृतं दोषं सारथ्यादिक्रियाकृतं मतिवैषम्यं कदाचिदप्यस्य न विद्यते मतिवैषम्याभावे हेतुं वदन् विशिनष्टि सर्वात्मन इति सर्वा-
त्मनः मातुलेयादीन् मत्वा तस्य दूतं सारथिं च कुर्वतस्तवाप्यन्तरात्मनया वयं दूतत्वादिकारणाय तामपि चोदयतीति भावः ३१

एष वै भगवान्साक्षादाद्यो नारायणः पुमान् मोहयन्मायया लोकं गूढश्चरति वृष्णिषु २८ यं मन्यसे मातुलेयं प्रियं मि-
त्रं सुहृत्तमं अकरोः सचिवं दूतं सौहृदादथ सारथिं २९ अस्यानुभावं भगवान्वेद गुह्यतमं शिवः देवर्षिर्नारदः साक्षा-
द्भगवान्कपिलो नृप २० सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृतेः तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् २१ तथा-
प्येकान्तभक्तेषु पश्य भूपानुकंपितं यन्मेऽसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः २२

पाप्यनवद्यस्य निष्पापस्य गतावद्या संसरास्य

तत्र हेतुरनहंकृतेरहंकारशून्यस्य [illegible] रहितस्य किंचाद्वयस्य द्वितीयवस्तुरहितस्याप्यस-
तं वस्तुरहितस्येत्यर्थः अत एव समदृशः सर्वमपि ब्रह्मत्वेन पश्यतो अतएव इत्थं आवचं स्वशरीरतया स्वनिपाप्यतया चैककृपेयस्य तः
उक्तगुणविपरीतस्यैव हि पुंसो मतिवैषम्यमिति भावः २१ सर्वात्मनः इत्यनेन सर्वस्य तत्प्रीतिविषयत्वमवगतं शरीरं ह्यात्मनः
प्रीतिविषयं यद्यपि सर्वं चिदचिदात्मकं जगच्छरीरभूतं प्रियं कृत्वा विषयं च तथापि [illegible] यत्त्याज्यं जगद्व्यापारेश्वर
तस्य स्वस्य वैषम्यनैर्घृण्यादिपरिहाराय व्याजमात्रावलम्बिनः स्वानुवर्तिनोऽतितरां प्रियाः कृपाविषयाश्चेति तदेव दर्शयितुमक-
स्यमुमूर्षोर्मम चक्षुर्विषयं गत इत्याह तथापीति यद्यपि सर्वात्मा समदर्शी च तथापि हे भूप एकान्तभक्तेषु अनन्यप्रयोजनेष्व-
नुकंपितं अनुकंपास्य संजाता इत्यनुकंपितः तारकादित्वादितच् अनुकंपायुक्तं पश्य अपि हि तत्र लिंगमाह यस्मात्कृष्णोऽसूं-

[illegible] २२ ॥

राम ५२

तत्रोक्तिमाह अहो इति द्वादशभिः हे धर्मनंदनाः अहो इदं कष्टं जीवनं अन्याय्यमिति छेदः संधिरार्षः यदिति प्रकृतिभावो वा चिन्त्यः यद्यस्माद्वि
प्राधर्माच्युता भगवांश्चाश्रया येषां ते तदनुवर्तिनो यूयं क्लिष्टं कष्टं यथा तथा जीवितुं नार्हथ २२ अतिरथे पांडौ संस्थिते सति बाल
ति बालाः प्रजाः पुत्रा यस्याः सा वधूः पृथा कुंती तोकवत्यपत्यवती सत्यपि मुहुर्मुहुर्बहून्क्लेशान्प्राप्ता हि २३ भवतां यदप्रियं दुःख
मभूत्तत्सर्वं कालकृतं कालो दुरुदैवकृतं मन्ये कोसौ कालः यत्कृतं मदप्रियं तत्राह वायोर्वशे मेघपंक्तिरिव यस्य वशे सपालो लो
को वर्तते स एव कालः २४ अन्यथा संभावितमिदमभवदिति विस्मयते यत्रेति यत्र धर्मसुतादयः तत्र विपदिति चित्रं इत्यर्थः आ
द्यः कृष्णशब्दोर्जुनपरः द्वितीयस्तु भगवत्परः तद्विशेषणं सुहृदिति धर्मसुतादीनां सुहृत्तस्त्रीशब्देन कृष्णास्त्रीत्येव दशी विवक्षिता
धर्मसुतादीनामन्यतम एव सर्वविपत्त्वपात्यसत्ति संभूय सर्वेषामवस्थाने विपदभवदिति एतदति चित्रमिति इदं सर्वं

भीष्म उवाच अहो कष्टमहोऽन्याय्यं यद्यूयं धर्मनंदनाः जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः २२ संस्थितेतिरथे
पांडौ पृथा बालप्रजा वधूः युष्मत्कृते बहून्क्लेशान्प्राप्ता तोकवती मुहुः २३ सर्वं कालकृतं मन्ये भवतां च यदप्रियं सपालो
यद्वशे लोको वायोरिव घनावलिः २४ यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः कृष्णोस्त्री गांडीवं चापं सुहृत्कृष्णस्त
तो विपत् २५ न ह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितं यद्विजिज्ञासया युक्ता मुह्यंति कवयोपि हि २६ तस्मादिदं
दैवतंत्रं व्यवस्य भरतर्षभ तस्यानुविहितोनाथा नाथ पाहि प्रजाः प्रभो २७

कालकृतमेवेति भावः सुहृत्कृष्ण इत्यनेन सुहृदपि
कृष्णः कालमेवानुवर्तत इति सूचितं इदं कर्म च कालस्य स्वभावो जीवादेव च यदनुग्रहतः संतिनसंतियदपेक्षये तत्कार्य धर्मस्तत्रापि भवता
नि२ मतिसु इदं कृष्णस्य विपत्तिनिमित्तं कर्मादि दोषकालानुवर्तित्वाद्वैषम्ये तास्ति नान्यथेत्याशयः २५ ननु यद्वशे लोकः सकालोपि श्रीकृ
ष्ण एव तं संत्याय्य सांप्रतं तर्हि कालानुवर्तित्वात्किमस्य चिकीर्षितं इत्यत आह नेति हे राजन्नस्य कृष्णस्य विधित्सितं न कोपि पुमान्वेद अवेद्य
५४ त्वं ज्ञायतां तद्विधित्सितं विज्ञानस्येच्छया विधित्सितस्य जिज्ञासया युक्ताः संतः ते विधित्सितं ज्ञातुं प्रवृत्ताः कवयो ब्रह्मादयोपि मुह्यंति हि
अस्त्वेवं प्रकृते किमित्यत आह तस्मात्सर्वलोकस्य कालायत्तत्वात्सुखादिमतः कर्मादिरूपकृष्णायत्तत्वात्कृष्णस्य कालानुवर्तित्वाच्च हे
भरतर्षभ इदं सुखदुःखादिकं सर्वं दैवतंत्रं देवतंत्रं दैवायत्तं व्यवस्य निश्चित्य दैवमत्र कालकर्माद्युद्बोधयिता तदनुवर्ती चेश्वरः
कृष्णो विवक्षितः तस्य दैवस्यानुविहितः तस्यैव कर्तरि षष्ठी तेनानुवर्तितस्त्वं हे प्रभो अनाथाः अनाथाः प्रजाः पाहि पालय २७ ॥श्री॥ ॥

यथापयाकृत्संदामप्रसेत्यर्थः २८॥५॥

आम्नातानित्यनेन वैदिकधर्मानपृच्छदिति सूचितं तथा स्मार्तधर्मानपृच्छदित्यभिप्रायेणाह दानधर्मानिति राजधर्मा नीतिशास्त्रोक्ता मोक्षधर्माः ध्यंच स्त्र्यादिमोक्ताः तत्राप्यवान्तरभेदाभिप्रायेण पुरुषस्वभावभेदाभिप्रायेण विभागश इत्युक्तं भगवद्धर्मास्तद्गुणाकीर्तनादयः समासव्यासयोगतः संक्षेपविस्ताराभ्यां युक्ताः शास्त्रेषु प्रतिपाद्यन्त इति समासव्यासयोगाः सार्वविभक्तिकस्तसिः समासव्यासयोगात् यद्वा समासव्यासयोगात् संक्षेपयोगाद्विस्तरयोगाच्चापृच्छत् संक्षिप्तत्वेन विस्तृतत्वेन चापृच्छदित्यर्थः २७ द्वितीया भा०पु० ५३
नानावर्णयामासेत्युत्तरत्रान्वयः हे मुने सहोपाया साधनैः धर्मार्थकाममोक्षानपि यथा भीष्मस्य योगिवाञ्छित उत्तरायणः स
कालः प्रत्युपस्थितः यद्वा तस्य स कालः प्रत्युपस्थितः यश्छन्दमृत्योर्योगिनः वाञ्छितः स चापिक उत्तरायणः इति वान्वयः २८

दानधर्मान्राजधर्मान्मोक्षधर्मान्विभागशः स्त्रीधर्मान्भगवद्धर्मान्समासव्यासयोगतः २७ ध
र्मार्थकाममोक्षांश्च सहोपायान्यथा मुने नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् २८ धर्मं प्रवदतस्तस्य स
कालः प्रत्युपस्थितः यो योगिनश्छन्दमृत्योर्वाञ्छितस्तूत्तरायणः २९ तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसङ्गं मन आ
दिपूरुषे कृष्णे लसत्पीतपटे चतुर्भुजे पुरःस्थितेऽमीलितदृग्व्यधारयत् ३० विशुद्धया धारणया हताशुभस्तदीक्षयैवा
अध्य०:५ शु गतायुधश्रमः निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजञ्जनार्दनं ३१ ॥ ॥ ॥ ॥ ॥

२९ तदेति यदा स कालः प्रत्युपस्थितः तदा सहस्रणीः सहस्राणां कुरुपाण्डवादिकृपाणां नायकः सहस्रं स्वपूरुषान्नयतीति सहस्रणीः गिरतिशयपतीति वा स भीष्मः गिर उपसंहृत्य विरम्य मुक्तः सङ्गो देहतदनुबन्ध्यादिसङ्गो यस्य तन्मनः पुरःस्थिते लसन्तौ पिशङ्गौ पीतौ पटौ यस्य तस्मिन् कृष्णे व्यधारयत् कथंभूतः निमीलिते दृशौ दृशी येन सः निमेषणमप्यकुर्वन् कृष्णमेवापश्यत् तद्विग्रहध्याने कश्चिदन्यं चित्तमकरोदित्यर्थः ३० विशुद्धया धारणया भगवद्विग्रहानुध्यानात्मिकया हतं निरस्तमशुभं भगवत्प्राप्तिविलंबा राम ५३
दिकं प्रारब्धं यस्य तदीक्षयैव भगवद्दर्शनेनैव गतायुधप्रहारजाश्रमो यस्य निवृत्ताः सर्वेषामिन्द्रियाणां वृत्तयो विभ्रमः देहात्मादिभ्रमश्च यस्य सः भीष्मः जन्यं जननयोग्यं देहं विसृजन्सन् जनार्दनं सर्वजनदुःखहरं श्रीकृष्णं
तुष्टाव ३१

किंतत्रयदृर्शनतत्फलमाह भक्त्येति यस्मिन्भक्त्यावेशितिचेष्टयवाचायस्यभगवतोनाममात्रमेव कीर्तयन्कलेवरंत्यजन्योगीकामक
र्मभिःकाम्यंतइतिकामाःशब्दादिविषयास्तेषांनिमित्तभूतैःकर्मभिःपुण्यपापात्मकैः ... कामैःकर्मभिश्चेतिवामुच्यतेसंसृतिबंधा
न्मुच्यतेइत्यर्थः यच्छब्दस्यसदृशत्यथाहृतत्तच्छब्दवनापूर्वेणान्वयः सदेवदेवइत्यनेनयस्य नामकीर्तनमेवकामकर्मविमोचन
द्वारानिःश्रेयसफलकंकिमुसाक्षाद्दर्शनमितिभावः २३ यतएवमतोयावन्मयाप्रार्थितास्ताः प्रतीक्षतामितिप्रार्थयते सइति
यावदिदंकलेवरंशरीरंहिनोमि त्यजामियावद्धिभ्रमीतिभावः तावत्प्रसन्नेनहासेनारुणलोचनाभ्यांउल्लसन्मुखांबुजंयस्यसच
तुर्भुजोभगवान्श्रीकृष्णःदेवानामपिदेवोध्यानपथःध्यानविषयभूतःसन्प्रतीक्षतां चक्षुःपथंवप्राप्नएवध्यानपथोपिभव

भक्त्यावेश्यमनोयस्मिन्वाचायन्नामकीर्तयन् त्यजन्कलेवरंयोगीमुच्यतेकामकर्मभिः २३ सदेवदेवोभगवान्प्रतीक्षतांकले
वरंयावदिदंहिनोम्यहं प्रसन्नहासारुणलोचनोल्लसन्मुखांबुजोध्यानपथश्चतुर्भुजः २४ सूतउवाच युधिष्ठिरस्तदाकर्ण्य
शयानंशरपंजरे अपृच्छद्विविधान्धर्मानृषीणामनुशृण्वतां २५ पुरुषस्वभावविहितान्यथावर्णंयथाश्रमं वैराग्य
रागोपाधिभ्यामाम्नातोभयलक्षणात् २६॥

त्वित्यभिप्रायेण ध्यानपथइत्युक्तं यद्वाद्विभुजत्वेनध्यानपथोभवदीयोभिप्रा
येणतदुक्तिः तत्रमानांद्विभुजत्वेनचक्षुःपथोपिसस्यचतुर्भुजत्वेनचक्षुःपथस्तेनैवरूपेण ध्यानपथोस्त्वित्यभिप्रायेण ध्यानप
थश्चतुर्भुजइत्युक्तं २४ तद्भीष्मवचोनिशम्ययुधिष्ठिरःशरपंजरेशयानंभीष्ममृषीणांशृण्वतांसतांनानाविधान्धर्मानपृच्छत्
२५ धर्मान्विशिनष्टि पुरुषस्वभावैः ब्राह्मणत्वक्षत्रियत्वाद्यादिरूपेण विहितान्कर्तव्यतयाविधिबोधितान्यथावर्णंयथाश्रमंब्राह्म
णादिवर्णानांब्रह्मचर्याद्याश्रमाणांचयोग्यान्योग्यार्थकयथाशब्दस्याव्ययीभावः वैराग्यरागावकामकामौताविवोपाधीताभ्याम्
आम्नातानुभयलक्षणानुभयविधान्प्रवृत्तिनिवृत्तिभेदभिन्नान्यथैकस्यैवाग्निहोत्रादिकर्मणोऽग्निहोत्रं ... जुहुयात्स्वर्गकामः।
यावज्जीवमग्निहोत्रंजुहुयादितिस्वर्गाधिकारजीवनाधिकाररूपाभ्यामुपाधिभ्यामेवभेदः एवंवैराग्यरागोपाधिभ्यांप्रवृत्तिधर्मनि
वृत्तिधर्मत्वेनचाम्नातान्वस्तुतएकरूपान्वर्णाश्रमादिधर्मानित्यर्थः २६॥ ॥ ॥श्री॥ ॥ ॥

गीतोपनिषदुपदेशावस्थरूपमनुसंधायप्रार्थयते अवहितेति अवहितायानातिदूरस्थाय शूलनामा: शरतेजाः मुखं दुरो भागमव
लोक्य दोषदृशा स्वजनवधाद्विमुखस्यार्जुनस्येति विशेषणम् धार्तराष्ट्रं कुमतिं दृष्ट्वा स्वजनं [illegible] ते बंधु
भा०पु० ५५ त्वया पापमाप्स्यसीति मन्वानां कुमतिमात्मविद्यया गीतोपदेशेन योऽवहृतवान् तस्य परमस्य परोमायस्मात् [illegible] समाद
तच्चरणे योरतिर्ममास्तु ३६ जिघांसयास्त्र [illegible] धर्मनदशायामवस्थितं रूपमनुसंदधानस्तमेव तनर्ष [illegible]
गमभित्यादिश्लोकद्वयमेकान्वयं आततायिनः प्रहरतो मेममतावच्छिन्नैर्विशिखैर्बाणैर्हतिस्ताडितो ऽत एव विशीर्णः [illegible]
दंशः कवचो यस्य सः ततजेन रुधिरेण परिप्लुतः व्याप्तगात्रः सन् स्वनिगमं मायुधेन गृहीतमीति स्वप्रतिज्ञामपहाय [illegible]
मीष्मवधं विधास्यामित्रिजाम नोसस्यां कर्तुं स्वप्रतिज्ञामुपेक्ष्य भक्तप्रतिज्ञामेव यथार्थां कर्तुमित्यर्थः रथस्य स्ततो वप्लु [illegible]

अवहितपत्तनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुध्या कुमतिमहरदात्मविद्यया यश्चरणरतिः [illegible]
स्वनिगममपहाय मत्प्रतिज्ञामृजमधिकर्तुमवप्लुतो रथस्थः धृतरथचरणोभ्ययाच्चलद्गुर्हरिरिव हंतुमिभं गतोत्तरीयः ३७
शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान् गतिर्मुकुंदः ३८
विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपं ३९

सुदर्शनाख्यं चक्रं येन चलन्ती गौर्भूमिर्यस्माद्भूमिं चालयन् गतं गच्छदुत्तरीयं यस्य सः इभं गजं हंतुं हरिः सिंह इव बलात् [illegible] अभिस
सार मद्वधाभिमुखमगात् स भगवान्मम गतिः स्वप्राप्त्युपायो भवतु ३७ ३८ सारथ्यदशावस्थितं रूपमनुसंधायतस्मिन् र
तिदार्ढ्यं प्रार्थयते विजयेति विजयस्यार्जुनस्य रथः कुटुंबः कुटुंबवद्रक्षणीयो यस्य आत्ततोत्रे वेत्रं येन धृता हयानां अश्वानां रश्मयः
प्रग्रहा येन तस्मिन् तच्छ्रिया तोत्रहयरश्मिग्रहणजशोभया ईक्षणीये द्रष्टव्ये तु [illegible] मुमूर्षोर्मर्तुमुद्यतस्य मम रतिरस्तु
इह युद्धे यं निरीक्ष्य ये हताः स्तेषु स्वरूपं स्वाभाविकं रूपमयहरयाम [illegible] मुक्तिमित्ति यावत् गताः प्राप्ताः राम ५४
तस्मिन्भगवतीत्यन्वयः सरूपमिति पा [illegible] साधर्म्य [illegible] ३९ ॥ ॥ ॥

स्तुतिमेवाह इतीत्यादिभिरेकादशभिः तावत्परमश्रेमस्येवेदांतवेद्यं दिव्यात्मस्वरूपं मेव जगत्तावत्तारूपं तस्य योजनं चानुसंधाय तस्मिन्स्वमतिदार्ढ्यं
प्रार्थयते इति वक्ष्यमाणप्रकारेण मम मतिर्भगवति वितृष्णाऽनलघुश्रीहिता सती अप्रकल्प्य ताद्भतिहिता भवतु यद्वा इत्तिहेतो मतिर्वितृष्णा इति
यस्मात्तस्माद्भगवत्सुपकल्पिता भवत्वित्यर्थः कथंभूते सात्वतपुंगवे सात्वतानां [illegible] पुंगवे श्रेष्ठे [illegible] गवतां नायके वा विभूम्नि विलक्षणे भूम्नि
नागादिभ्यः प्राणशब्दवाच्याज्जीवाच्च वैलक्षण्ये ऽपरिच्छिन्ने भूमन्शब्दवाच्ये इत्यर्थः भूमा [illegible] योवै भूमा तत्सुखं नाल्पे सुख
मस्तीति हि श्रूयते तदाह स्वसुखमुपगते इति स्वं स्वाभाविकं सुखं उपगतवत्यपरिच्छिन्नस्वाभाविकानंदशालिनीत्यर्थः क्वचिद्धेतोर्विहर्तुं
प्रकृतिं विग्रहमुपेयुषि यद्भवप्रवाहः संसारप्रवाहो भवति यत्संकल्पमूलादेव तत्तानां संसारप्रवृत्तिस्तस्मिन्नित्यर्थः ३२ प्रकृतं रूपमनुभू
यमतिदार्ढ्यं प्रार्थयते त्रिभुवनकमनं त्रिभुवनकमनीयं त्रिभुवनसुंदरमितियावत् तद्वपुर्दधाने विजयसखे ऽर्जुनसखे श्रीकृष्णे अनव

भीष्म उवाच इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भव
प्रवाहः ३२ त्रिभुवनकमनं तमालवर्णं रविकरगौरवरांबरं दधाने वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या
३३ युधि तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आ
त्मा ३४ सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्मम

र्यो दृष्टानत्तप्रयोजनेतियावत् मम रतिरनुरागोऽस्तु कथंभूतं वपुस्तमालस्येव वर्णो नीलो यस्य रवेः करः किरणसमुदाय इव गौरं वरं
चांबरं यस्मिन् अलककुलैः कुंतलजालैरावृतमाननाब्जं यस्य तथाभूतं ३३ युद्धदशावस्थितमनुसंधाय प्रार्थयते युधीति कृष्णे
भगवति मम आत्मा मनः अस्तु रतं भवत्विति एतु कथंभूते युधि युद्धे तुरगजरोभिरश्वखुरोत्थितरजोभिर्विधूसरैः विष्वग्विलंबमानैः क विधूसरैः
चैरलकैः श्रमवद्भिः श्रमवारिभिः श्रमस्वेदबिंदुभिश्चालंकृतमास्यं यस्य निशितैः शरैर्विभिद्यमाना त्वग्यस्य तादृशे विलसत्कवचेन वि
लसत्कवचो यस्मिंस्तत् ३४ युद्धप्रारंभदशावस्थं रूपमनुसंधाय प्रार्थयते सपदीति युद्धप्रारंभसमये सख्युरर्जुनस्य वचः सेनयोरुभयोर्मध्ये
रथं स्थापय मेऽच्युत यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् इत्यादिरूपं वचो निशम्य निजपरयोः पांडवकौरवयोर्बलयोर्मध्ये रथं
निवेश्य स्थापयित्वा स्थितवति अक्ष्णैव दृष्टिमात्रेणैव परसैनिकानां दुर्योधनादीनामायुर्हृतवति पार्थस्यार्जुनस्य सखा तस्मिन्मम रतिरस्तु ३५

तन्मूलितैर्धर्मसेनापदाकृतस्वरूपैः ४

र्यणादिवृत्तिविवर्जितसूर्यादिवत्परमात्मा तत्र तत्रावस्थितोऽपि निर्दोष इति शास्त्रेषूपमाक्रियते आकाशमेकं हि यथा घटादिषु पृथक्पृथे
तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् एक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचन्द्रवदिति ॥ दिग्भिरभि
धायपुनरब्रुद बवदग्गृहणाननं तथात्वमित्येतेन सूत्रेणाम्बुदर्पणादिषु यथा सूर्यमुखादयो गृह्यन्ते तेन तथा पृथिव्यादिषु स्थाने षु परमात्मा गृ
ह्यते अंबादिषु हि सूर्यादयोऽन्यान्यत्र स्थाः स्वगृह्यन्ते न परमार्थेन सत्त्व स्थाः इह तु यः पृथिव्यादिषु नित्येत्यादिना परमार्थेन तावत्पर
मात्मा पृथिव्यादिषु स्थितो गृह्यते अतः सूर्यादि रंबुदर्पणादि प्रयुक्त दोषाननुषंगस्तत्र तत्रास्थितत्वाभावादेवान्नानत्तथात्वेदार्ष्टान्तिकस्य न दृ
ष्टान्ततुल्यत्वं इति पूर्वपक्षिचोद्य वृद्धिह्रासभाक्त्वमित्यादि सूत्रेण पृथिव्यादिस्थानान्तर्भावात्स्थानिनः परब्रह्मणः स्वरूपतो गुणे न पृथि
व्यादिस्थानगतवृद्धिह्रासादिदोषभाक्त्वमात्रसर्पादि दृष्टान्तेन निरस्यते कथमित्यमवगम्यते उभयसामञ्जस्यादेव उ... दृष्टान्तसा
जस्यादेव मिति निरूप्यते आकाशमेकं हि यथा घटादिषु पृथग्भवेत् जलाधारेष्विवांशुमानिति दोषवत्त्वं नैकेष्ववस्थित

॥ मूलउवाच कस्मादेवं भगवति मनोवाग्दृष्टिवर्जितैः आत्मानमात्मानमावेश्य सोऽन्तः श्वास उपारमत्
॥ ४३ संपद्यमानमात्मानमभी क्ष्णं ब्रह्मणि निष्कले सर्वव्यपूर्वं तेन संवियांसीवदिनात्यये ४४ ॥

स्याकाशस्य वस्तुतो नवस्थितस्यांशुमयस्य दृष्टान्तस्योपादानं हि परमात्मनः पृथिव्यादिगतदोषभाक्त्वनिवर्तमात्रप्रतिपाद्ये सम
जसं भवति घटकरकादिषु वृद्धिह्रासभांतुपृथक्त्वं युज्यमानमप्याकाशं वृद्धिह्रासादिदोषैर्नस्पृशते यथा च जलाधारेषु विब
मेषु दृश्यमानोऽप्यंशुमांस्तद्गतवृद्धिह्रासादिभिर्न स्पृश्यते तथायं परमात्मा पृथिव्यादिषु नानाकारेषु चेतनेषु चास्थितः तद्गतवृ देतेनैषु
द्धिह्रासादिदोषैरसंस्पृष्टः सर्वत्र वर्तमानोऽप्येकएवास्पृष्टदोषगंधकल्याणगुणैकरूप एव यथा जलादिषु वस्तुतोऽनवस्थितस्याप्यंशु २४
मतो हेत्वभावाज्जलादिदोषानभिषंगस्तथा पृथिव्यादिष्ववस्थितस्यापि परमात्मनो दोषप्रतीकारतया दोषहेत्वभावान्नदो
मतो हेत्वभावाज्जलादिदोषानभिषंगस्तथा पृथिव्यादिष्ववस्थितस्यापि परमात्मनो दोष... भक्तिमार्गे ... त्मानं प्रत्यगात्मानमावेश्य तेन संयु
क्तगध इति भाषितं ४२ इत्थं भगवति रुक्मे परमात्मनि मनोवाग्दृष्टीनां वृत्तिभिर्वर्जितैरात्मानं प्रत्यगात्मानमावेश्य तेन संयु राम
क्तमनुसंधायेत्यर्थः सभीष्मोऽन्तः श्वासोऽन्तर्लीनः प्राणवायुर्यस्य तथाभूतः ... परमं ... दिगतः परमपुरुषं प्राप्य इत्यर्थः ५५
४३ तदा भीष्मं निष्कले निर्दोषे ब्रह्मणि संपद्यमानं सर्वे पार्थिवा धूतनपूर्वकं ... गुरुं तं प्रत्यभिज्ञाय सर्वे तत्र तत्र स्थास्तू ष्णीं ब
भूवुर्यथा दिनात्यये रात्रौ वयांसि पक्षिणस्तद्वत् ४४

नकेवलं तन्निरीक्षणयुक्ते हता एवं स्वरूपं गता अपि तु तत्क्रामेण तमनुवर्तमाना अपीत्याशयेनाह ललितेति ललितया सुन्दरया गत्या विलासे
न वल्गुहासेन सुन्दरहासेन मन्दस्मिते [illegible] मानं बहुमानं यासां ता गोपवध्वः उन्मदेनो द्रिक्त
कामेनान्धाः स्वपरविवेकरहिताः कृष्णमात्मानं मन्यमाना [illegible] पूतना निरासादिक
मित्यावत् अनुकृतवत्यः अनुकुर्वत्यः सत्यः एतच्च स्फुरीभविष्यति यस्य प्रकृतिं [illegible] मन्किलेति प्रसिद्ध्यर्थं मितं [illegible]
भगवति रतिरस्त्विति पूर्वेणान्वयः ४० युधिष्ठिरराजसूयसभास्थं कृष्णमनुसंधायतस्य चक्षुर्विषयतां प्रार्थयते मुनीति युधि
ष्ठिरराजसूये मुनीनां गणैर्नृपश्रेष्ठैश्च संकुलेन्तः सदसि सभामध्ये एषां युधिष्ठिरकृतमुनिगणादीनामग्रपूजा
दिकमुपपेदे प्राप्तः एव ईक्षणीयो मदन्तरात्मा [illegible] मम दृशी गोचरो दृष्टिविषयः सन्नाविर्भवतु [illegible] ता२
भावः यद्वा आविरात्मा प्रकाशस्वरूपः दृष्टिगोचरोस्त्वित्यन्वयः ४१ अथ सर्वान्तरात्मानमनुसंधाय उक्तविधं भगवन्तं शरणं सीमाह

ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन्किल यस्य गोपव
वध्वः ४० मुनिगणनृपवर्यसंकुलेन्तः सदसि युधिष्ठिरराजसूय एषां अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरा
त्मा ४१ तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानां प्रतिदृशमिव नैकधार्कमेकं समधिगतोस्मि [illegible] भेद

तमिति तं उक्तविधमात्मना भगवता स्वेनैव तत्तत्कर्मानुरूपं कल्पितानां देहभाजां हृदि हृदि प्रतिहृदयं वस्तुतः एक [illegible]
वस्थितमर्कं सूर्यमिव धिष्ठितमधिष्ठितं समधिगतोस्मि कथंभूतः विधूतः भेदमोहः अव्यवहात्मक स्वतन्त्र वस्तुनि [illegible]
मोहः एकरूपे आत्मनि देवमनुष्यादिभेद [illegible] यस्य तथाभूतः यथादित्यः सूर्यः एक एव सन्प्रति दृशं दृशाद्दृशावादि [illegible]
उला४ यनेनाभिमुखं [illegible] दोभासमानः जलादिगतवृद्धिह्रासादिदोषागोचरः आप्यवस्तुगतदोषसंगरहितोर्कस्तमिव दृष्टिः [illegible]
तमितिदृष्टान्तार्थः अन्यथा अर्कदृष्टान्तोनघटते जलोपनिर्दोषत्वे दृष्टान्तः वृद्धिह्रासभाक्त्वमन्तर्भावादु [illegible]
क्षेतिहि सूत्रितं नत्रहि नस्थानतोपि परस्योभयलिंगमित्यनेन पृथिव्यादिषु नानात्मतयावस्थितस्य [illegible]
निरस्तदोषत्वसमस्तकल्याणगुणाकरत्वरूपोभयलिंगत्वं पृथिव्यादिगतदोषसंस्पर्शि [illegible] एवउपमासू
र्यकाशादि [illegible] वदित्यनेन नयतो नानाविधेषु स्थानेषु स्थितस्यापि परस्य ब्रह्मणो नतत्प्रयुक्तदोषसंस्पर्शमपि तत एवजल
शी२

भा०पु०
५६

प्रश्नस्योत्तरमाह निशम्येति त्रिभिः भीष्मोक्तमच्युतोक्तं च निशम्य प्रवर्तते न सुप्रतिष्ठितेन विज्ञानेन देहात्मविवेकादिरूपेण विधूतः विभ्रमो दे
हात्मादिभ्रमो यस्य स अनुमोदितो भीमादिभिरनुवर्तितो युधिष्ठिरः इन्द्र इवाच्युत एवाश्रयो यस्य अच्युतमाश्रयते सेवते भजन् इति वा तथाभू
तः परिध्युपांतां दिगंतावधिश्चतुःसमुद्रांतां पृथिवीं शशास ३ अजातशत्रो राज्ञो येन काममित्यादि एवं मेघो कद्वयेष्वथ कर्षणी
यं अजातशत्रो युधिष्ठिरस्य राज्ञि सति पर्जन्यः कामं यथेष्टं ववर्ष सर्वान्कामान्दोग्धि प्रपूरयतीति तथा मही ... गावः पयसा क्षीरेण ऊ
धस्वतीः ऊधस्वत्यः ... मतुप् ... इत्यर्थः मुदा व्रजान् व्रजस्थान् तृणानि सिषिचुः क्षीरं दुदुहुः ४ तस्य युधिष्ठिरस्य ... न
द्यादयः स्वधर्मान्न तत्यजुरिति शेषः वनस्पतिभिः वीरुद्भिश्च सहिताः सर्वा ओषधयः ... ऋतु अनुकूले यथा कालं ... अजातशत्रोरा

निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः शशास गामिंद्र इवाजिताश्रयः परिध्युपांतामनुजानुवर्तितः ३
कामं ववर्ष पर्जन्यः सर्वकामदुघा मही सिषिचुः स्म व्रजान् गावः पयसोधस्वतीर्मुदा ४ नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः फल
न्त्योषधयः सर्वाः काममन्वृतु तस्य वै ५ नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः अजातशत्रावभवन् जंतूनां राज्ञि कर्हिचित्
६ उषित्वा हास्तिनपुरे मासान्कतिपयान्हरिः सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ७ आमंत्र्य चाभ्यनुज्ञातः परिष्वज्या
भिवाद्य तं आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवादितः ८ सुभद्रा द्रौपदी कुंती विराटतनया तथा गांधारी धृतराष्ट्रश्च युयुत्सु
र्गौतमो यमौ ९ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः न सेहिरे विमुह्यंतो विरहं शार्ङ्गधन्वनः १० ॥ ॥

त्रिसत्ति जंतूनां प्राणिनां कदाचिदप्याधयो मानसिका व्याधयो दैहिकाश्च क्लेशाः तानेवाह दैवभूतात्महेतवः आधिदैविकाध्याधिभौति
काश्चाध्यात्मिकाः नाभवन् ६ किमकार्षीत्तत्र तत्प्रश्नस्योत्तरं विवक्षुः पूर्वं प्रस्तुतस्य निरन्तरप्रयाणस्य भगवतो वृत्तांतमाह उषित्वेत्या
दिना यावदेकादशाध्यायसमाप्ति सुहृदां युधिष्ठिरादीनां विशोकाय शोकाभावाय स्वसुः स्वभगिन्याः सुभद्रायाः प्रियकाम्यया
च हास्तिनपुरे कतिपयान्मासानुषित्वावस्थाय ७ तं युधिष्ठिरमामंत्र्य पृष्ट्वा तेनाभ्यनुज्ञातस्तं परिष्वज्याभिवाद्य च कैश्चित्पू
र्ववयस्कैः परिष्वक्तः आलिंगितोऽभिवादितः हरिः श्रीकृष्णो रथमारुरोह ८ तदा सुभद्रा ... प्रभृतयः विमुह्यंतो मोहिताः शा
र्ङ्गधन्वनः श्रीकृष्णस्य विरहं विश्लेषं न सेहिरे नासहन्त तत्सुतुलासत्यवती ९ १० ॥ ॥ ॥ ॥ राम
५६

तत्र तदा दैवैमानवैश्च वादिता दुंदुभयो नेदुः ४५ ववृषुः साधवो भगवन्तः शशंसुः रहो भीष्मस्य … निर्हरणं साधारणं इति तुष्टुवुः राज्ञां
पुष्पवृष्टयः खाद्दिवः पेतुः … भार्गव संज्ञक … निर्हरणादीनि दाहादिकर्माणि कारयित्वा
युधिष्ठिरो मुहूर्तं दुःखितो बभूव ४६ तथा मुनयो हृष्टाः कृष्णं … तत्र कार्याकैर्नामभिस्
तुष्टुवुः ततस्ते मुनयः कृष्णे … हृदयं येषां तथाभूताः पुनराश्रमानाश्रययुः ४७ ततः कृष्णेन सहितो युधिष्ठिरो हास्तिनपुरं गत्वा पितरं धृतरा
ष्ट्रं तपस्विनीं पतिव्रतां गांधारीं च सांत्वयामास ४८ ततः पित्रा धृतराष्ट्रेणानुज्ञातो वासुदेवेन भगवता चानुमोदितश्च विभुर्युधिष्ठिरः पि
तृपितामहक्रमप्राप्तं राज्यं धर्मेण कौचिरं शशास ४९ इति प्रथमे नवमः ॥ ॥ धर्मेण राज्यं चकारेत्युक्तं तद्विवृणोति भुक्ता नुवादपूर्व

तत्र दुंदुभयो नेदुर्देवमानववादिताः शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ४५ तस्य निर्हरणादीनि संपरेतस्य भार्गव
युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत् ४६ तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः
पुनः ४७ ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयं पितरं सांत्वयामास गांधारीं च तपस्विनीं ४८ पित्रा चानुमतो राजा वासुदे
वानुमोदितः चकार राज्यं धर्मेण पितृपैतामहं विभुः ४९ इति श्रीमद्भागवते प्रथमस्कंधे भीष्मस्तुतिर्नवमोऽध्यायः ॥९॥ शौनक
हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकारषीत्ततः १ सूत
उ० वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवभावनो हरिः निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह २ ॥ १

कथं प्रवृत्त इति शौनकः पृच्छति स्वरिक्थस्पृधः स्वस्य पितृ … इति यावत् … हकारस्य धकार आर्षः … युधि
ष्ठिर … प्रत्यवरुद्धं प्रत्यधिगतं प्राप्तं भोजनं राज्यं येन सः धर्मभृतां वरिष्ठो युधिष्ठिरः … इति पाठे … वचसि …
… किमकार्षीत् इति प्रश्नद्वयं … अनुजैर्भीमादिभिः सह कथं प्रवृत्तः राज्यशासन इति शेषः ततो राजशासनानन्तरं किमकार्षीदिति …
तत्र नावत्कथं प्रवृत्त इति प्रश्नस्योत्तरं विवक्षुस्तदुपोद्घाततया भगवतः कृतकृत्यत्वमाह वंशमिति … दवाग्निना …
… ज्वालादवाग्नितुल्येन कुलकलहेन दग्धं विनष्टं कुरोर्वंशं संरोहयित्वा पवित्रं … उत्पाद …
इति भावः २ ।

उत्तमश्लोके कस्मिंश्चिदेवं चेतांसि यासां कौरवेंद्रपुरस्त्रीणां मन्त्रोऽयं सर्वेषां श्रुतीनां मनोहरः सुखकरः श्रोत्रा[illegible]नां स्वहरति वशीकरोती
ति तथा वा संजल्पः संवाद आसीत् २० संजल्पमेवाह सवै किलेत्यादिभिर्दशभिः तावत्प्रलयदशायां कृत्स्नजगदुपादानत्वेनाभिन्नं
भा०पु० न चय एकोवस्थितः यश्चानन्तो बहु स्यां प्रजायेय नामरूपे व्याकरवाणीति संकल्पपूर्वकं नामरूपव्याकर्ता यश्च तस्य [illegible]
५१ तस्य निश्वसितमेतद्यदृग्वेदं यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति वेदादिकर्तृत्वेन तत्प्रवर्तकश्च [illegible] सिद्धः
यश्च मुमुक्षुभिर्ध्येयो ह्यपश्च वेदान्तवेद्यस्वरूपस्वभावः यश्च जगत्सर्गस्थितिलयलीलः स एवायं कृष्ण इति जल्पन्ति चतुर्भिः [illegible]
प्रलयदशायां गुणेभ्यः सत्त्वादिगुणोन्मेषादग्रे पूर्वं सुप्तशक्तिषु सत्त्वेषु कर्मरूपशक्तिषु सुप्तासु फलप्रदानायाप्रवृ[illegible]
आत्मनि स्वस्मिन्नगदात्मनि सूक्ष्मचिदचिद्रूपजगच्छरीरके कार्यदशायां जगदन्तरात्मनीति वा ईश्वरे नियन्तरि [illegible]

अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसां कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः २० स्त्रिय ऊचुः सवै किलायं पुरुषः पुरा
तनो य एक आसीदविशेष आत्मनि अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु २१ स एव भूयो नि
ज वीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीं अनामरूपात्मनि रूपनामनी विधित्समानोनुससार शास्त्रकृत् २२ ॥ ॥
निमीलितान् वृत्तसं[illegible]र्गादिसंकल्पायस्य तादृशे

त्म[illegible]न् आत्मामतेः निवृत्तसर्गादिसंकल्पे स्वस्मिन्न विशेषे सति विशेषाः पृथिव्यादिभूतानि महदाद्यविशेषोन्ता इति प्रयोगात् त ३०
र्शनार्थकार्यवर्गरहिते सति नामरूपविभागरहिते सतीति वा एकोऽद्वितीयः एकः अविभक्तचिदचिच्छरीरकत्वेनैकः उपादा
नः अविभक्तनामरूपतया हि उपादानत्वात् अद्वितीयः निमित्तान्तररहितः एक इत्यनेनोपादानत्वोक्त्या निमित्तस्यैव धीस्थत्वाद्द्वि[illegible]
य इत्यनेन निमित्तान्तरनिषेधः एवं विधोयमासीत् स एवायं किल श्रीकृष्ण इत्यन्वयः २१ स एव भूय इति य एकोऽद्वितीय आसीत् स
स भूयः निजवीर्यचोदितां बहु स्यामित्यादि स्वसंकल्पप्रेरितां स्वजीवमायां स्वशेषभूतजीव[illegible]धायिकां प्रकृतिं विकृतिं प्रा[illegible]
सिसृक्षतीं सृष्टुमुन्मुखीमनुससार अन्तरात्मतया प्रविश्य नामरूपे व्याकरोदित्यर्थः कथं भूतः अनामरूपात्मनि निर्विधित्सेनाम [illegible]
पेयस्य तस्मिन् आत्मनि जीवे रूपनामनी नामरूपे विधित्समानः [illegible] शास्त्रकृ[illegible] प्रवर्तकोयः स एवायं श्रीकृष्णः वद[illegible] राम
इत्यर्थः २२ ५१

पुनश्चैतदित्यभिप्रायेणाह सत्संगादिति द्वाभ्यां सतां साधूनां संगाद्धेतोर्मुक्तः दुःसंगो दुरात्मसंयोगो येन स बुधः पुमान्यस्य रोचनं रो
चकं कीर्त्यमानं यश एव सकृदाकर्ण्य हातुं नोत्सहते ११ तस्मिन्न्यस्त निक्षेप शनादिभिर्निश्चिता धीर्यैस्ते पार्थाः तस्य विरहं कथं
सहेरन् सहेरन्नेवेत्यर्थः १२ ते पार्थादयः सर्वे स्नेहश्च संबंधश्च तयोः समाहारः तस्मात् ... रसं च धावानुद्रुतं मनः येषां ते चैतोपेयं
घाभूताः संतोऽनिमिषैर्निमेषरहितैर्नेत्रैरन्योन्यं रहितैरदृष्टिभिः अदर्शनं इंद्रियवाच्यादीनि च त्यक्त्वा ... तमेव वीक्षंतः तत्र तत्र चेलुः
विह्वलाः १३ तदा बांधवाः कुंतीप्रभृतयः स्त्रियः अगाराद्गृहाद्देवकीसुते निर्याति निर्याते सति भद्रं तस्यास्त्विति तत्कुल्याः औत्कंठ्यात्प्रेमपूर्व

१६

सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनं ११ तस्मिन्न्यस्तधियः पार्थाः सहेरन्विरहं
कथं दर्शनस्पर्शसंलापशयनासनभोजनैः १२ सर्वे ते निमिषैरक्षैस्तमनुद्रुतचेतसः वीक्षंतः स्नेहसंबद्धा विचेलुस्तत्र तत्र ह
१३ न्यरुंधन्नुद्गलद्बाष्पमौत्कंठ्याद्देवकीसुते निर्यात्यगारान्नोभद्रमिति स्याद्बांधवस्त्रियः १४ मृदंगशंखभेर्यश्च वीणापण
गोमुखाः धुंधुर्यानकघंटाद्या नेदुर्दुंदुभयस्तथा १५ प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ववृषुः कुसुमैः कृष्णं प्रेमव्री
डास्मितेक्षणाः १६ सितातपत्रं जग्राह मुक्तादामविभूषितं रत्नदंडं गुडाकेशः प्रियः प्रियतमस्य ह १७ उद्धवः सात्यकिश्चैव
व्यजने परमाद्भुते विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि १८ अश्रूयंताशिषः सत्यास्तत्र तत्र द्विजेरिताः नानुरूपानुरू

कानुध्यानाद्गलदपि बाष्पं न्यरुंधन् १४ मृदंगादयः समं युगपन्नेदुर्दध्वनुः १५ कुरूणां नार्यः कृष्णं दृष्टुमिच्छवः प्रासादशिख
रारूढाः प्रेमादीन्यासां संतीति तथाभूताः ... प्रेमादिपूर्वकमीक्षणं यासां ताः ईशितव्या कृष्णं कुसुमैर्ववृषुः १६ प्रेम्णः
प्रीतिविषयो गुडाकेशोऽर्जुनः प्रियतमस्य कृष्णस्य सितातपत्रं श्वेतच्छत्रं जग्राह कथंभूतं मुक्तानां दामभिः सरैर्विभूषितं रत्नमयो
दंडो यस्य तत् १७ उद्धवः सात्यकिश्चाभौ परमे अद्भुते च व्यजने जगृहतुः अपि कुसुमैर्विकीर्यमाणो मधुपतिः रेजे राजते १८
निर्गुणस्य सत्वादिप्राकृतगुणरहितस्य गुणाः ज्ञानादिषाड्गुण्यस्वभावस्य सत्त्वात् योन संतीशे ते जो वक्तेः जयेत्यादिवचनात्
नानुरूपाः अवाप्तसमस्तकामत्वात् अनुरूपाः भक्तिलेशकारित्वात् तत्र तत्र द्विजेरिताः सत्या एव अस्य आशिषः अश्रूयंत १९

ति२

अहो बतेति कुशस्थली द्वारका स्वर्यशसः कर्मलिप्सूनां स्वर्लोकयशसस्तिरस्करी भुवो भूमेः पुण्यं यशस्करी [illegible] त्याव हती नितथा
नरदेवमं जयति नु विशिष्टं यत्प्रजाः पश्यस्याः कुशस्थल्याः प्रजा यद्यस्मादनुग्रहेणाभिनतमधिवसंतं स्मितयुक्तोऽवलोको यस्य तं स्वपतिमात्मना
भा०प्र० ५८ यकं नित्यं पश्यंति स्म यदनुग्रहार्थं यत्प्रजाविषयकानुग्रहार्थं अभिनतमिति वान्वयः २७ नूनमिति अस्य कर्तरिष स्त्रीणां नेन [illegible] गृही
ताः पाणयो यासां ताभिः कन्नीभिर्व्रतैरुपवासादिभिः स्नानेषु पुण्यजलानां हुतैर्होमैरादिशब्देन दानादिभिरेभिर्व्रतादीनां समाहारद्वंद्वैक
त्वं एभिः साधनैर्नूनमीश्वरः समर्चितः पूर्वजन्मनीति शेषः कुत एतदनुमीयते इत्यतो विशिनष्टि याः प्रस्य गृहीतपाणयः स्त्रियः [illegible]
रिक्तमधरामृतं मुहुर्मुहुः पिबंति अनाराधितेश्वराणामेतद्दुर्लभमिति भावः कस्याधरामृतं यस्मिन्नाशयो मनो यासां ता व्रजस्त्रियः

अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः पश्यंति नित्यं यदनुग्रहेषितं स्मितावलोकं स्वपतिं स्म यत्प्र
जाः २७ नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः पिबंति याः सख्यधरामृतं मुहुर्व्रजस्त्रियः संमुमुहुर्यदाश
याः २८ या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान्हि शुष्मिणः प्रद्युम्नसांबाम्बसुतादयोऽपरा याश्चाहृता भौमवधे सहस्रशः
२९ एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधु कुर्वते यासां गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याहृतिभिर्हृदि स्पृशन् ३०

संमुमुहुः तस्य श्रीकृष्णस्याधरामृतमित्यन्वयः २८ या इति याः इत्यस्य तद्भुतरेणान्वयः शुष्मिणो मन्त्रान्चैद्यप्रमुखान् शिशुपालप्रभृती
न्स्वयंवरे प्रमथ्य मथनपूर्वकं विजित्य वीर्यमेव शुल्कं मूल्यं पणं तेन नरदेवेंद्रमंतेन याः आहृताः प्रद्युम्नसांबप्रसवादयः स्त्रियः तत्र प्रद्युम्नप्रस
वा रुक्मिणी सांबप्रसवा जांबवती आदिशब्देन सत्यभामादिसंग्रहः तथा परा अन्याः स्त्रियः स्त्रियो भौमवधे नरकासुरवधे सहस्रशः षोड राम ५८
शसहस्रसंख्याकाश्चाहृताः २९ एताः सर्वाः निरस्तं शौचं पवित्र [illegible] भूतमपि स्त्रीत्वं परं केवलं
साधु यथा तथा कुर्वते कुर्वंतीव त इत्यार्थे तदेव दर्शयितुं विशिनष्टि यासां [illegible] केशाद्दुत्पुणकर्ता पुष्करलोचनः क
मलनयनः श्रीकृष्णः कदाचिदपि नापैति न त्यजति कथंभूतः सन् आहृतिभिः [illegible] हृदि स्पृशन् हृदयंगमः सन्
सोयं श्रीकृष्णपात्नी सर्पः ३० ॥

सवा इति निर्जितानीन्द्रियाणि प्राणाश्च यैः निर्जितः मातरिश्वा प्राणो यैस्ते सूरयः भक्त्योत्कलितं संयुक्तं मतएवामलं चेतस्तेन यत्पदं स्वस्वरूपं पश्यन्ति ... स सत्त्वमन्तःकरणं परिमार्ष्टुं शोधयितुमर्हति ... हे सखि गुह्येषु वेदेषु वेदान्तेषु गुह्यमिति विशेषणाद्देवादिभिर्वर्णितगुह्यस्वरूपगुणयाथात्म्योपदेष्टृभिः ... कृपायस्य य एक एव सत्तात्मनः स्वस्य लीलया लीलार्थं जगत्सृजत्यवति रक्षत्यत्ति संहरति तत्र जगति न सज्जते जगदंतरात्मतया स्थितस्तत्कृतदोषैर्न सज्जते चेन प्राप्नोतीति वा स एवायं कृष्णः २४ नन्वेवंविधश्चेत्किमर्थं यादवान्वयतमरूपेणावतीर्ण इत्याशंकायां दुःकृतविनाशाय साधुपरित्राणाय च प्रतियुगमवतीर्य धुनैवं रूपेणावतीर्ण इत्यभिप्रायेणाहुस्त्विति यदेति यदा तमोधियो नृपाः तमोगुणा इति च पाठः तत्र नाम सास्मत एवाधर्मेणानीवंति तदैवं ... विधो भगवान् वायदुःकृद्विनाशपूर्वकसाधूनामभ्युदयाय सत्त्वतः ॥

स वा अयं यत्पदमत्र सूरयो जितेन्द्रिया निर्जितमातरिश्वनः पश्यन्ति भक्त्युत्कलितामलात्मना नन्वेष सत्त्वं परिमार्ष्टुमर्हति २३ स वा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते २४ यदा ह्यधर्मेण तमोधियो नृपा जीवन्ति तत्रैष हि सत्त्वतः किल धत्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे युगे २५ अहो अलं श्लाघ्यतमं यदोः कुलमहो अलं पुण्यतमं मधोर्वनं यदेष पुंसामृषभः श्रियः पतिः स्वजन्मना चंक्रमणेन चाञ्चति २६

... सत्त्वमयानि रूपाणि युगे युगे दधद्बिभ्राणः भगमैश्वर्यं ... कं ऋतं पुण्यं कर्म दयां यशश्च धत्ते स्वाभाविके ... इति प्रवाचयति ... एवं सर्वः ऋतं शब्दः पुण्यशब्दवाची ... स्य कर्मणो दुराकृष्टोवाति ... आत्मानं जुगुप्सेदिति पुण्यप्रतियोगित्वेनानृतशब्दमेयोगात्त भगवत्कर्मणां पुण्यत्वेनामवदतो श्लोकानामृणां च पुण्यानां वहत्व २५ यतो भगवानुक्तविधः श्रीमान्नारायण एव श्रीकृष्णरूपेण यदुकुले ... ने विहृत्य द्वारकायामधिवसन् व्रजाः पालयन् ... मीहृ ... भिरन्याभिश्च विहरतीति यदुकुलं मधुवनं द्वारका ... नो भाग्यं तत्र यश्चेतावदिति वाचा मनसा चावगंतुमशक्यमित्यभिप्रायेणाहुस्तितिति अहो इत्यादिभिः ... नमलं नितरां पुण्यतमं कृतः यदस्मात् पुंसां सतां नाम धर्मो नायकः श्रियो लक्ष्म्याः पतिः भगवान् श्रीकृष्णः स्वजन्मना यदुकुलं

तत्राहृता आदरयुक्ताः रवेर्दीपमिवात्मानं जगत्प्रकाशयतः प्रकाशोत्तरानपेक्षस्य स्वयं पदीपमिव उपनीतः बलिः पूजार्थद्रव्यं यानीता
स्ताः ४ प्रीत्युत्फुल्लानि विकसितानि मुखानि येषां तथाविधा अन्वितास्ते तथाभूताः प्रजा हर्षेण गद्गदया कुण्ठितया गिरा तं प्रोचुः रविदृष्टान्ताभिप्रायं
व्यंजयन्विशिनष्टि निजलाभेन नित्यनिरवधिकस्वानंदानुभवलाभेन पूर्णकामम वाप्तसमस्तकाममात्मारामं स्वानुभवैकनिष्ठ
मल्पनयेदमितिभावः केकमिवोचुः सर्वेषु पुत्रेषु सुहृदं सौहार्दयुक्तं पितरमर्भकाः शिशवः पुत्रा इव ५ उक्तमेवाह नता इति
नुभिः हे नाथ तवांघ्रिपंकजं प्रति नताः स्म कथंभूतं विरिंचिना ब्रह्मणा विरिंच्यैः सनकादिभिः सुरेन्द्रैरिन्द्रादिभिश्च वंदितं
तं इह क्षेमं निःश्रेयसमिच्छतां परमुत्कृष्टं परायणं क्षेमसाधनभूतं परमिति क्षेमविशेषणं वा यत्र यदारविंदे परे श्रेष्ठानां
नामपि प्रभुस्तानपि वशीकुर्वन्कालोपि न प्रभवेन्न समर्थो भवेत् यत्र वापि विषये परः प्रभुः कालोपि न प्रभवेत्स्म तदंघ्रिकुं

। तत्रोपनीतबलयो रवेर्दीपमिवादृताः आत्मारामं पूर्णकामं निजलाभेन नित्यदा ४ प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्ष... गिरा
पितरं सर्वसुहृदमवितारमिवार्भकाः ५ प्रजाऊचुः नताः स्म ते नाथ तवांघ्रिपंकजं विरिंचिवैरिंच्यसुरेन्द्रवंदितं ... क्षेम
मिहेच्छतां परं न यत्र कालः प्रभवेत्परः प्रभुः ६ भवाय नस्त्वं भव विश्वभावन त्वमेव माताथ सुहृत्पतिः पिता त्वं सद्गुरुर्नः परमं
च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम ७ अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनं प्रेमस्मितस्निग्ध...री
क्षणाननं पश्येम रूपं तव सर्वसौभगं ८

इति वान्वयः सर्वस्य वशी सर्वस्येशानः न तस्येशे कश्चनेत्यादिश्रुतेः ... अनुसंधेयः
६ हे विश्वभावन विश्वं जगत् भावयति सत्तास्थितिप्रवृत्तिमत्करोतीति तथाभूत त्वं नो स्माकं भवाय अभ्युदयाय भव माता पिता
भ्राता निवासः शरणं सुहृद्गतिर्नारायण इति देवतानां परमं च दैवतं पतिं पतीनां परमं परस्तात् न तत्समश्चाभ्यधिकश्च दृश्यत इति लोके
न चेशिता नैव च तस्य लिंगं यो वै वदां श्रेष्ठः प्रहितो इत्यादिश्रुत्यर्थमनुसंधायोच्चुः त्वमेव माता इत्यादि लोकिकस्तु बंधुरेकं
विध एव त्वं तु सर्वविधबंधुरिति भावः यस्य तवानुवृत्त्या सेवया वयं कृतिनः कृतकृत्या बभूविम स त्वं नो भवाय भवेत्यन्वयः ७ अहो
इति भगवतानाथा वयमहो सनाथाः स्म ... यस्य ... रूपं तव ... कथंभूतं त्रैवि
ष्टपानां देवानामपि दूरदर्शनं दुर्दर्शनं प्रेमपूर्वकं स्मितं स्निग्धं सानुरागं ईक्षणं च यस्मिंस्तदाननं यस्य तत्सौभगं सुंदरं ८ ॥ श्री ॥

धर्मः २

वदंतीनां जल्पंतीनां पुरयोषितामेवंविधा गिरः उक्तीः सस्मितेन निरीक्षणेनैवाभिनंदन्सहरिर्ययौ ३१ तदाऽजातशत्रुः परेभ्यः शत्रु
भ्यः शंकितः स्नेहान्मधुद्विषः श्रीकृष्णगोपीथाय रक्षणाय चतुरंगिणीं ... पांडवगोप्त्र्यः सा सैनाः सेना तां
युंक्त ३२ अथ विरहेण विश्लेषेणानुरान्दुःखितानानन एवदूरमागतान्युधिष्ठिरादीन्नि ... दृढसौहृदान्संनिवर्त्य ... संपरिष्वज्य प्रेमास्र्वौ ...
त्प्रियैः स हरिः स्वनगरीं द्वारिकां प्रायात्प्रययौ ३३ कुर्वादिमरूधन्वांतान्देशानतिक्रम्य ततः सौवीराभीरयोः पराग्पश्चाद्वरिवस्थितानां
ततिद्वारकास्तत्रजनपदान्विभुर्हरिः श्रीकृष्णः उपागात्कथंभूतः हे भार्गव मनाग्भीषच्छ्रांतवाहो भूतः ३४ ३५ तत्रतेस्तत्तद्देश
स्थैस्तत्रतत्र प्रत्युपहृतशिरस्याधायाभिमुखमानीतमर्हणं पूजासाधनं यस्य तथाभूतः सायं वदानर्त्तानुपागात्तदा गतिः सूर्यो गोभिः किरणैः

सूतउवाच एवंविधा गदंतीनां सगिरः पुरयोषितां निरीक्षणेनाभिनंदन्सस्मितेन ययौ हरिः ३१ अजातशत्रुः पृतनां गोपीथाय
मधुद्विषः परेभ्यः शंकितः स्नेहात्प्रायुंक्त चतुरंगिणीं ३२ अथ दूरगतान्शौरिः कौरवान्विरहातुरान् संनिवर्त्य दृढं स्निग्धान्प्रा
यात्स्वनगरीं प्रियैः ३३ कुरुजांगलपांचालान्शूरसेनान्सयामुनान् ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान्सारस्वतानथ ३४ मरुधन्वमतिक्रम्य
सौवीराभीरयोः परान् आनर्त्तान्भार्गवोपागाच्छ्रांतवाहो मनाग्विभुः ३५ तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः सायं भेजे दि
शं पश्चाद्गविष्ठो गां गतस्तदा ३६ ॥ ॥ इति श्री० प्रथमस्कंधे भागवत्पुराणे दशमोऽध्यायः १० सूतउवाच आनर्त्तान्स उपव्रज्य स्वृद्ध
न्जनपदान्स्वकान् दध्मौ दरवरं तेषां विषादं शमयन्निव १ सउच्चकाशे धवलो दरो दरोऽप्युरुक्रमस्याधरशोणशोणिमा दाध्मा
यमानः करकंजसंपुटे यथाब्जखंडे कलहंस उत्स्वनः २ तमुपश्रुत्य निनदं जगद्भयभयावहं प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः ३

स्ति रश्मीन्नियुत्य नेः पश्चाद्दिशं प्रति सायं भेजे प्राप्तः गो उदकं गतश्च आपम ... विश्रामी निभृतः ३६ प्रथमे दशमः १० सभगवान्स्वृद्धान्
स्वकानानर्त्तान्जनपदानुपव्रज्य प्राप्य तत्रत्यानां विषादं खेदं शमयन्निव दरवरं शंखश्रेष्ठं पांचजन्यं दध्मौ ध्वनयामास १ ... मा
यमानो दरवरः स्वतो धवलमुदरं यस्य तथाभूतो विदामोदर ... धरशोणिम्ना शोणिमा यस्य सः सभगवत्करकं ... थेः
कासे नितरां चकाशे यथाऽब्जखंडे रक्तकमलसमूहे उत्स्वनोउच्चैःस्वनो यस्य सः हंसस्तद्वत् २ जगतो भयं येन ... तं निनादं
निनदं श्रुत्वा सर्वाः प्रजा भर्तुर्भगवतो दर्शने लालसाः आसक्तचित्ताः प्रत्युद्ययुः प्रत्याजग्मुः ३ ॥ ॥ श्री ॥ ॥ श्री ॥

भा०पु०
६०

60

वारणेंद्रं गजेंद्रं पुरस्कृत्य पुरोवस्थाप्य ससुमंगलैः स्वस्तिवाचनसहितैर्ब्राह्मणानां शंखानां तूर्याणां च निनादेन ब्रह्मघोषेण च महादृताः
आदरयुक्ताः १८ हे ब्रह्मन्प्रणयेन हेतुनाऽऽगतं साध्वसं भयं येषां तथाभूताः संतो रथैर्गमनसाधनैः प्रत्यु[illegible]ग्मुरभिमुखं ययुः तथा
वारमुख्याः गणिकाः शतशः लसद्भ्यां कुंडलाभ्यां निर्भातौ कपोलौ येषु तेषां वदनानां श्रीः शोभा यासां तास्तद्दिदृक्षया यानैर्गमनसा
धनैः प्रत्युज्जग्मुः १९ नटादयोऽद्भुतानि उत्तमश्लोकस्य भगवतश्चरितानि जगुः तत्र नटा अभिनेतारः नर्तकाः स्त्रीणां नृत्यशिक्षकाः
गंधर्वा गायकाः सूताः पौराणिकाः मागधा वंशावलिपाठकाः वंदिनं मंगलवादिनः स्तोत्रपाठकाश्च २० तत्र भगवान्यथाविधि नम
स्कारालिंगनकरस्पर्शस्मितावलोकनादिभिर्यथायोग्यं बसुदेवादिभिरुपसंगम्य सर्वेषां पौराणामनुवर्तिनां भूपानां च मानमद

वारणेंद्रं पुरस्कृत्य ब्राह्मणैः ससुमंगलैः शंखतूर्यनिनादेन ब्रह्मघोषेण चादृताः १८ प्रत्युज्जग्मुरथैर्हृ
ध्वसाः वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः लसत्कुंडलनिर्भातकपोलवदनश्रियः १९ नटनर्तकगंधर्वा
वंदिनः गायंति चोत्तमश्लोकचरितान्यद्भुतानि च २० भगवांस्तत्र बंधूनां पौराणामनुवर्तिनां यथाविध्युपसंगम्य स
नमादधे २१ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः आश्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः २२ स्वयं च गुरु
भिः सदारैः स्थविरैरपि आशीर्भिर्युज्यमानोऽन्यैर्वंदिभिश्चाविशत्पुरं २३ राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः हर्म्या
रुरुहुर्विप्र तदीक्षणमहोत्सवाः २४ नित्यं निरीक्ष्यमाणानां यदपि द्वारकौकसां न वितृप्यंति हि दृशः श्रियो धामांगमच्यु
तं २५ श्रियो निवासो यस्योरः पानपात्रं मुखं दृशां बाहवो लोकपालानां सारंगाणां पदांबुजं २६ ऐसन्मानं चकार विभुर्भग

वानाश्वपाकपर्यंतेभ्यः चतुर्थ्यंतमिदं आश्वास्य वरैर्यथाभिमतैर्वरैर्मानमादध इत्यन्वयः २१ २२ स्वयं च सदारैर्गुरुभिः स्थविरैर्वृद्धैर्विप्रैरन्यै
र्वंदिभिश्च कर्तृभिराशीर्भिर्युज्यमानः पुरमाविशत् २३ द्वारकायां राजमार्गं कृष्णे गते सति तत्र तत्र स्त्रियः तस्य कृष्णस्येक्षणमहानु
त्सवो हर्षो यासां ता हे विप्र हर्म्याण्यारुरुहुरित्यर्थः २४ हि शब्देनात्र प्रसिद्धिर्द्योत्यते २५ अनितावैरा [illegible] स्येत्यभिप्रायेण तद्धि
३२ य इति यस्य तस्य [illegible] रोमुखबाहुपदांबुजैः प्रत्येकमन्वयः यस्योरः श्रियो निवासः [illegible] लावण्यपानुभवायत्तदेव समाश्रितवती श्री
रित्यभिप्रायः यस्य मुखं दृशां चक्षुषां च नृणां [illegible] नपात्रं लावण्यरसपानस्थानं यस्य च बाहवो लोकपालानां पानपात्रं तल्लावण्य
रसपानपात्रं यस्य च पदांबुजं सारंगाणां सारंग [illegible] मुनीनां तल्लावण्यपानपात्रं सारं गायंतीति सारंगाः सारतमार्थ

ष्टाः प्रणयागतसा २९

र्वाः सूतमागध

राम
६०

भोऽम्बुजाक्ष भवान्सुहृद्दिदृक्षया यद्वा कुरून्मधून्वा जनपदान् अपससार गामत तत्र तदा हे अच्युत नोऽस्माकं तामवपश्यतां रवेर्विना रविं
विना दृशां क्षण कालोऽब्दकोटिप्रतिमः संवत्सरस्य [illegible] ही कालस्तु [illegible] भवेत् [illegible] इति प्रजानाम् [illegible] वाचः श्रृण्वन् भक्तवत्सलो भ
गवानवलोकनेनानुग्रहं वितन्वन्पुरं प्राविशत् पूःशब्दोपनतु पुरशब्दः १० कथंभूतां पुरं मधुभोजादयो यादवान्तरविशेषाः तैरात्मतुल्य बां३
बलैः कृष्णतुल्यबलैर्नागैः काद्रवेयादिभिर्भोगवतीमिव गुप्तां रक्षितां भोगवती नाम नागानां पुरी ११ सर्वर्तुषु पुष्पफलैरेव सर्वो
विभवः फलपुष्पादिसमृद्धिर्येषां ते पुण्या पावना वृक्षाश्च मन्दारपारिजातादयः लताश्च तदर्थं स्तम्भेष्वाश्रमाश्रये युक्तैरुद्यानोपवनारा
मैर्वृतां पद्माकराणां श्रीः शोभा यस्यां तत्रोद्यानं राज्ञां क्रीडास्थानं आरामः [illegible] १२ गोपुराकाराणां मार्गेषु कृतानि कौतुका

यर्ह्यम्बुजाक्षापससार भो भवान् कुरून्मधून्वाथ सुहृद्दिदृक्षया तत्राब्दकोटिप्रतिमः क्षणो भवेद्रविं विनाक्ष्णोरिव नस्तवाच्युत
९ सूत उवाच इति चोदीरिता वाचः प्रजानां भक्तवत्सलः श्रृण्वानोऽनुग्रहं दृष्ट्या वितन्वन्प्राविशत्पुरं १० मधुभोजद [illegible]
कुरान्धकवृष्णिभिः आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ११ सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः उद्यानोपवनारामैर्वृतां पद्मा
करश्रियं १२ गोपुरद्वारमार्गेषु कृतकौतुकतोरणां चित्रध्वजपताकाग्रैरन्तः प्रतिहतातपां १३ संमार्जितमहामार्गरथ्यापणकचत्वरां
सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः १४ द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः अलंकृतां पूर्णकुम्भैर्बलिभिर्धूपदीपकैः
१५ निशम्य प्रेष्ठमायान्तं वसुदेवो महामनाः अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः १६ प्रद्युम्नश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः
प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः १७

मंगलार्थानि तोरणानि जलपात्रपल्लवादिनिर्मितानि यस्यां चित्राणां ध्वजानां [illegible]
रन्तः प्रतिहतो निरस्त आतपो यस्यां १३ संमार्जिता महामार्गादयो यस्यां महामार्गा राजवीथयः रथ्या उपवीथयः आपणकाः [illegible]
त्वाः कृपविक्रयादिग्रहा तो चत्वरा राजगृहादिशालाः गन्धोदकैः सिक्तां फलादिभिरुप्तां विकीर्णां १४ प्रतिद्वारं दध्यादिभिः [illegible]
पूर्णकुम्भैः पूजाद्रव्यैः धूपैर्दीपैश्चालंकृतां एवंभूतां पुरमिति पूर्वेणान्वयः १५ प्रेष्ठं निरतिशयप्रियतमं भगवन्तमायान्तं निशम्याद
र्यमहामना वसुदेवः अक्रूरादयश्च १६ प्रकर्षेण हर्षस्तस्य वेगेनोत्कण्ठेन उच्छ्वसितानि उदस्तानि त्यक्तानि इति यावत् शयनादीनि
येषां ते तथाभूताः सन्तः १७ ॥
॥०॥

भा०प्र०
६२

तमीति दुरंतोऽगाधो भावः स्नेहो यासां ताः पत्न्यः समागतं पतिमात्मजैर्दृष्टिभिरंतरात्मना च परिरेभिरे आलिंगितवत्यः शरीरपरिरंभस्य र
हःकालिकत्वात्तेन साक्षात्त्वकुर्वंति तु पुत्रैः प्रद्युम्नादिपुत्रद्वारेणेत्यभिप्रायेणात्मजैरित्युक्तं मनसा चक्षुषा च समं साक्षादेव चक्षुरित्यभिप्रा
येणांतरात्मना दृष्टिभिश्चेत्युक्तं हे भृगुवर्य विलज्जतीनां तासां मत एव नेत्रयोरंबु निरुद्धमपि विक्लवाद् धाष्ट्यादस्रवत् ३२ वृत्तैः सा[illegible]
मांसनाशयाकुल स्युस्तस्यात्मजैरित्यादिना च तासां तद्विरहासहिष्णुत्वं सूचितं तदेवोपपादयति यद्यपीति यद्यप्यसौ भगवा[illegible]
स्तासां पार्श्वगतो नः रहोगतश्च तथापि तस्यांघ्रियुगं तासां नवं नवं एवाभूत् यतस्तत्सदा तस्य पादारविंदात् को विरमेत विश्लिष्याव[illegible]
तमुक्तं केन कार्यीत्यर्थः तदेव दर्शयितुं विशिनष्टि चलापि चंचलापि श्रीर्लक्ष्मीरपि कदापि यत्पदं घ्रिं न जहाति तत्सदा को विरमेत

61 तमात्मजैर्दृष्टिभिरंतरात्मना दुरंतभावाः परिरेभिरे पतिं निरुद्धमप्यास्रवदंबु नेत्रयोर्विलज्जतीनां भृगुव
र्यवैक्लवात् ३२ यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवं नवं पदे पदे का विरमेत तत्
पदाच्चलापि यच्छ्रीर्न जहाति कर्हिचित् ३३ एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्त
तेजसां विधाय वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः ३४ स एष नरलोकेऽस्मिन्नव
तीर्णः स्वमायया रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा ३५ ॥ ॥ ॥श्री॥ ॥ ॥१॥

त्वन्वयः तदापीति पाठांतरं तत्र यद्यपि यदापि पार्श्वगतो रहोगतश्च तदापि तस्यांघ्रियुगं नवं नवं किं पुनः कदाचिदंतरितं न दंतवेति
के मुत्पन्नायासिद्धं इति भावः ३३ अथोपरितनेषु गां तं संगरह्य विवचुरुक्त रत्नांतसमासेनानुवदति एवमिति क्षितेर्भूमेर्भारस्य जन्मोद
यो येभ्यः अक्षौहिणीभिः परिवृत्तं परितो व्याप्तं तेजः शौर्यं येषां तेषां नृपाणां कौरवाणां पांडवानां च मिथः वैरं श्वसनो वायुरनलम
ग्निं इव विधाय वद्धयित्वा स्वयं निरायुधः एव तेषां मिथो वधेन वधाय च उपरतः उपरराम ३४ स एष अस्मिन् नरलोके वतीर्णो भगवान्
स्त्रिय एव रत्नानि तेषां कूटे [illegible] समुदाये स्थितः रेमे चिक्रीडे यथा प्राकृतः स्त्रीवश्यस्तद्वत् प्राकृतो यथेत्यनेन स्त्रीवाश्यपात्वानुकारमात्रमे
वन तु परमार्थतस्तदस्तीति सूचितं ३५ ॥

राम
६२

सितेति पथि सितातपत्रेण च व्यजनैश्चोपस्कृतः [illegible] दीप्यमान इत्यर्थः पिशंगवाससी यस्य स पिशंगवासाः वनमालया बभौ कथं यथा कादिभिः युगपत्समुदितैः घनो नीलमेघः [illegible] द्युतः [illegible] तावत्स्थानमस्ति तत्र कादिस्थानीयानि मुकु
टवनमालावस्त्रभूषणानि अर्कः विद्युद्वैद्युतं उडुपश्चंद्रः यद्वा उडुपगृहः [illegible] श्रवणमप्युपलक्षणं तत्रोडुपस्थानीयं
सितातपत्रं गुरुकुक्षस्थानीये व्यजने उत्तरस्थानीयानि प्रसूनानि इंद्रधनुः स्थानीया वनमाला विद्युत्स्थानीयं पिशंगवस्त्रं अर्कस्थानी
यं तु मुकुटमिति सितातपत्रादयुपस्कृतत्वादिविशेषणसामर्थ्यात् २७ नतस्तु पित्रोर्देवकीवसुदेवयोर्गृहं प्रविष्टो भगवान्मातृभिर्दे

सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि पिशंगवासा वनमालया बभौ घनो यथार्को
डुपचापवैद्युतैः २७ प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ववंदे शिरसा सप्त देवकीप्रमुखा मु
दा २८ ताः पुत्रमंकमारोप्य स्नेहस्नुतपयोधराः हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः २९ अथा
विशत्स्वभवनं सर्वकाममनुत्तमं प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ३० पत्न्यः पतिं प्रोष्य गृहा
नुपागतं विलोक्य संजातमनोमहोत्सवाः उत्तस्थुरारात्सहसासनाशयात्साकं व्रतैर्व्रीडितलोचना

नना:
देवकीरोहिण्यादिभिः परिष्वक्त आलिंगितः देवकीप्रमुखा मातॄः सप्त मनस्कारपूर्वकं ववंदे २८ ता देवक्यादयः पुत्रं कृष्णमंकमारोप्य [illegible]
स्नुतौ पयोधरौ स्तनौ यासां हर्षेण विह्वलितः आत्मा मनो यासां तथाभूताः नेत्रजैर्जलैरानंदबाष्पैः सिषिचुः २९ स्वभवनं [illegible] विशत्
यं भूता सर्वकामाः काम्यमानाभोग्यभोगोपकरणानि यस्मिन्नास्ति यस्मिन्नास्त्युत्तमं यस्मात् यत्र पत्नीनां षोडशसहस्राणि प्रासादास्तथाभूतं
तदा प्रोष्य प्रवासं कृत्वा गृहानुपागतं प्रियं दूरादेव विलोक्य पत्न्यः रुक्मिण्यादयः संजातो मनसि महानुत्सवो हर्षो यासां व्रीडिते लोच
ने मुखान्याननानि यासां तथाभूताः व्रतैः सह आसनात् आशयात् सहसा आराच्च उत्तस्थुः तत्र व्रतैः [illegible] स्थानं नाम तत्रागमनार्थं व्र [illegible]
नादुत्थानं प्रसिद्धं आशयात् दमिशा यदुत्थानं हि तत्तौत्कंठ्यात् दर्शनस्य जातत्वात् ३१ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥

यद्यपि परीक्षिज्जन्मकर्मादिकं पुरस्तादेव पृष्टं यद्यपि च तदुक्तमेव तदुपोद्घाततया तथापि अयं प्रश्नः किमकार्षीत्तत इति प्रकृत प्रश्नस्योत्तरं
च श्रुतं ॥ एवं चांतरा पुनस्तत्प्रश्नानुपपत्तिः तथा किं विमकार्षीत्तत इति पृष्टस्य राज्यशासनानंतरभाविनो युधिष्ठिरवृत्तांतस्य परी
क्षिज्जन्मानंतरमेव तच्छुश्रूषुस्तावत्स्वयमेवावरोधं विराटया: कुरु तंतव इति प्रक्रम्यापदिसमाप्ति केनास्त्रेण तावदुत्तराया गर्भो
हतः ॥ ततः पुनरीशेन कृष्णेनाजीवितः इत्युक्तानुवाद ॥ १ ॥ तत उपरीतनं तस्योत्तरातनयस्य महात्मनः यज्जन्मादि तदिदं हे महाबुद्धे श्रो
तुमिच्छामि ॥ निधनं मरणं यथैवासीत्सप्रेत्य मृत्वा यथा गतवांस्तां गतिं प्राप्नवान् तदिदमित्यन्वयः ॥ २ ॥ यदि गदितुं मन्यसे वक्तुं मेदं योग्यं
च मन्यसे चेत्तर्हि श्रद्दधानानां नोस्माकं ब्रूहि ॥ कुतो वस्तज्जन्मादि शुश्रूषा श्रद्धा बभूवेत्यत आह विशिनष्टि ॥ यस्य [illegible] रा

शौनक उवाच ॥ अश्वत्थाम्नोपयुक्तेन ब्रह्मशीर्ष्णोरुतेजसा ॥ उत्तराया हतो गर्भ
ईशेनाजीवितः पुनः ॥ १ ॥ तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः निधनं च यथै
वासीत्स प्रेत्य गतवान्यथा ॥ २ ॥ तदिदं श्रोतुमिच्छामि गदितुं यदि मन्यसे ॥ ब्रूहि नः
श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ॥ ३ ॥ सूत उवाच ॥ ॥ अपीपलद्धर्मराजः पि
तृवद्रंजयन्प्रजाः ॥ निःस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ॥ ४ ॥ ॥ रामराम ॥

नेपरमात्मयाथात्म्यज्ञानमदादुपदिष्टवान् महाभागवत्वात्तज्जन्मादि शुश्रूषा नः संभवादिति भावः ॥ अत्र जन्मैव प्रा[illegible]न
र्यते ॥ तस्य कर्मादिकं तु युधिष्ठिरादिवृत्तांतानंतरकालिकत्वात्पश्चाद्वर्णनानंतरमेव विशेषतः पृष्टव्यमपि जन्म कालिकजा
तकद्वारा सामान्यतो वुभुत्सुना जन्मना सहोपात्तं ॥ अतएवोत्तरेपि जातकद्वारैव तत्कर्मादि [illegible] र्णनमित्यवगंतव्यं ॥ ३ ॥ परिक्षित्तो
जन्मप्रकारं वक्तुं तावत्तात्कालिकयुधिष्ठिरावस्थानप्रकारमाह ॥ अपीपलदिति [illegible] ॥ [illegible] पीपलत् पालयत्कथंभूतः कृ
ष्णस्य पादयोरनुसेवया अनुध्यानेन हेतुना सर्वेभ्यः निर्गतास्पृहा यस्य तथाभूतः [illegible] नु [illegible] ॥ निस्पृहः सन्नि
त्यर्थः ॥ ४ ॥

भा०पु०
६२

62

राम
६२

तदेववक्तव्यंविशिनष्टि उद्दामेति ताःप्रमदोत्तमाःकुहकैर्वञ्चनोपायैर्यस्येन्द्रियंप्रमथितुंनशेकुःनाशक्नुवन्तमयंमन्यतइत्युत्तरेणान्वयः सु
तरांपारवश्यंतासांभावस्सूचनायप्रमदोत्तमाविशिनष्टि यासांमुद्राप्रभावादिभिर्निहतःसन्मदनोऽपिसंमुह्यमोहंप्राप्यस्वयंचापंधनु
रजहात्त्यक्तवान्ताःप्रमदोत्तमाइत्यन्वयः उद्दामउदारोऽगाधइतियावत् भावोभिप्रायस्तेनपिशुनःसूचकःअमलःसुंदरश्च
हासस्तेनचव्रीडापूर्वकावलोकनेनचनिहतःअभिभूतः ३६ एवंविधंतंयस्त्रीवश्यंमन्यतेसोऽज्ञइत्याह तमिति मनुजंव्यापृण्वानं
मनुजवच्चेष्टमानंमनुष्यभावेनस्वयाप्यात्ममायाछादयंतमित्यर्थःवस्तुतोनिःसंगमपिसंगिनमिवभासमानंतमिमंभगवंतंयोलो
कोऽज्ञःनश्यात्मौपम्येनस्वतुल्यत्वेनमन्यतेसोयंलोकःअतोहेतोरबुधःनितरामज्ञः ३७ अथविषयैरनाकृष्टत्वमीश्वरस्यनाश्चर्य
मित्यभिप्रायेणेश्वरत्वंनिर्वक्ति एतदिति प्रकृतिस्थोपिमूलप्रकृतिनियामकोपितद्गुणैःसत्वादिभिरात्मस्थैर्जीवगतैरविद्याश्रितैः

उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतोमदनोपियासांसंमुह्यचापमजहात्प्रमदोत्तमास्तायस्येन्द्रियंविम
थितुंकुहकैर्नशेकुः ३६ तमयंमन्यतेलोकोह्यसंगमपिसंगिनं आत्मौपम्येनमनुजंव्यापृण्वानंयतोऽबुधः ३७ एतदीश
नमीशस्यप्रकृतिस्थोपितद्गुणैः नयुज्यतेसदात्मस्थैर्यथाबुद्धिस्तदाश्रया ३८ तंमेनिरेऽबलामूढास्त्रैणंचानुव्रतंरहः अप्रमा
णविदोभर्तुरीश्वरंमतयोयथा ३९ ॥इतिश्रीमद्भागवतेमहापुराणेप्रथमस्कंधेभगवत्प्रवेशवर्णनंनामैकादशोऽध्यायः

देवादिभिश्चगुणैःसदानयुज्यतइतिपदेतदेवेश्वरस्येशनमित्यन्वयः सदेत्यनेनमुक्तस्याव्यक्तिः नेतिपूर्ववैतृर्युक्तेःहेयगुणास्पर्शोदौरण ३९
माहयथेति तदाश्रयाईश्वराश्रयाबुद्धिस्तद्गुणैर्यथासत्वादिभिर्नयुज्यते नहिस्वाभाविकीज्ञानबलक्रियाचश्रुतविधंस्वतःसर्वगत
स्यज्ञानंसत्वरजस्तमोन्वयाधीनसम्पत्कासम्यगुक्तंयुक्तं सर्वंसर्वप्रकारेणविद्चिन्त्यंनहेयराहत्तइतियत्तदेवाहि ईश्वरस्येश्वर
त्वमित्यर्थः ३८ यथैवमज्ञोलोकस्तमुक्तविधमीश्वरमात्मतुल्यंमन्यते तथास्त्रियोप्यज्ञानादात्मवश्यममन्यतेत्याह तमिति संसा
रिणमिंद्रियप्रसूतामतयोयथेश्वरंनजानंतिकिंतुमोहादन्यथामेनिरे एवंभूताताःअबलाःस्त्रियोपितंभगवंतंरहःस्त्रैणंस्त्रीस
मूहमनुव्रजंतंस्त्रीसमूहानुवर्तिनंमेनिरे तत्रहेतुः भर्तुरप्रमाणविदःअमीयतइतिप्रमाणंस्वरूपंतत्स्वरूपमजानंतः ३९ इतिश्री
वीरराघवविरचितायांप्रथमेएकादशः २२

भ॰पु॰:९अ:२

ततः सर्वगुणोदर्के सर्वगुणाधिके तदेवाह सानुकूलग्रहोदये आनुकूल्येन सहितानां ग्रहाणां भृगुंवंगिरादीनामुदयो यस्मिन् लग्न
इति विशेष्यमध्याहर्तव्यं सानुकूला ग्रहा यस्मिं [illegible] नुगेन पांडोर्वंशधरः वंशवर्द्धनः पुनरोजसा पांडुरिव पांडुसदृशो जज्ञे १२ ततः
प्रीतं हृष्टमनो यस्य स राजा युधिष्ठिरः धौम्यकृपादिभिर्विप्रैः सुमंगलं स्वाशिषं वाचयित्वा जातकं जातकर्म कारयामास १३ तन्निन
भा॰पु॰ नं॰ ६ पतिर्युधिष्ठिरो हिरण्यादीं [illegible] वरान्का मान्यथा योग्यं यथाभिलाषं च कामं प्रादादर्थिभ्यः प्रायच्छन् सतीर्थविद्वान् पात्रविप्रानाश्र
६२ जातीर्थ पौत्रोत्पत्तिनिमित्त दानकाले स्वन्नं सुमृष्टमन्नं च विप्रेभ्यः प्रादात् १४ हिरण्यादिभिस्तुष्टा ब्राह्मणास्तं प्रश्रयेणा दिनयेना
वनतं नम्रं राजानमूचुः १५ तदेवाह एष ह्यीति सार्द्धद्वयेन दै भवतां प्रजातंतौ प्रजासंताने निमित्तं शुक्रे गर्भपिंडे संस्थामुपेयुषि
रूगा॥१

ततः सर्वगुणोदर्के सानुकूलग्रहोदये जज्ञे वंशधरः पांडोर्भूयः पांडुरिवौजसा १२ तस्य प्रीतमना राजा विप्रैर्धौम्यकृ
पादिभिः जातकं कारयामास वाचयित्वा च मंगलं १३ हिरण्यं गां महीं ग्रामान् हस्त्यश्वान्नृपतिर्वरान् प्रादात्स्वन्नं च विप्रे
भ्यः प्रजातीर्थे स तीर्थवित् १४ तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयान्वितं एष ह्यस्मिन्प्रजातंतौ पुरूणां पौरवर्षभ॥ १५॥
दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना १६ तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्र
वाः भविष्यति न संदेहो महाभागवतो महान् १७ युधिष्ठिर॰ अप्येष वंश्यान्राजर्षीन्पुण्यश्लोकान्महात्मनः अनुवर्तिता स्वि

सन्निहितयस्मादैवे [illegible] तः अप्रतिघातेन प्रतिहति रहितेन दैवेन प्रभविष्णुना समर्थीभवनशीलेन विष्णुना वोऽनुग्रहार्थाय रातोर्पितः १६ त
स्मात् विष्णुना रातत्वरूपात्प्रवृत्तिनिमित्तान्नाम्ना वाचकेन शब्देन लोके विष्णुरात इति प्रसिद्धो बृहच्छ्रवा विपुलकीर्तिर्गुणैर्महान्महा
भागवतश्च भविष्यति नात्र संदेहः १७ विप्रैरेवमुक्तो युधिष्ठिरः तस्य भाविनो गुणान्पृच्छति अपि स्विदिति त्रयं समुदितान्व
यो नकं हे सत्तमाः एष जातः शिशुः साधुवादेन साधूनां [illegible] महात्मनः पुण्यश्लोकान् [illegible] पांडुरादीन् शसानुव
र्तिता स्वित् अनुवर्तिष्यति किं पांडुरिव [illegible] भविष्यतीति [illegible] साधूनां वादो यस्मिन् [illegible] नयशसानुवर्तिता स्विदिति वान्वयः

राम ६३

तत्सेवयास्पृहाभावहेतुत्वमेवस्पष्टयंतमाह [illegible] द्वाभ्यां ॥ यस्मात्तु धिष्ठिरस्याशनयायुक्तस्य [illegible] कचंदनादयो न मुदमानंददति किंत्वश्ना
नमेव तथा हे द्विजा ये संपदादयः ते ते कामाः सुरस्पार्हाः सुराणामपि [illegible] ये ते मुकुंद [illegible] युधिष्ठिरस्य मुदमाधिजह्रुः किं
संपादितवंतः न संपादितवंत एवेत्यर्थः ॥ तत्र संपदो भोग्यभोगोपकरणानि [illegible] सुरलोकसाधनान्यश्वमेधादीनि लोकाः क
र्मप्राप्तजनाः महिष्यः पत्न्यः भ्रातरो दिग्विजयिनो भीमादयः मही निष्कंटका पृथ्वी त्रिदिवंगतं [illegible] स्वर्गपर्यंतव्यापि यशश्च ॥५॥६॥ अथ परी
क्षितो जन्मवत्कृत्तावत्तस्य मातुरुदरावस्थानदशामाह ॥ मातुरिति सार्धैः पंचभिः हे भृगुनंदन वीरः उत्तरातनयः मातुर्गर्भगतः उदरगतः ब्रह्मा २५
स्त्रतेजसा दह्यमानः कंचित्पुरुषं ददर्श ॥७॥ कथंभूतमंगुष्ठपरिमिता मात्राङ्गलाद्यो यस्य ॥ न विद्यते मलं देहजं यस्य ॥ स्फुरत्पुरटो हिरण्मयो

संपदः क्रतवो लोका महिषी भ्रातरो मही ॥ जंबूद्वीपाधिपत्यं च यशश्च त्रिदिवं गतं ॥५॥ किं ते कामाः सुरस्पार्हा मुकुंदमनसो द्विजाः ॥
अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ॥६॥ मातुर्गर्भगतो वीरः स तदा भृगुनंदन ॥ ददर्श पुरुषं कंचिद्दह्यमानोस्त्रतेजसा ॥७॥ अंगु
ष्ठमात्रममलं स्फुरत्पुरटमौलिनं ॥ अपीव्यदर्शनं श्यामं तडिद्वाससमच्युतं ॥८॥ श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुंडलं ॥ क्षतजा
क्षं गदापाणिमात्मनः सर्वतो दिशं ॥ परिभ्रमंतमुल्काभां भ्रामयंतं गदां मुहुः ॥९॥ अस्त्रतेजः स्वगदया नीहारमिव गोपतिः ॥ विधमंतं
सन्निकर्षे पर्यैक्षत क इत्यसौ ॥१०॥ विधूय तदमेयात्मा भगवान्धर्मगुब्विभुः ॥ मिषतो दशमासस्य तत्रैवांतर्दधे हरिः ॥११॥

मौलिः किरीटं यस्य ॥ अपीव्यं दृष्टं पुण्यं गतत्वात्सुरहणीयं दर्शनं यस्य तडिदिव वासो वस्त्रं यस्य ॥ आश्रितान्न च्यावयतीत्यच्युतस्तं ॥८॥ श्रीमं
तः रत्नादिगुणैः शोभावंतो दीर्घा आजानुलंबिनश्चत्वारो बाहवो यस्य ॥ तापेन निर्मलीकृते कांचनमये कुंडले यस्य ॥ क्षतजं [illegible] क्षि
णी यस्य ॥ गदा पाणौ यस्य तं उल्का [illegible] स्योगारस्येवाभा यस्यास्तां गदां मुहुर्मुहुः परितः सर्वतः दिशो भ्रामयंतं आत्मानं धारयंतं ॥९॥ गो
पतिं सूर्यमिव नीहारं स्वगदया अस्त्रतेजो विधमंतं नाशयंतं संनिकर्षे स्थितमेवंविधं पुरुषं कोसाविति पर्यैक्षत पर्यालोचितवा
वान् ॥ यतः पर्यैक्षत तत एव प्रवर्तेनिमित्तान्तरीक्षि कुरुद्वाच्य स्यसव भूवेति भावः ॥१०॥ ततः ब्रह्मास्त्रतेजो विधूय निरस्य अपरिमेया
त्माऽपरिच्छिन्नस्वरूपस्वभावः धर्मगोप्ता विभुर्भगवान् हरिर्दशमे मासि तस्य गर्भस्य शिशोरभि [illegible] नः पश्यतः सतस्तत्रैवांतर्हितवान्

भा०स्कं० ६४

२१ राजर्षीणां जैमेजयादीनां जनयिता उत्पथगामिनां धर्ममार्गातिवर्तिनां शास्ता भुवः पृथ्व्याः हेतोर्धर्मस्य च कारणान्निमित्तात् धर्मार्थं चेत्यर्थः एष कलेर्निग्रहीता निग्रहिष्यति २६ द्विजपुत्रेणोपसर्जिताच्छापद्वारा नियोजितात्तक्षकादात्मनः स्वस्य मृत्युं मरणं उपश्रुत्य कर्णपरंपरया श्रुत्वा मुक्तो देहतदनुबन्धिषु संगो येन तथाभूतो हरेः परं स्थानं प्रपत्स्यते प्राप्स्यति २७ एतदेवोपपादयति व्याससुतान्मुनेः शुकाज्जिज्ञासितं विचारितं निर्णीतं इति यावत् आत्मयाथात्म्यं आत्मपरमात्मस्वरूपस्वभाव तत्त्वं देहं तदनुबन्धसंग हेतुभूतं येन सोऽसौ परीक्षित् हित्वा त्यक्त्वा इदं शरीरं गंगायां अद्धा सम्यक् नास्ति कुतश्चिद्भयं यस्मात्तत्पदं धाम स्वरूपं यास्यति २८ इत्थं राजे युधिष्ठिराय तत्पुत्र कर्मादिकमुपदिश्य बोधयित्वा जातकमधिकृत्य प्रवर्तन्ते जातकं शास्त्रं तत्र कोविदा निपुणा विप्राः सर्वे लब्धा अपचितिः पूजा यैस्तथाभूताः स्व

राजर्षीणां जनयिता शास्ता चोत्पथगामिनां निग्रहीता कलेरेष भुवो धर्मस्य कारणात् २६ तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात् प्रपत्स्यत उपश्रुत्य मुक्तसंगः पदं हरेः २७ जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुतादसौ हित्वेदं नृप गंगायां यास्यत्यद्धाऽकुतोभयं २८ सूत उवाच ॥ इति राज्ञ उपादिश्य विप्रा जातककोविदाः लब्धोपचितयः सर्वे प्रतिजग्मुः स्वकान् गृहान् ॥ २९ स एष लोके विख्यातः परीक्षिदिति यत्प्रभुः गर्भे दृष्टमनुध्यायन्परीक्षेत नरेष्विह ३० स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहं ३१

कान्गृहान्प्रतिजग्मुः २९ स जातककोविदैरनुवर्णितप्रभावगुणः एष

उत्तरासुतं परीक्षिदिति लोके विख्यातः कुतः यत् यस्मात्प्रभुः समर्थः उत्तरासुतो गर्भे मातुरुदरे दृष्टं पुरुषं ध्यायन् इह लोके नरेषु तं पुरुषं परीक्षितवानन्वेषितवानिति यावत् परीक्षच्छीकृष्णमध्यवस्यदित्यर्थः ततः प्रवृत्तिनिमित्तात् परीक्षिच्छब्दवाच्यो विख्यातः परीः पूर्वं पर्यैक्षत क इत्यसावितिगर्भावस्थायामपि परीक्षणमपि तच्छब्दप्रवृत्तिनिमित्त मितिसूचितं परिपूर्वादीक्षतेः शतृ[illegible]रेप रीक्षिदिति रूपं परीक्षिदितिच प्रापिकः पाठो दृश्यते रुधारुहि पुषिभ्यः इति क्विप् लादित्य सूत्रेईत्वेनेत्व[illegible]णाभावेपि [illegible]लक दिति प्रत्यये हरित्सरिदादौ शब्दवत् साधुः ३० स परीक्षिदिति प्रसिद्धि[illegible]प्रसिद्धि[illegible]नृपः अयं रसं [illegible] परामर्शकदृत्यनेनानयोनरसंपितृभिर्वृद्धिः[illegible]पूर्यमाणाभिर्वृद्धिंगताभिः काष्ठभि

राम ६४

एवमाद्यशाजातककोविदा ब्राह्मणास्तस्य भाविनो गुणानर्शं... पार्थं आदिदेश... ...रसाधारणैकगुणेनैवानुवर्तिता स्म
पितृतत्त्वसाधारणगुणैः सर्वानवीमाह हे पार्थ मानवः मनोर्वंश... ...स्य सुतः इक्ष्वाकोरिव साक्षात्प्रजाविता प्रजानामविता रक्षि-
ता यथा दाशरथिर्दशरथपुत्रः श्रीरामस्तद्वद्ब्रह्मण्यः १९ यथौशीनरः उशीनरसुतः शिबिस्तद्वदेष दाता शरण्यश्च दौष्यं-
तिरिव भरत इव यज्वनां यष्टॄणां यशो वितनिता यशसो विस्तारयिता २० धन्विनां धनुष्मतामग्रणीः श्रेष्ठः तत्र द्वयोरर्जुनयोः का-
र्तवीर्यपार्थयोस्तुल्यः ताभ्यां तुल्य इत्यर्थः हुताश अग्निरिव दुर्धर्षः प्रसोढुमशक्यः समुद्र इव दुस्तरः अगाधाशयः २१ सिंह इव विक्रां-

ब्राह्मणा ऊचुः ॥ पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा १९ एष दाता श-
रण्यश्च यथा ह्यौशीनरः शिबिः यशो वितनिता स्वानां दौष्यन्तिरिव यज्वनां २० धन्विनामग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः
हुताश इव दुर्धर्षः समुद्र इव दुस्तरः २१ मृगेंद्र इव विक्रांतो निषेव्यो हिमवानिव तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव २२
पितामहसमः साम्ये प्रसादे गिरिशोपमः आश्रयः सर्वभूतानां यथा देवो रमाश्रयः २३ सर्वसद्गुणमाहात्म्य एष कृष्णमनुव्रतः रंति-
देव इवोदारो ययातिरिव धार्मिकः २४ धृत्या बलिसमः कृष्णे प्रह्लाद इव सद्ग्रहः आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः
२५

तः कर्तरि क्तः पराक्रमी वा दिविक्षेपवान्वा हिमवानिव निषेव्यः भूतानामुपजीव्यः असौ शिशुर्वसुधेव भूमिरिव तितिक्षुः प्रसहि-
ष्णुः पितराविव मातापितराविव सहिष्णुरपराधसहिष्णुः २२ साम्ये सर्वभूतसमत्वे पितामहेन ब्रह्मणा समस्तुल्यः सर्वभूतानां पु-
रुषार्थलिप्सूनामाश्रयः आश्रयितुं योग्यः यथा रमाश्रयः श्रीनिवासो देवस्तद्वत् २३ सर्वसद्गुणानां दुर्लभगुणानां माहा-
त्म्यं यस्मिन् कृष्णं भगवंतमनुव्रतः अनुवर्तिना कस्तत्तुल्यस्तद्गुणमाहात्म्ययुक्त इत्यर्थः रंतिदेव इवोदारस्त्यागी २४ धृत्या धै-
र्येण बलिसमः वैरोचनितुल्यः प्रह्लाद इव कृष्णे भगवति भगवति भक्त इति शेषः सद्ग्रहः सतां ग्राहः कर्त्ता अश्वमेधानां
आहर्ता अनुष्ठाता वृद्धानां ज्ञानेन वयसा वा वृद्धानां पर्युपासकः यथोचितसेवकः २५ ॥ ॥ श्री

यद्यपि कार्यक्रमादारभ्याप्रयाणांतविदुरचरितानि कुमारस्य गृहमानमात्रेणोत्साहितानि तथाप्याभावेन कवि-

तयावान्नविविज्ञासितस्तस्मैतदेवोपपादयति यावतः तत्रविदुरः कौषारवो मैत्रेयः कुमारवगोत्रप्रसूतत्वात्तस्मादागतः यावतः प्रश्नान्कृ धत्वादेकाग्रम-

तवान् तत्र कतिपयानामेवप्रश्नानामुत्तरे गोविंदे जाता एकाऽव्यभिचारिण्यनन्यप्रयोजनाभक्तिर्यस्यैतथाभूतः तेभ्यो दशभ्यः प्रश्नेभ्य उपराम अवशिष्टप्रश्नानामुत्तरादिन्नशुश्रूषावेत्यर्थः जातैकभक्तिरित्यनेनलब्धकृतकृत्यत्वमुक्तं २ तमागतं बंधुं विदुरं स्नात्वा सहा- नुजोधर्मपुत्रो युधिष्ठिरः धृतराष्ट्रादयः सूतः संजयः शारद्वतः कृपः ३ अन्याश्च जामयः स्त्रियः ससुताः ४ प्रहर्षेण प्रत्युज्जग्मुरभिमुखं ययुः यथाप्राणोऽगतेप्राणांत्तव शरीराणि तद्वत्प्राणमागतं इव तं प्रत्युज्जग्मुः प्रदरि-

भा०प्र० ६५

यावतः कृतवान्प्रश्नान् क्षत्ता कौषारवाग्रतः जातैकभक्तिर्गोविंदे तेभ्यश्चोपरराम ह २ तं बंधुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः

धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतस्तथा ३ गांधारी द्रौपदी ब्रह्मन्सुभद्रा चोत्तरा कृपी अन्याश्च जामयः पांडोर्ज्ञातयः स-

सुताः स्त्रियः ४ प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतं अभिसंगम्य विधिवत्परिष्वंगाभिवादनैः ५ मुमुचुः प्रेमबाष्पौ-

घं विरहौत्कंठ्यकातराः राजा तमर्हयांचक्रे कृतासनपरिग्रहं ६ तं भुक्तवंतमासीनं विश्रांतं सुखमासने प्रश्रयावन-

तो राजा प्राह तेषां च शृण्वतां ७ युधिष्ठिर उवाच अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान् विपद्गणाद्विषाग्न्या-

65

देर्मोचिता यत्समातृकाः ८ कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमंडलं तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ९ ॥

षंगाभिवादनैर्विधिवद्यथोचितमभिसंगम्य ५ विरहप्रयुक्तौत्कंठ्येन कातराः प्रेमबाष्पौघमानंदाश्रुसमूहं मुमुचुः कृतासनपरि-

ग्रहो येन तं विदुरं राजा युधिष्ठिरोऽर्हयामास पूजयामास ६ ततो भुक्तवंतं विश्रांतमासने सुखमासीनं तं विदुरं स्वानां शृण्वतां सतां

प्रश्रयेणावनतः प्राह ७ तदेवाह अपीत्यादिभिश्चतुर्भिः युष्मत्पक्षवत्पक्षयोः पार्श्वयोः छायायां समेधितान्नोऽस्मान्किस्म-

रथ किं आत्मनां तत्पक्षच्छायासमेधितत्वं स्मारयति समातृकाः मात्रासहिता वयं विषाग्न्यादिरूपाद्विपद्गणात्त्वया विमोचि-

ता ८ क्षितिमंडले चरद्भिः कया वृत्त्या वर्तितं इह भूतले कानि तीर्थानि वैष्णवक्षेत्रमुख्यानि च भवद्भिः सेवितानि ९ ॥ ६५

अथ यदकाक्षीत्तत इति प्रश्नस्योत्तरं संक्षेपेणाह यक्ष्यमाण इत्यादि [illegible] सिद्धोऽहं जिहासया ज्ञातिव
धप्रयुक्तदोषपरिजिहीर्षयाऽश्वमेधेनयक्ष्यमाणइत्यंयोऽश्वमेधेनयजनइतिवृत्तमाह [illegible] कत्तयाऽसुले [illegible] सहस्रा
श्वमेधानांवाजपेयशतानि च । ब्रह्महत्यासहस्राणिपततश्वप्रसिद्धेनाश्वमेधेनयक्ष्यमाणोभगवंतमाराधयितुकामोराजायुधिष्ठि
रः अन्यत्रकरदंडयोः करःस्वामिग्राह्यःदंडःप्रसिद्धःतयोरन्यत्रताभ्यांविनेत्यर्थः अलब्धधनःउपायांतरेणप्राप्तधनःमनोऽयो
चिंतितवान् करदंडाभ्यांलब्धंधनंनयागार्हंउपायांतरेणतुअप्राप्तंधनमतःकथंयक्ष्यामीतिचिंताव्याकुलोबभूवेत्यर्थः ३२ तस्य
युधिष्ठिरस्याभिप्रेतमालक्ष्यान्युतेनाहृतेनश्रीकृष्णेनचोदिताः प्रेरिताः आहृतोभगवानितिवक्ष्यमाणत्वात् भ्रातरोभीमादय
उदीच्यांदिशिप्रहीणंपरित्यक्तराज्ञामिरुत्तस्यधनंभूरिशःआजह्रुः ३३ तेनधनेनसंभृताःसंचिताभाराःयागसाधनानियस्यसोत

यक्ष्यमाणोऽश्वमेधेनज्ञातिद्रोहजिहासया राजाऽलब्धधनोदध्यावन्यत्रकरदंडयोः ३२ तदभिप्रेतमालक्ष्यभ्रातरोऽच्युतचोदिताः॥
धनंप्रहीणमाजह्रुरुदीच्यांदिशिभूरिशः ३३ तेनसंभृतसंभारोलब्धकामोयुधिष्ठिरः वाजिमेधैस्त्रिभिर्भीतोयज्ञैःसमयजद्ध
रिं ३४ आहूतोभगवान्राज्ञायाजयित्वाद्विजैर्नृपं उवासकतिचिन्मासान्सुहृदःप्रियकाम्यया ३५ ततोराज्ञाभ्यनुज्ञातःकृष्ण
यासहबंधुभिः ययौद्वारवतींब्रह्मन्सार्जुनोयदुभिर्वृतः ३६ इतिश्रीमद्भागवतेमहापुराणेप्रथमस्कंधेपरीक्षिज्जन्म
कथनंद्वादशोऽध्यायः १२॥ सूत उ॥ विदुरस्तीर्थयात्रायांमैत्रेयादात्मनोगतिं ज्ञात्वागाद्धास्तिनपुरंतयावाप्तविवित्सितः१

एवंलब्धकामःयुधिष्ठिरःत्रिभिर्वाजिमेधैर्भगवंतंयज्ञरूपमलोपादिभ्योभीतःनिश्छिद्रंयथातथेतिभावः हरिंसमयजत्पूजितवान् ३४ भग
वान्कृष्णोपिराज्ञाहूतःद्विजैर्नृपंयुधिष्ठिरंयाजयित्वासुहृदांप्रीतिंकर्तुमिच्छयाकतिचिन्मासाननुवासः ३५ ततोबंधुभिःसहराज्ञा
युधिष्ठिरेणकृष्णयाद्रौपद्याचानुज्ञातोऽर्जुनेनसहितोयदुभिश्चपरिवृतोहेब्रह्मन् द्वारवतींययौ ३६ प्रथमेद्वादशः १२ कुरु
पांडवकुलद्वयवैगुण्यमेतद्धृतराष्ट्रेणहूतस्तत्पुत्रेणपराभूतोविदुरःतीर्थयात्रायांनिमित्तभूतायांसमागतः ततोऽन्यतःपरस्मात्
मैत्रेयादात्मनोगतिंज्ञात्वा[illegible]ज्ञानविषयज्ञानतयाऽवाप्तविवित्सितः [illegible] विदितवेद्यः
येनाश्रुतंश्रुतंभवत्यमतंमतमविज्ञातंविज्ञातमिति निरवद्यरेखश्रुतेमतेविदितेइदंसर्वंविदितंभवतीतिश्रुतेः पुनर्हास्तिनपुरंप्रागात्स्वार्थं
श्रुतं विज्ञात
अश्रुतानंसंप्रदायात्रूपंअस्यथापरमतेज्ञानेनतत्कालीनायाभक्तेरसंभवात्तातेकभक्तिरित्युक्तवंधनस्यासंगत्यापातात्२

आत्मनैवइतिगतिस्वरूप [illegible] :२

निरंकुर्वन्नस्मद्वनिदनमा६

भा०प्र० ६६

कथं तस्य तत्प्रापनसामर्थ्यमिति शंकायामुदासाय सर्वप्राणि मृत्युकालस्तत्त्वं इ धरस्य योपमः स एवायं वि दुर इति वदन् शंकां नरं ति
र अविज्ञेदिति दर्पान्मांड अथा पाण्डोर्थमो यावद्धृतं च विदुरस्य भ्रूद्भावं धारतावद्दर्षशतमर्थमास ऽ घका अपि
यथाद्यं तत्पापानुरूपं इ स विज्ञकारयामास २५ युधिष्ठिर इति लब्धं राज्यं येन स युधिष्ठिरः कुलं धरं कुलनि हि अथो
ज्ञितं द्रष्टा इन्द्र इन्द्रलोकपालस दृशैर्भ्रातृभिः परपाक्षियाच मुमुदे २६ एवं गृहेषु सक्तानां तत्त्व दीर्घे पागा ही य चे
मविदित मृत्युकालानां कर्त्तृविषष्टी नेरविज्ञातः परमः सर्ववशी कुर्वन्नतएव दुस्तरः कस्याप्यवश्यः कालो मत्यक्रामत्
न तदीहयास्मविज्ञात इति वान्वयः युधिष्ठिरादीनां विषयानुभवकालो व्यतिक्रांतो बभूवेत्यर्थः ७ भ्रातुः श्रेयस्कं प्रकारं

अविज्ञदर्पमादं च यथावदघकारिषु यावद्धारयद्वंशपाद्वर्षशतं यमः २५ युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरं
भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया २६ एवं गृहेषु सक्तानां प्रमत्तानां तदीहया अत्यक्रामदविज्ञातः कालः परम
दुस्तरः ७ विदुरस्तमभिप्रेत्य धृतराष्ट्रमभाषत विदुर उवाच राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतं २८ प्रतिक्रिया न
यस्येह कुतश्चित्कर्हिचित्प्रभो स एष भगवान्कालः सर्वेषां नः समागतः २९ येन चैवाभिपन्नोयं प्राणैः प्रियतमैरपि जनः
सद्यो विमुच्येत किमुतान्यैर्धनादिभिः २० पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः आत्मा च जरया ग्रस्तः परगेहमुपास से २

68

प्रपंचयति विदुर इत्यादिभिर्दशभिः तं कालातिक्रममभिप्रेत्य विदुरो धृतराष्ट्रमभाषत तदेवाह राजन्नित्यादिसार्द्धैर्नवभिः हे राजन्नितः
शीघ्रं निर्गम्यतां वयं तिष्ठामः आगतमुपस्थितमिदं भयं पश्य पालोचय २८ किं तत्तदाह प्रतिक्रियेति कुतश्चिदपि हेतोः कदाचि
दपि यस्य भयस्य प्रतीकारः निवारणं नास्ति स एष भगवान् भजवन्नियामः सर्वेषां नोऽस्माकं कालो मृत्युकालः समागतः स
मुपस्थितः २९ महासक्तिं त्याजयितुं कालं विशिंषन्नाह येनेति अयं परिदृश्यमानो जनः येन कालेनाभिपन्नः अभिपद्य
मानः प्रियतमैर्निरतिशयप्रियैः प्राणैरपि सद्यो विमुच्येत त्यज्येत अन्यैः प्राणान्तर्वधिभिर्धनादिभिर्मुच्येतेति किमु वक्तव्यं स
कालः समागत इत्यन्वय २० विरक्तिमुत्पादयितुं तस्यावस्थां वर्णयति पित्रित्यादिभिः अष्टभिः तव पित्रादयो हताः मृताः व

निरंकुशमास्मि... ६६

कृतकृत्यानां भवतां न तीर्थयात्रया स्वप्रयोजनमस्तीत्यभिप्रायेणाह भवद्विधा इति हे विभो भवादृशाः भा... वताः स्वयमेव तीर्थभूताः पवित्रभूताः अतस्तीर्थयात्रा कर्तव्यपवित्रत्वेनापेक्षितमिति भावः तर्हि किमर्थं तीर्थान्यटन्तीत्यत्राह स्वान्तःस्थेन गदाभृता भागवता तीर्थान्यपि तीर्थीकुर्वन्ति इति तीर्थान्यपि तीर्थीकर्तुं तान्यटन्तीति भावः वस्तुतः परिशुद्धान्येव गंगादितीर्थानि तथापि पापिभिः तेषुप रित्यक्तानि पापान्यादाय तान्यपि पवित्रीकुर्वन्ति स्वगतानि तु स्वान्तरात्मतया वस्थितो गदाभृत्तत्पयतितस्तत्र घ प्रवृत्तिमहत्त्वान्न तस्मि न्पापसमावेशप्रसक्तिरिति ... भावः एतदभिप्रायेणोक्तं गदाभ्येत्युक्तं तथाच नवमे किंचाहं न भुवं यास्ये नरा मय्यामृजं त्यघं मजामि तदघं क्वाहं राजंस्तत्र विचिन्त्यतामिति गंगयोक्तो भगीरथः आह साधवो न्यासिनः शान्ता धर्मिष्ठा लोकपावनाः इ

भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो। तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता १० अपि नः सुहृदस्तात बान्धवाः कृष्णदेवताः दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमासते ११ सूत उवाच॥ इत्युक्तो धर्मराजेन सर्वं तत्समवर्णयत् यथा नुभूतं क्रमशो विना यदुकुलक्षयं १२ नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितं नावेदयत्सकरुणो दुःखितान्द्र ष्टुमक्षमः १३ कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखं भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् १४॥

रत्यघं तेऽगसंगात्तेष्वास्ते ह्यघभिद्धरिरिति १० अपीति हे तात कृष्ण एव देवता येषां ते नोऽस्माकं सुहृदो बान्धवाश्च यदवः दृष्टाः अथवा स्व पुर्यां द्वारकायां सुखमासत इति श्रुताः किं ११ इतीत्यं धर्मराजेनोक्तः विदुरो यदुकुलक्षयं विनाऽन्यत्सर्वं यथानुभूतं दृष्टं श्रुतं वा क्रमशः समवर्णयत् १२ यदुकुलक्षयं कुतो नावर्णयदित्यत्राह नन्विति ननु हे शौनक दुर्विषहं सोढुमशक्यं स्वय... च यमेवोपस्थास्यदप्रियं यदुकुलक्षयात्मकं नावेदयत् कुतः यतः स करुणः दयावान् अत एव दुःखितान् दुःखिष्यमाणान्द्रष्टुं ... दृशः असहिष्यमाणः १३ अथ देववदीश्वरवत्सत्कृतो विदुरः ततः कंचित्कालं ज्येष्ठस्य भ्रातुः धृतराष्ट्रस्य श्रेयस्कृत्सर्वेषां धर्म... दीनां प्रीतिमावहन् सुखमवात्सीदुवास श्रेयः कर्तुं प्रीतिमावोढुं चावात्सीदित्यर्थः भ्रातुः श्रेयस्करणमत्र तस्य मरणज्ञापनपूर्वकं

भा०प्र० ६२

एवमित्यमनुजेन विदुरेण बोधितस्त्वाजमीढः अजमीढवंशजत्वात्तत्रुनवमेस्फुटं प्रज्ञैव चक्षुर्यस्य अंधस्य भावः यद्वा धैर्येपि प्रज्ञया
चक्षुःस्थानीयया सर्वसाक्षात्कुर्वाणः राजा धृतराष्ट्रः भ्रात्रा विदुरेण संदर्शितः अध्वा गंतव्यदेशो ध्वायस्य सः अनेन दिदृक्षपि नैवा
ह निरगादिति सूच्यते द्रढिम्नः नितरां दृढान् दृढमूलान्स्वेषु देहतदनुबंध्यादिषु स्नेहाः अनुरागास्त एव पाशाः पाशावं द्रढेतु ता
छित्वा निश्चक्राम गृहादिति शेषः २८ पतिमिति सुबलस्य पुत्री गांधारी न्यस्तो [illegible] दंडो भूतद्रोहो यैस्तेषां सर्वसंन्यासिनां मुदां योगिनां हु
र्षकरं हिमालयं प्रति यातं गच्छंतं पतिमनुजगाम युक्तं चैतदित्याह पिभूयेण नं विशिनष्टि पतिव्रता साध्वीचेति मनस्विनामिवेति
सच्छराणां निर्गमः इव यथा प्रहारः स निर्गमः मनस्विनां विवेकिनां सत्प्रहारदव स्थितः मनस्विना मुद्बोधक इवावर्तते [illegible] २९ [illegible]

सूत उवाच ॥ एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधितो आजमीढः छित्वा स्वेषु स्नेहपाशान्द्रढिम्नो निश्चक्राम भ्रातृसं
दर्शिताध्वा २८ पतिं प्रयांतं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी हिमालयं न्यस्तदंडप्रहर्षं मनस्विनामिव सत्प्र
हारः २९ अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोभूमिरुक्मैः गृहं प्रविष्टो गुरुवंदनाय न चापश्यत्पितरौ सौबलीं
च ३० तत्र संजयमासीनं पप्रच्छोद्विग्नमानसः ३१ युधिष्ठिर० गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः अंबा च हतपुत्रार्ता

तथाहं हि तातस्य स्मारयन्तीयाद योयन्तर्थं भूतः अनेन राज्ञा विवध धृतराष्ट्रो निरगादिति सूचितं ति हुताग्निः सत्कृतविप्रः तान्नत्वा
नत्वा मैत्रं येन सः अत एव गुर्वोर्गांधारीधृतराष्ट्रयोर्वंदनाय तत्र योगे गृहं प्रविष्टः पितरौ धृतराष्ट्रविदुरौ सौबलीं गांधारीं च नापश्यन्नदद
ति शं पितराविति द्विवचनेन विदुरोपि विवक्षितः सौबल्याः पृथगुपादानात् ३० ततस्तत्र धृतराष्ट्रगृहे आसीनमुपविष्टं संजयं [illegible]
दुःस्य गीतोपदेशारं अजातशत्रुः पप्रच्छ कथंभूतः उद्विग्नभीतमानसं यस्य तथाभूतः ३१ प्रश्नमेवाह गावल्गणे इत्यादि सार्द्ध
भिः हे गावल्गणे संजय नोस्माकं तातः पितामहोयोनेत्राभ्यां हीनः वृद्धश्च क्व गतः [illegible] हतपुत्रार्ता पुत्रवधेन दुःखिता अंबा मा राम
ता गांधारी च क्व गता तथा पितृव्यः पितुर्भ्राता सुहृच्च विदुरः क्व गतः अपीत्यपि शब्दः [illegible] प्रश्नयोतको वा ६२

।जीविताशां त्याजयितुं विस्मयमान आह अहो इति जंतोर्जीविताशा महीयसी बलीयसी यया जीविताशया भवान् भीमेनापवर्जितं परिभूय दत्तं पिंडं कवलमादत्ते स्वीकरोति। अत्तीति मा भवतु गृहपालः श्वा तद्वत् २२ पिंडं स्वभीमाय वर्जितं स्वस्थानतः भीमादीनां शत्रुत्वं प्रख्यापयं स्तदपवर्जितं पिंडे न प्राणधारणमत्यंतहीनमित्याह अग्निरिति येषां भवतो गृहदाहादिभिः प्रत्येकं नन्वः येषामग्निर्निसृष्टः लाक्षागृहे क्षितिरिति शेषः येषां गरविषं दत्तं येषां च दाराः द्रौपदी दूषिता कचग्रहणवस्त्रापहरणादिभिर्दूषिताः येषां च धनं क्षेत्रं राज्यं चापहृतं स वैत्वयेति वो ध्यं तत्र तत्सत्वे रितिकर्तृपदं वोध्यं तद्दत्तैस्तदपवर्जितैः पिंडदानायतत्वात्तद्दत्तैरित्युक्तं असुभिः प्राणैः कियत्र किंचित्रिहीनमिदं जीवनमित्यर्थः २३ किंचियेयं प्रारब्धमनुभूयमेवेत्यत्र जीविताशां त्याजयितुमेव विशिष्टत्राह तस्येति तस्य तद्दत्तासोः कृपया जीवितुमिच्छोरप्यनिच्छतः देहत्यागमनीच्छतोपि तव देहः इति शेषः जीर्णो वाससी इव जरया देहः परैत्यपगमिष्यत्येव २४ तदि

अहो महीयसी जंतोर्जीविताशा यया भवान् भीमेनापवर्जितं पिंडमादत्ते गृहपालवत् २२ अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् २३ तस्यापि तव देहोयं कृपणस्य जिजीविषोः परैत्यनिच्छतो जीर्णो
ज १३ जरया वाससी इव २४ गतस्वार्थमिमं देहं विरक्तो मुक्तबंधनः अविज्ञातगतिर्जह्यात्स वै धीर उदाहृतः २५ यः स्वकात्परतो
वेह जातनिर्वेद आत्मवान् हृदि कृत्वा हरिं गेहात्प्रव्रजेत्स नरोत्तमः २६ अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् इतोर्वाक्प्रायशः

तिसन्निधावत्रैव परैत्वित्यत्राह गतेति गतः स्वार्थः स्वार्थे द्वितिपुरुषार्थो यस्मात्तं इमं देहं योजह्यात्त्यजेत् कथंभूतः विरक्तः देहादिषु स्पृहारहितः मुक्तानि बंधनानि संसृतिबंधकानि पुत्रकलत्रादीनि येन अविज्ञाता ज्ञातिभिरज्ञाता गतिर्देहत्यागलोकांतरप्राप्तिरूपा यस्य स एव धीरः योगी उदाहृतः २५ किंच स्वकात्परतः अन्यस्मादुपदेशाद्वा इह जातो निर्वेदो वैराग्यं यस्य सः यः पुमानात्मवाजितेंद्रियः हरिमाश्रितानां संसृतिबंधहरं भगवंतं हृदि कृत्वा विधाय ध्यानेन संनिधाय गेहात्प्रव्रजेत्स एव नरेषूत्तमः त्वमेवं कुर्वितिभावः २६ तदेवाह अथ इति अथोऽनंतरं स्वैरं ज्ञातिभिरज्ञाता गतिर्यस्य स भवानुदीचीं दिशं यातु तत्र हेतुमाह इतोर्वागिति अतः परं कालः प्रायशः पुंसां गुणानां गुणान् अर्को धार्यादीन् विकर्षत्यपनुदतीति तथाभूतः नंद्यादिनां इतोनंतरं कु धरः निरूष्टः कः कालः इति यावत् अर्वाक्त्वमेवाह गुणविकर्षणः उत्कार्षः २७ ।। ।। ।। ।।

हे भार्गव इत्थं धर्मपुत्रेण युधिष्ठिरेण पृष्टः सर्वज्ञो भगवान्मुनिश्रेष्ठो नारदः तमाबभाषे ४२ भाषणमेवाह मेतिविशामायस्य हे पृथिवीश
त्वं बुद्धिमानसि तस्मात्तव विवक्तुस्तावत्तस्तु र्वेव कर्मानुगुणसुखदुःखादिफलप्रदानप्रवर्तेश्वराय तत्राह स्मरस्य जगत स्तदं लालस्ये
भा०पु० कर्मीय तदेह तदनुवं धारि संस्कृतविशेषमात्रनिमित्तं शोकं माकार्षीर्निवैराग्योत्पादनाया हचतुर्भिः हे राजन् कं दन देहं तद नुबंधिनं
६८ वा कंचिदपि माश्रुचः शोकं माकार्षीः कुतः यतस्मादिदं जगदीश्वरवशं कर्मानुगुणफलदानप्रवर्तेश्वराय तत्र नियाम्यमित्यर्थः ॥
कोसावीश्वर इत्यत्राह सपाला इन्द्रादिलोकपालैः सहिताः लोका विरंचिप्रभृत्यकिंचनपर्यन्ता इमे जना यस्येशितुर्बलिं
वहंति किं कराभवंतीत्यर्थः ४२ बलिवहनमेव सदृष्टांतमुपपादयति यथेति नतीति रज्जुर्नाम हतीरज्जुः स इवः दृः
भा२ वतामानिय द्वानती नामसारज्जु स्तत्संबद्धा आकर्षणपाशादामानि यथा गावः चतुष्पादः नसि रंध्रीकेतायं कामं प्रो
ताः संयुक्ता वः संतः स्वस्यामुपदामभिर्बद्धाः द्विपदेः किं कुर्वंति तथा वाकंत्सावेदाख्यस्तंत्यां नामभिर्वर्णाश्रम यालयात्म
सूत उवाच इत्थं पृष्टः स सर्वज्ञो धर्मपुत्रेण भार्गव तमाबभाषे भगवान्नारदो मुनिसत्तमः ४१ नारद उवाच मा कंचन शुचो रा
जन्यदीश्वरवशं जगत् लोकाः सपाला यस्येमे वहंति बलिमीशितुः स संयुनक्ति भूतानि स एव वियुनक्ति च ४२ यथा गावो
नसि प्रोतास्तंत्यां बद्धाश्च दामभिः वाक्तंत्यां नामभिर्बद्धा वहंति बलिमीशितुः ४३ यथा क्रीडोपस्कराणां संयोगविगमाविह॥
इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणां ४४ यन्मन्यसे ध्रुवं लोकमध्रुवं वा न चोभयं सर्वथा न हि शोच्यास्ते स्नेहादन्यत्र मोहजात्
कनामभिः पदाभस्थानीयैर्बद्धाः सपाला लोका ईशितुरीशस्य बलिं वहंति ४३ किं देहं तदनुबंधादीन् नित्यान्मत्वा शोचसि किं वानित्यान्
नथवोभयथा न त्वनित्यान्मत्वा शोकविषयाइति विकल्प्य तावद्देहादि तेषां विश्लेषे कोक्रीडार्थं तेन गमाचारे भवनेश्वर स इच्छया तत्तत्कर्मानुगुण्येन
नसंयच्छति इति सदृष्टान्तमाह यथेति लोके कस्यचित्क्रीडितुः पुंस इच्छया क्रीडोपस्कराणां क्रीडासाधनानां संयोगवियोगावमप्यानभव
तः यथा क्रीडोपस्कराः क्रीडितुरिच्छया कदाचित्संश्लिष्टाः पुनस्तदिच्छयैव विश्लिष्टाश्च भवंति ईश्वरेच्छया नृणामपि संयोगवियोगौ॥
पत्र४ स्यातां ४४ उक्तं यमनुवादपूर्वकं प्रतिक्षिपति यदि लोकं ध्रुवं स्थिरं मन्यसे यद्वा ध्रुवमथवोभयं तत्र तावत्तीयः कल्पः
संभवादेव निरस्तः इत्यभिप्रायेणाह नचोभयमिति नहि आत्मकं वस्तु दृष्टं श्रुतं वेत्यर्थः ध्रुवत्वाध्रुवत्वयोरेकत्र
मावेशो संभव निरस्त इति भावः तदन्यपक्षद्वयेपि न स्नेहात्तत्र इत्याह यत सर्वथेति ... नित्यत्वे देहादयः तत्र मेवेति।
नशोच्याः तत्रादेवेति न शोच्याः नहि वस्तुनो धारवदात्मभावि धर्मः केनाप्यपनेतुं शक्य इति भावः एवं सति तत्र कहेतुः केवलं दे
पुस्तक

हतामयाहताः बंधवः पुत्राश्च यस्य सोऽत एव दुःखितो भार्यया सह अकृतप्रज्ञे विवेकहीने मयि रोषं शमलमपराधमितियावत् आशंसमानः
चिंतयन्गंगायामपतत् पतितवान्स्यात् पतितवान्किमिति वार्थः ३२ वात्सल्यमुक्त्वा तस्यापरस्येव [illegible] देशोपकारत्वेन चिंतय ८२
न्नाह पितीति पितरीति पितरि पांडावुपरते सति सर्वान्नोऽस्मान्सुहृदः पुत्रान् शिशून् व्यसनतः आपद्भ्यः [illegible] तावपि तु मातरौ
धृतराष्ट्रविदुराविति क्व गतौ [illegible] विदुराभिप्रायो या [illegible] व्यसनतोऽरक्षतामित्युक्ते ३४ एवमुक्तः सूतः संजयः आत्मनः स्वस्य
स्वरं प्रभुं धृतराष्ट्रमचक्षाणः अपश्यमानः अत एवातीवपीडितो दुःखितः तद्विरहेण कर्षितः [illegible] वैक्लव्यीभूतः सन् कृपया स्ने-
हवैक्लव्यात् धार्ष्ट्यात् नाब्रवीत् प्रत्याह प्रत्युत्तरं वक्तुं न प्रबभूव समर्थः ३५ ततः शनैः पाणिभ्यामश्रूणि विमृज्यात्मना विवेकात्मिक-
याधियात्मानं संकल्पविकल्पात्मकं मनो विष्टभ्य प्रतिबध्य स्थिरीकृत्य प्रभोर्धृतराष्ट्रस्य पादावनुस्मरन्नजातशत्रुं प्रत्यूचे ३६

अपि मय्यकृतप्रज्ञे हतबंधुः स भार्यया आशंसमानः शमलं गंगायां दुःखितोऽपतत् ३३ पितर्युपरते पांडौ सर्वान्नः सुहृदः शि-
शून् अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ३४ सूत उवाच कृपया स्नेहवैक्लव्यात्सूतो विरहकर्षितः आत्मेश्वरमचक्षा-
णो न प्रत्याहातिपीडितः ३५ विमृज्याश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन् ३६
संजय उवाच नाहं वेद व्यवसितं पित्रोर्वः कुलनंदन गांधार्या वा महाबाहो मुषितोऽस्मि महात्मभिः ३७ सूत उ० अथाजगा-
म भगवान्नारदः सहतुंबुरुः प्रत्युत्थायाभिवाद्याह सानुजोऽभ्यर्चयन्मुनिं ३८ युधिष्ठिर उ० नाहं वेद गतिं पित्रोर्भगवान्क्व
गतावितः अंबा वा हतपुत्रार्ता क्व गता च तपस्विनी ३९ दिष्ट्या नो भगवान्नष्टानां व्यसनार्णवे कर्णधार [illegible] रेणग

उक्तिमेवाह नेति हे कुरुनंदन वः युष्माकं पित्रोर्विदुरधृतराष्ट्रयोः गांधार्या वा व्यवसितं निश्चितं नाहं वेद्मि हे महाबाहो [illegible] वाहं महात्म-
भिः तैर्मुषितोऽस्मि वंचितोऽस्मि ३७ अथ तत्र स्थितेषु सर्वेषु तुंबुरुणा सहितो भगवान्नारदः तत्राजगाम तमवलोक्य सानुजो युधिष्ठि-
रः प्रत्युत्थायाभिवाद्याभ्यर्चयन्नेवाह ३८ उक्तिमेवाह नाहमिति हे भगवन् पित्रोर्गतिं नाहं वेद्मि न जाने तावितः क्व गतौ [illegible]
हतपुत्रा अंबा तपस्विनी पतिव्रता वा क्व गता ३९ दिष्ट्या अस्मान् दर्शनं कर्तुमयं व्यसनार्णवे विपत्ति [illegible] दुःखार्णवमग्-
नानामस्माकं कर्णधार इव [illegible] नोऽस्माभिर्भगवांस्त्वं दृष्टः [illegible] दर्शनेन व्यसनमपगतमेवानंतरं [illegible] विपत्तीर्निभावः कर्णधारः [illegible]
रे दुःखायतीरे समुद्रे नावि यथा कर्णधारस्तथा त्वं पितरौ [illegible] ब्रूहि तत्र हेतुमाह [illegible] पारदर्शनः सर्वस्या-
प्यवधिदर्शनः सर्वज्ञ इतियावत् ४० ॥

नकेवलं त्वमितरः स्वार्थमेव निर्गता स्मः पितुर्युष्मासिर्धुनिर्गतम इति भवतां प्रदर्शनार्थमपीत्यभिप्रायेणाह सोयमिति द्वाभ्यां हेम
हाराज सः निखिल जगदंतरात्मा वशीकृत लोकत्रयः कालशरीरकोयं भगवान् श्रीकृष्णः भूतानि स्वाश्रितानुवर्तीनि भावयत्यभ्युद
भा०प्र० ६६ ययुक्तानि करोतीति तथा हेतुर्गर्भितं साधु परित्राणं तत्वादिति भावः सुरद्विषां दुष्कृतामभावाय नाशाय कालरूपोमत्युरूपोऽस्यां
भुव्यवतीर्णः ५० तेनच देवकृत्यं देवार्थकर्मकंसजरासंधादिवधरूपं निष्पादितं अवशेषं प्रयोजनं तद्यदुकुलनाशरूपं प्रतीक्षते अधुनापि यं भगवान् वंशोद्भवस्य कु
लविनाशात्मकमिति गूढाभिसंधिः प्रतीक्षते अतो यावदिह भूलोके भगवानीश्वरः कृष्णो भवेद्वर्तेत तावदेव यूयं मय्यवेक्षध्वं ततः
पितृवन्निर्गच्छतेति भावः ५१ ब्रूहि त्वमपि प्रकृतप्रश्नस्योत्तरमाह धृतराष्ट्र इति द्वाभ्यां स्वभार्यया गांधार्या भ्रात्रा विदुरेण च सह धृ
तराष्ट्रो हिमवतो दक्षिणेन ऋषीणामाश्रमं गतः हिमवतो दक्षिणपार्श्वानंतरवर्तिनमाश्रमं गत इत्यर्थः एनवस्तत्तरस्यापदूरेपंजर्मी

सोयमद्य महाराज भगवान्भूतभावनः कालरूपोवतीर्णोस्यामभावाय सुरद्विषां ५० निष्पादितं देवकृत्यमवशेषं प्रतीक्षते॥ ता
वद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः ५१ धृतराष्ट्रः सह भ्रात्रा गांधार्या च भार्यया दक्षिणेन हिमवत ऋषीणामाश्रमं गतः ५२
स्रोतोभिः सप्तभिर्या वै स्वर्धुनी सप्तधा व्यधात् सप्तानां प्रीतये नाना सप्तस्रोतः प्रचक्षते ५३ स्नात्वानुसवनं तस्मिन् हुत्वा चाग्नीन्य
थाविधि अब्भक्ष उपशांतात्मा स आस्ते विगतैषणः ५४ जितासनो जितश्वासः प्रत्याहृतषडिंद्रियः हरिभावनया ध्वस्तरजःसत्त्व

इत्यवधिमतः सामीप्येनन्यथा प्रत्यये भुवत्तमिदं दक्षिणेनेत्यस्यं ५२ कोसावाश्रम इत्यत्राह स्रोतोभिरिति यं सप्तस्रोत इति प्रवद
तेतं आश्रमं गत इत्यन्वयः तत्र तन्नाम्नः प्रवृत्तिनिमित्तमाह यावैप्रसिद्धा स्वर्धुनी स्वर्गनदी गंगा सप्तानामृषीणां प्रीतये नाना स्र
प्तभिः स्रोतोभिः प्रवाहैर्नानाविधा तद्देवाह सप्तधा व्यधात्सुविभक्ताव भूवात स्तद्देशं सप्तस्रोत इत्याचक्षते यमेवमाचक्षते गत इत्यन्वये
५३ तत्र किं करिष्यति कथं वा वर्तिष्यतीत्यत्राह स्नात्वानुसवनं त्रिसंध्यं स्नात्वा अग्नीन्यथाविधि हुत्वा चाब्भक्षः अप एव भक्षयन्
तः रागाद्यकलुषितस्वात्मा मनो यस्य विगताईषणाः धनैषणा पुत्रैषणा यस्य तथाभूतः आस्ते आसिष्यते ५४ जितमास
मितानि षडिंद्रियाणि येन हरिभावनया भगवद्रूपानुसंधानेन ध्वस्तानि निरस्तानि रजः आदिगुणास्तत्कार्याणि मुक्तिप्रतिबंधका
निपुण्यपापरूपाणि मलानि यस्य तथाभूतः ५५॥

लोकैषणा॥

तस्माद्धे राजन्नज्ञानकृतं देहात्माभिमानकृतमात्मनः स्वस्य मनसो वैक्लव्यं दैन्यं जह्यंग त्यज अनाथाः कृपणाः ते च मां विना कथं वर्तेरन् इति स्वप्नेऽपि जातदोषाः ते पृथक्त्वं तत्र तावद्देहधर्म सर्वं स्वयमेवाधिष्ठ
स्यातिवर्तिकं कथं इति सार्द्धद्वयेन तत्र कथमिति अर्द्धेन प्रश्नो विशेषः ततः श्लोकद्वयेन ... नामिति विवेकः मां विना नाथाद्दि
तहीनाः अत एव दीना स्ते कथं वर्तजीवेरन् इति शंकोत्रा आहुर्तेषः कथं जीवेरन्निति तिष्ठ स्वसि ... सर्थः ४६ तावन्ततु स्ययोगाद्देमस्व
स्मिं स्तद्रक्षक त्वाभिमानं त्यजे त्याभिप्रायेणाह कालेति कर्माद्दृष्टं गुणाः सत्वादयः पृथिव्यादि पंचभूतात्मकोयं देहः कालादाधीनः
यस्मिन्नेव त्वदेहो ह्येवंविधः एवमेतिसन्धितं स्यमेवं विधे देहः कथमन्यान् गोपायेद्रक्षेद्देवमर्थः यथा स्वयं सर्पग्रस्तोऽन्यो
स्तद्रक्षणे गोपायतीत्यर्थः ४७ अस्तैव मयापि जीविकावर्तिनो हि स्थितानामस्माकं जीवनं सुशकं कथमितोगतानां तेषां जी
वनं स्यादित्यत आह अहस्तानीति अहस्तानि भूतानि सहस्तानां तेषां जीवनं यथा लामं यथा योग्यमो षधि फलमूलानि चतु
ष्पदां गवादीनि जीवनमित्यर्थः तथाह स्तरहितानामपि चतुष्पदामपदामविद्यमानपादानि ... जीवनं तत्राप्यपदे ... पि
महतामजगरादीनां भूतानां फल्गूनि तुच्छानि भूतानि जीवनं किं बहुना जीवस्य भूतस्य जीवः जीवनं जीवनशरणं भवत्

तस्माज्जह्यंग वैक्लव्यमज्ञानकृतमात्मनः कथं त्वनाथाः कृपणा वर्तेरंस्ते च मां विना ४६ कालकर्मगुणाधीनो देहोयं पां
चभौतिकः कथमन्यांस्तु गोपायेत्सर्पग्रस्तो यथा परं ४७ अहस्तानि सहस्तानामपदानि चतुष्पदां फल्गूनि तत्र ... जी
वो जीवस्य जीवनं ४८ तदिदं भगवान्राजन्नेक आत्मात्मनां स्वदृक् अन्तरोऽनन्तरो भाति पश्य तं मायायोरुधा ... श्री॥

परः ४८ सर्वत्रैवनेगाह तेवा भगवानेवं शक्तिर्नित्यमित्यभिप्रायेणाह तदुपपन्नं तथा भगवन्तः सर्वात्मनः स्वजगत्स्तदात्मकत्वात् ... स्वसंज्ञाः
तदिति हे राजन्न तदीश्वरवशत्वेनोक्तमिदं यद्विश्वमात्मनिर्विदितं आत्मकं जगत् ... एक एव मरवं घटदृतिवत्स्वरूपाभेदः शंकानां
रयितुं विशिनष्टि आत्मनां देवमनुष्यादिदेहभृतां जीवानामात्मा अतः प्रविश्य प्रशासकं धारकत्वाभ्याम वस्थितः आत्मा ... ह्येत
देवहि प्रवृत्तिनिमित्तं यदंतः प्रविश्य प्रशासन धारकत्वाभ्याम वस्थानं अनेन शरीरात्माभावनिबंधनं जगदूपेणोऽन्यत्वमित्युक्त
भवति शरीरात्मभावनिबंधनं स्थानमन्यत्व मपरहेषाहृष्टत्वरः आत्मा देहोऽजातः मनुष्योजातः इति व्याप्यवत् सुगमदोऽसंस्पर्श शंको
निराकुर्वन्विशिनष्टि स्वदृक् ... स्वतया तु स्थितोपि स्वात्मयाथात्म्यदर्शी अन्तेनात्मदोषसंस्पर्शः इतिभावः तथाच श्रूयते अन
श्नन्नन्यो अभिचाकशीतीति न केवलमंतरात्मैवापि तु तत्र शक्यं तस्य आभाति बहिरप्यभाति न चैकस्य कथं देवमनुष्यादिरूपेणाव
स्थानमित्यत्राह पश्यतं मायया ... तयाजीवसस्ट ... यातं भगवंतं

तीत्य मुक्त्वा सह तुंबरुणा गंधर्वेण नारदः स्वर्गमारोहत् स्वर्गं प्रत्यूर्ध्वं जगामेत्यर्थः युधिष्ठिरस्तु तस्य नारदस्य वचः हृदि कृत्वा निधाय पशुचः शोकान् जहात् ३
तदा सहोटजे पर्णशालायां सहिते भर्तुर्देहे ग्निभिर्दह्यमाने सति तस्य पत्नी साध्वी पतिव्रता गांधारी बहिः स्थिता तमग्निमनुवेक्ष्यत्यनुप्र
वेक्ष्यति ६० हे कुरुनंदन तत तदा तदाश्चर्यं निशाम्य दृष्ट्वा विदुरः हर्षशोकाभ्यां भ्रातुर्मुक्तिं विलोक्य बाधाभ्यां युक्तः तस्मात्तीर्थानि सेव
भा०प्र० १० कः सेवितुमिष्टस्वर्गं तां गमिष्यति ६१ इत्याज ६२ प्रथमे त्रयोदशः १३ संस्थित इति बंधूनां यदूनां दिदृक्षया ... कृष्ण
पुण्ययशसः श्रीकृष्णस्य विचेष्टितं ज्ञातुं च गमितावर्जुने द्वारकायां संप्रस्थिते प्रस्थानपूर्वकं द्वारकायां प्रविष्टे सति ... कामी

दह्यमानेग्निभिर्देहे पत्युः पत्नी सहोटजे बहिः स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति ६० विदुरस्तु तदाश्चर्यं निशाम्य कु
रुनंदन हर्षशोकयुतस्तस्माद् गंता तीर्थनिषेवकः ६१ सूत उवाच इत्युक्त्वाथारुहत्स्वर्गं नारदः सहतुंबरुः युधिष्ठिरो
वचस्तस्य हृदि कृत्वाजहाच्छुचः ६२ इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे धृतराष्ट्रनिर्गमो नाम त्रयोदशोध्यायः
१३ सूत उवाच संप्रस्थिते द्वारकायां जिष्णौ बंधुदिदृक्षया ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं १ व्यतीताः
कतिचिन्मासास्तदा नायात्ततोऽर्जुनः ददर्श घोररूपाणि निमित्तानि कुरूद्वहः २ कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मि
णः पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनां ३ जिह्मप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदं पितृमातृसुहृद्भ्रातृदं
पतीनां च कल्कनं ४ कन्याविक्रयकं तातं सुतं पित्रोरपोषकं ब्राह्मणान्वेदविमुखान् शूद्रान्ब्रह्मवादिनः ५

बंधूनां दिदृक्षयेति वान्वयः १ कतिचिन्मासा व्यतिक्रांता बभूवुः तथापि ततो द्वारकातोऽर्जुनो नागच्छत् तदा कुरूद्वहो यु
धिष्ठिरः घोररूपाणि निमित्तान्यरिष्टानि ददर्श २ विपरीता ऋतूनां वसंतादीनां धर्मा यस्य तस्य रौद्रां घोरां गतिं च ...
पां नानां पूर्वेणां दृष्ट्वा उत्तरेणान्वयः क्रोधादिप्रवण आत्मा मनो येषां नृणां पापीयसीं वार्तां जीवनार्थप्रवृत्तिं ३ जिह्म...
कौटिल्यप्रचुरं व्यवहृतं व्यवहारं शाठ्यमिश्रं मौर्ख्ययुक्तं सौहृदं च पित्रादीनां परस्परं कल्कनं रागादिदोषं च ४ कन्या दश
विक्रीणतीति तथा तातं पितरं पित्रोर्मातापित्रोरपोषकं सुतं च वेदेभ्यो विमुखान् ब्राह्मणान् ब्रह्म वेदं वदंति वेदपाठकान् शूद्रांश्च ५ १०

विज्ञानात्मनि विज्ञानस्वरूपे देवग्रहे ध[illegible]त्मन्येमसंयोज्य पूर्वमस्तुतानीन्द्रियाणीत्यर्थात्सिद्धं इंद्रियाणां संयोजकैर्द्रियैरनाकृष्टचित्तः
इत्यर्थः तमात्मानं देवग्रहमाधारे धारके ब्रह्मणि विलाप्य विलीनं जीवरूपोपाधिवि[illegible]नेन ब्रह्मसमानाकारतयाऽनुसंधायेति यावत्
तत्र दृष्टांतमाह घटांबरमिवांबर इति महाकाशे घटाकाशमिव ब्रह्मण्यात्मानं प्रविलाप्य [illegible]गुरिवास्त इत्युत्तरेणान्वयः अंबरदृष्टां
तेन जीवब्रह्मणोः स्वरूपैक्यमनुसंधायेति न भ्रमितव्यं घटाद्युपाध्युपगमेन घटाकाशस्य महाकाशसंश्लेषेपि स्वरूपभेदसद्भावा
त् पंचीकरणस्मरणस्मरणादाकाशेप्यंशभेदस्य वेदांतिभिरवश्यांगीकार्यत्वात् यथाकाशेंऽशभेदो नाभ्युपगम्यते तदा कृत्स्नस्या
प्याकाशस्य घटाद्युपहितत्वप्रसंगः न चेष्टापत्तिः घटाकाशयोर्व्याप्यव्यापकभाववैपरीत्यापातात् किं त्वेकदेशेनाकाशस्य घटो[illegible]
मत्वे हि तस्य परिच्छिन्नस्याकाशस्य व्याप्यत्वं सुस्पष्टं अतः संश्लेषदशायामपि घटाकाशमहाकाशयोः प्रदेशभेदोऽस्त्येव उपा[illegible]
रामेण समानाकारत्वमात्राभिप्रायक एवायं दृष्टांत इत्यवगंतव्यं ५६ ध्वस्तमायागुणानां सत्त्वादीनां उदर्कः रागद्वेषादिकार्यं यस्य

विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तं ब्रह्मण्यात्मानमाधारे घटांबरमिवांबरे ५६ ध्वस्तमायागुणोदर्को निरुद्धकरणाशयः
निवर्तिताखिलाहार आस्ते स्थाणुरिवाधुना ५७ तस्यांतरायो मैवाभूः संन्यस्ताखिलकर्मणः स वा अद्यतनाद्राजन्परतः पंच
मेऽहनि कलेवरं हास्यति स्वं तच्च भस्मीभविष्यति ५८

स निरुद्धानि करणानीन्द्रियाणि आशयो वासना अंतःकरणं वा येन निवर्तिताखि

आ॰१३।१ लाश्च ब्रह्मणोदयोपि येन तथाभूतः स्थाणुरिवाचलो निश्चल आस्ते आसिष्यते अत्र स्वात्मनश्चेन्द्रियादित्यनेनेन्द्रियाणां विषयेभ्यः आक
र्षणमात्रमुक्तं निरुद्धकरणाशय इत्यनेन तु पुनर्विषयेषु प्रवृत्तिप्रतिबंध उक्तः अतो न पौनरुक्त्यं तथा ध्वस्तरजस्तमोमलत्वम
नेन पुण्यपापाद्यभाव उक्तः ध्वस्तमायागुणोदर्क इत्यनेन तु पापपुण्यमूलकरागद्वेषाद्यभाव उक्तः तथा तावत्पर्यंतं निव
पु॰२ र्तिताखिलाहार इति ५७ कथं चित्तमाना विचामीति शिष्टिरामि शायसान्तद्याह तस्येति संन्यस्ताखिलानि दे[illegible] धारणा
र्थानि चिकर्माणि येन तस्य ध्यतरायो विघ्नभूतस्त्वं [illegible]माभूः न भव हे राजन्स धृतराष्ट्रः अद्यतनाद्वर्तमानदिनादार
भ्य परतः पंचमेऽहनि स्वं कलेवरं हास्यति वै नूनं त्यक्ष्यति तच्च कलेवरं योगाग्निनैव भस्मीभविष्यतीति ५८ ॥ श्रीरामचंद्राय नमः

भा०प्र० ७१ अयमुलूको मत्यो दूतः तद्वदनिष्टकरः स च प्रत्युलूकश्च तदभिमुखं मनः अत उलूकस्तावेतौ अनिद्रौ निद्रारहितौ कुह्वानैः कूकू इत्येवंविधैः
ह्वानैः शब्दैः छिन्नितं छद्मवदानुकारः इमं देशं शून्यमिच्छतः सूचयतः १५ दिशो धूम्राः परिधयश्च कम्पते इति शेषः अद्रिभिः सह भूः पृथ्वी कं
पते स्तनयित्नुभिर्मेघैः कालिके सह महान् निर्घातोऽशनिनिर्घातश्चासीत् १६ खरः कठिनः स्पर्शो यस्य स वायुर्धूलिना तमः विसृजन्,
विशेषेण सृजन् वाति जलदा मेघाः सर्वतो बीभत्समिवासृग् रुधिरं वमन्ति मुञ्चन्ति ७ हतप्रभायस्य तथाभूतं सूर्यं पश्य दिवि ग्रहाणां भङ्गं
अङ्गारादीनां परस्परं विमर्दं कलहं पश्य सुनितरां संकुलैर्भूतानां पिशाचानां गणैः रोदसी सकलं द्यावापृथिव्यौ व ज्वलिते इव दृश्ये
ते १८ नदाः शोणाद्याः सरांसि भूतानां मनांसि च क्षुभिताः संचलिता भवन्ति शुष्का भवन्तीति वा अग्निराहवनीयादिराज्येन न ज्वलति

मृत्युदूतः कपोतोऽयमुलूकः कंपयन्मनः प्रत्युलूकश्च कुह्वानैरनिद्रौ शून्यमिच्छतः १५ धूम्रा दिशः परिधयः कंपते भूः सहाद्रि
भिः निर्घातश्च महानासीत् साकं च स्तनयित्नुभिः १६ वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः असृग्वर्षन्ति जलदा बीभत्समिव सर्व
तः ७ सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि ससंकुलैर्भूतगणैर्ज्वलिते इव रोदसी १८ नद्यो नदाश्च क्षुभिताः सरांसि च मनांसि च
न ज्वलत्यग्निराज्येन कालोऽयं किं विधास्यति १९ न पिबन्ति स्तनं वत्सा न दुह्यन्ति च मातरः रुदन्त्यश्रुमुखा गावो न हृष्यन्त्यृषभा व्रजे
२० दैवतानि रुदन्तीव स्विद्यन्ती वोच्चलंति च २१ इमे जनपदा ग्रामाः पुरोद्यानाकराश्रयाः भ्रष्टश्रियो निरानंदाः किमघं दर्शयंति
नः २२ मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा २३ ॥ ॥ ॥श्री॥ ॥ ॥

यं कालः किं दुःखं विधास्यति अहं न वेद्मीति भावः १९ वत्साः स्तनं स्तन्यं न पिबन्ति मातरश्च वत्सान् प्रति न दुह्यन्ति स्तन्यमिति शेषः गावः र
अश्रूणि मुखे यासां ताः रुदन्ति व्रजे गोष्ठे ऋषभा न हृष्यन्ति २० दैवतानि देवप्रतिमा रुदन्तीव स्विद्यन्ति गात्रप्रस्वेदं मुञ्चन्ति उच्चलन्तीव
उत्प्लुत्य पतन्तीव दृश्यन्ते २१ पुरादीनामाश्रया इमे जनपदा देशाः ग्रामाश्च भ्रष्टश्रीः येभ्यः निर्गत आनन्दो येभ्यः तथाभूता दृश्यन्ते नोऽस्मा
कं किमघं दुःखं दर्शयिष्यन्तीति वयं तु न विद्म इति भावः २२ इदं त्वहमुद्भावयामीत्याह मन्य इति एतैर्महोत्पातैरिदं त्वहं मन्ये उद्भावयामि
किमनन्यपुरुषश्रीभिर्न विद्यते अन्यपुरुषेषु श्रीर्येषां तैरन्यपुरुषेष्वसंभावितकान्तिभिर्भगवतः श्रीकृष्णस्य पदैः पादविन्यासैर्ही राम
ना रहिता अत एव गतं सौभगं सौन्दर्यं यस्याः तथाभूता भूः पृथ्वी नूनं भविष्यतीति २३ ॥ ॥ ॥ ॥श्री॥

तथान्यरिष्टानिनिमित्तानिदुःखसूचकानिकालेत्वनुगतेनिमित्तभूतविपरीतकालादृष्टानीत्यर्थः तत्रलोभाद्यधर्मस्वभावंचदृ
ष्ट्वालोभादीत्यादिश्लोकेनक्रोधादिसंग्रहः सयोयुधिष्ठिरः अनुजंभीमंप्रोवाच ६ तमेवाह [illegible] द्वारकायांबं
धवास्तेषांदिदृक्षयाकृष्णस्यविचेष्टितंज्ञातुंचजिष्णुःसंप्रेषितःप्रस्थापितः ७ हेभीमसेनतवसप्तमासाव्यतिक्रांताअधुनापिकस्माद्धे
तोस्तवानुजोर्जुनोनायातिइदमनागमननिमित्तमंजसानवेद्म्यंजसेत्यव्ययंतत्त्वे ८ अपीत्ययंशब्दःसंभावनाद्योतकः देवर्षि
नारदेनादिष्टःसूचितःसकालोधुनोपस्थितोप्युपस्थितःस्यात्किमित्यर्थः कोसौयस्मिन्कालेभगवान्कृष्णआत्मनःस्वस्याक्री
डांगंउत्सिसृक्षत्युत्स्रष्टुमिच्छतिसकालः आक्रीडंक्रीडार्थमनुष्यसंस्थानभागंभूसतत्त्वमयमथवास्वंशरीरमुत्सिसृक्षतिभूमेर्दिवंन
यितुमिच्छतीत्यर्थः ९ भगवंतंविशिनष्टि यस्माद्भगवतोहेतोःनोस्माकंसंपदादयोबभूवुर्यस्यचानुग्रहाल्लोकाभविष्यंतिस

निमित्तान्यत्यरिष्टानिकालेत्वनुगतेनृणां लोभाद्यधर्मप्रकृतिंदृष्ट्वोवाचानुजंनृपः ६ युधिष्ठिरउवाच संप्रेषितोद्वारकायांजि
ष्णुर्बंधुदिदृक्षया ज्ञातुंचपुण्यश्लोकस्यकृष्णस्यचविचेष्टितं ७ गताःसप्ताधुनामासाभीमसेनतवानुजः नायातिकस्यवाहे
तोर्नाहंवेदेदमंजसा ८ अपिदेवर्षिणादिष्टःसकालोयमुपस्थितः यदात्मनोंगमाक्रीडंभगवानुत्सिसृक्षति ९ यस्मा
न्नःसंपदोराज्यंदाराःप्राणाःकुलंप्रजा आसन्सपत्नविजयोलोकाश्चयदनुग्रहात् १० पश्योत्पातान्नरव्याघ्रदिव्यान्भौ
मान्सदैहिकान् दारुणान्शंसतोदूराद्भयंनोबुद्धिमोहनं ११ ऊर्वक्षिबाहवोमह्यंस्फुरंत्यंगपुनःपुनः वेपथुश्चापिहृदयेआ
राद्दास्यंतिविप्रियं १२ शिवैषोद्यंतमादित्यमभिरौत्यनलानना मामंगसारमेयोयमभिरेभत्यभीरुवत् १३ शस्ताःकुर्वंतिमां
सव्यंदक्षिणंपशवोपरे वाहांश्चपुरुषव्याघ्रलक्षयेरुदतोमम १४

नैः भगवानुत्सिसृक्षतीत्यन्वयः संपदःभोग्यभोगोपकरणादिसमृ
द्धयःसपत्नविजयःशत्रुविजयः १० हेनरव्याघ्रदिव्यान्दिविभवान्भौमान्भूमौभवान्देहेचभवान्दारुणान्घोरान्दूरात्समनं
तरमेवनोस्माकंबुद्धिमोहयतीतितथाभूतंभयंशंसतःसूचकानुत्पातान्पश्य ११ तानेवदैहिकानुत्पातान्दर्शयति ऊर्वक्षीति [illegible]
ममवामोर्वादयःपुनःपुनःस्फुरंतिचलंतिहृदयेवेपथुःकंपश्चभवतितेनएतानुपलक्ष्यस्फुरणानि आराद्दास्यंतिसमनंतरकालमेवमह्यमप्रियंदास्यंतिमर्माप्रिय
सूचकाभवंतीत्यर्थः १२ एषाशिवाशृगालीविशेषेणअनललक्षणाननंयस्याःसाआदित्यमभिःआदित्याभिमुखंरौतिअंगहेभीमायंसारमेयः
श्वामामभिमुखमभीरुवद्भीतवद्रोदितिरोदनंकरोति १३ शस्ताःगवादयःपशवोमांसव्यमात्मनावामपार्श्वस्थंकुर्वंतिपरेऽप्रशस्ताःखरा

सात्वतांभक्तानांपतिः सात्वतशब्दोभक्तवाचकः सात्वतशब्दस्तुयादववाचक इतिविवेकः भगवान्बलरामः सुखमास्तेकच्चित् ३०
अथश्रीकृष्णपुत्रान्पृच्छति सर्ववृष्णीनांमहारथः प्रद्युम्नः सुखमास्तेकच्चित् तथाभगवान्गंभीररयोनिरुद्धश्चवर्द्धते ३१ जां
बवतीसुतइतिसाम्बस्यविशेषणं सुषेणादयः अन्येचऋषभादयः कार्ष्णिप्रवराः श्रीकृष्णसुतश्रेष्ठाः सपुत्राअपिसुखमासतइत्यर्थः
परिशिष्टान्वयः ३२ तथैवशौरेर्भगवतोनुचराः श्रुतदेवोद्धवादयः येचान्येसात्वतर्षभाः यादवश्रेष्ठाः सुनंदादयः ३३ कृष्णरामभुजाश्रि
भा०प्र० ७२ वेवाश्रयोयेषांतेसर्वेपिस्वस्त्यासते बद्धसौहृदाः तेसर्वेस्माकमपिकुशलंस्मरंतिकिंइत्यर्थः ३४ अथभगवतःकुशलंपृच्छति
भगवान्कृष्णोपिपुरेसुधर्मायांसुहृद्भिर्वृतःसुखमास्तेकच्चित् ३५ ब्रह्मण्योभक्तवत्सलइतिविशेषणद्वयाभिप्रेतंपृच्छति मंगला
मु१

कच्चिदास्तेसुखंरामोभगवान्सात्वतांपतिः ३० प्रद्युम्नःसर्ववृष्णीनांसुखमास्तेमहारथः गंभीररयोनिरुद्धोवर्द्धतेभगवानुत ३१
सुषेणश्चारुदेष्णश्चसाम्बोजाम्बवतीसुतः अन्येचकार्ष्णिप्रवराःसपुत्राऋषभादयः ३२ तथैवानुचराःशौरेःश्रुतदेवोद्धवादयः
सुनंदनंदशीर्षण्यायेचान्येसात्वतर्षभाः ३३ अपिस्वस्त्यासतेसर्वेरामकृष्णभुजाश्रयाः अपिस्मरंतिकुशलमस्माकंबद्धसौ
हृदाः ३४ भगवानपिगोविंदोब्रह्मण्योभक्तवत्सलः कच्चित्पुरेसुधर्मायांसुखमास्तेसुहृद्वृतः ३५ मंगलायचलोकानांक्षे
मायचभवायच आस्तेयदुकुलांभोधावाद्योनंतसखःपुमान् ३६ यद्बाहुदंडगुप्तायांस्वपुर्यांयदवोर्चिताः क्रीडंतिपरमानंदंम
हापौरुषिकाइव ३७ यत्पादशुश्रूषणमुख्यकर्मणासत्यादयोद्व्यष्टसहस्रयोषितः निर्जित्यसंख्येत्रिदशांस्तदाशिषोहरंतिव
ज्रायुधवल्लभोचिताः

लदेवस्यसखोमो सखाप्रस्य ९ येति लोकानांमंगलानांमंगलार्थंमंगलसंपत्त्यै आद्यःपुमान्परमपुरुषः यदुकुलांभोधावास्तेकच्चित् अनंतसखइत्यनेनबलरामसहि
तत्त्वास्तेकिमितिप्रश्नोभवति क्षेमोलब्धसुखस्यपरिपालनं भवोयोगः सचालब्धसुखलाभरूपः तदुभयविधायमंगलायेत्यर्थः ३६ तदे
वप्रपंचयति यद्बाहुरितित्रिभिः यस्यकृष्णस्यभगवतोबाहुदंडगुप्तायांस्वपुर्यांद्वारकायामर्चिताः सर्वैर्लोकैर्बहुमताः यदवःपरमानंदं
यथातथाक्रीडंति महापौरुषिकाइवयत्ताइव ३७ यस्यभगवतःपादयोःशुश्रूषणंपरिचरणंमुख्यंकर्मतेनहेतुनासत्यभामादयः ७२ म ४
षोडशसहस्रयोषितः संख्येयुद्धेत्रिदशान्देवान्निर्जित्ययाः वज्रमायुधंयस्यसइंद्रोवल्लभःप्रियोयासांतासांशच्यादीनामुचिताः
आशिषःअभीष्टार्थाःपारिजातादयःभगवताआहृताइतिशेषः तदित्यर्थंसामान्याभिप्रायेणनपुंसकत्वंवा आशिषःहरंतिस्वीकुर्वंतिइ

इत्थं दृष्टानि चिह्नानि अरिष्टानि येन तेन चेतसा राज्ञो युधिष्ठिरस्य चिंतयतः सतः हे ब्रह्मन् कपिध्वजोऽर्जुनः यदुपुर्या द्वारकायाः प्रत्यागमत् आ
गतवान् २३ तमागतं पादयोर्निपतितमनुजमर्जुनं नृपो युधिष्ठिरः विलोक्योद्विग्नं भीतं हृदयं यस्य तथाभूतो नारदोक्तं संस्मरन् सुहृदां
मध्ये पृच्छति स्म पृच्छन् कथंभूतं यथापूर्वं वदनवस्थितमातुरं दुःखितमधोवदनमश्रूणि अम्बुरूपेण नयनाब्जयोरश्रुबिंदून् सृजंतं मुंचंतं वि
च्छायं विगतकांतिं २४ २५ प्रश्नमेवाह कच्चिदित्यादिना यावदध्यायसमाप्ति कच्चिदिति इष्टप्रश्नद्योतकमव्ययं तावत्सामान्यतः सर्वा
८५ निष्टान्बंधून्पृच्छति कच्चिदिति मधुभोजादयो यादवांतरविशेषाः तद्वंशनवमेस्फुटं नोऽस्माकं स्वजना बंधवः आनर्तपुर्यां द्वारकायां सु
खं यथा तथा आसते कच्चिदासते किं तत्र मदिष्टमिति कच्चिच्छब्दं प्रयुंजानस्येति भावः एवमुत्तरत्रापि द्रष्टव्यं २६ अथोक्तविधार्जुनदर्श
नेन कृष्णनिर्याणं संभावयंस्तच्छ्रवणे जातविषादः पश्चादेवमवचितमभिप्राये एतावत्कृष्णो विशेषेण पृच्छति शूर इत्यादिना अस्माकं मा

सूत उवाच ॥ इति चिंतयतस्तस्य दृष्टारिष्टेन चेतसा राज्ञः प्रत्यागमद्ब्रह्मन्यदुपुर्याः कपिध्वजः २३ तं पादयोर्निपतितमयथापू
र्वमातुरं अधोवदनमब्बिंदून्सृजंतं नयनाब्जयोः २४ विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः पृच्छति स्म सुहृन्मध्ये संस्मरन्
नारदेरितं २५ युधिष्ठिर उवाच कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते मधुभोजदशार्हार्हसात्वतांधकवृष्णयः २६ शू
रो मातामहः कच्चित्स्वस्त्यास्ते वाथ मारिष मातुलः सानुजः कच्चित्कुशल्यानकदुंदुभिः २७ सप्त स्वसारस्तत्पत्न्यो मातुलान्यः सहा
त्मजाः आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयं २८ कच्चिद्राजाहुको जीवत्यसत्पुत्रोऽस्य चानुजः हृदीकः ससुतोऽक्रूरो जयंतगद
सारणाः आसते कुशलं कच्चिद्ये च शत्रुजिदादयः २९ तामहः शूरः हे पार्थ हे मारिष सविसर्गपाठे शूर विशेषणं मारिषः श्रेष्ठः

पर्यायः स्वस्ति यथा तथा आस्ते कच्चित् तथा नो मातुलः आनकदुंदुभिर्वसुदेवः सानुजः कुशली कुशलमस्यास्तीति तथाभूतः आस्ते कच्चित् ॥
वसुदेवस्यानुजास्तु देवभागो देवश्रवा आनकः संजयः श्यामकः कंकः शमिकोवत्सको वृकश्चेति नव २७ सप्तेति स्वसार उग्रसेनस्येति सुताद्
शेषः सप्त भगिन्यः तस्यानकदुंदुभेः पत्न्यः मातुलान्यः अस्मन्मातुलस्य वसुदेवस्य स्त्रियः इत्यत्र शर्वरुद्रेत्यानुगागमे ङी ष्टिच मातुलानीति
धृतदेवसुत्यादितः आत्मजैः सह तासां स्नुषा यासां सुतभार्याभिः सहिता देवकीप्रमुखाः देवकी धृतदेवा शांतिदेवा उपदेवा श्रीदेवा देवरक्षिता
सहदेवाख्याः स्वयं क्षेमं यथा तथा आसते कच्चित् २८ असद्दुरात्मा कंसः पुत्रो यस्य स आहुकः उग्रसेनो राजा जीवति कच्चित् अस्या
हुकस्य चानुजो देवकः अपि जीवति कच्चिदित्यन्वयः हृदीकस्य अपत्यं कृतवर्मा ससुतोऽक्रूरः जयंतादयो ये च शत्रुजिदादयो वसुदेवपुत्राः ते
सर्वे कुशलमासते कच्चित् २९ ॥

भा०प्र०
७३

एवमिति कृष्णस्य भगवतः सखा कृष्णोऽर्जुनो भ्रात्रा राज्ञा युधिष्ठिरेण नानाविधानां शंकानामास्पदं निमित्तं रूपं तेजोहीनं स्वकीयं रूपं यस्य विक
ल्पितः कृष्णस्य भगवतो विश्लेषेण वियोगेन कर्षितः १ नहि केवलं तेन शोकेन शुष्यद्वदनं हृदयकमलं च यस्य सोऽत एव हतप्रभा यस्य तथा
भूतः तमेव विभुं श्रीकृष्णमभिध्यायन् प्रतिभाषितुं प्रतिवक्तुं नाशक्नोत् प्रशशाक २ ततः कृच्छ्रेण महता प्रयत्नेन शुचः शोकान् संस्तभ्य नेत्र
योर्नेत्रे कर्मणि षष्ठी पाणिना आमृज्य यद्वा संस्तभ्यमन इति शेषः नेत्रयोः शुचः शोकाश्रूणि पाणिभ्यां संमृज्य परोक्षेण यः समुन्नद्धः उ
त्कटः प्रणयः स्नेहस्तस्मात् औत्कंठ्यं तेन सपूर्वकानुध्यानं विरहासहत्वदशा वा तेनापि कातरः अधीरः ३ बाष्पैर्गद्गदया कुंठीभूतया गिरा अग्रजं
पतिं इतीत्थं वक्ष्यमाणप्रकारेणाह इत्यन्वयः कथंभूतः सन् सारथ्यादिषु कर्मसु सख्यादीन् संस्मरन् तत्र सौहृदं हितैषित्वं मित्रत्वं प्रियेषित्वं
समानशीलत्वं सखित्वं नियोगादिकरणार्हत्वं वा मैत्रत्वं ४ उक्तिमेवाह वंचित इति त्रयो विंशत्या हे महाराजाहं बंधुरूपिणा बंधुस्वरूपेणात्र

सूत उवाच॥ एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः नानाशंकास्पदं रूपं कृष्णविश्लेषकर्षितः १ शोकेन शुष्यद्वदनहृत्
सरोजो हतप्रभः विभुं तमेवानुध्यायन्नाशक्नोत्प्रतिभाषितुं २ कृच्छ्रेण संस्तभ्य शुचः पाणिनामृज्य नेत्रयोः परोक्षेण समुन्नद्धप्र
णयौत्कंठ्यकातरः ३ सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन् नृपमग्रजमित्याह बाष्पगद्गदया गिरा ४ अर्जुन उवाच॥
वंचितोऽहं महाराज हरिणा बंधुरूपिणा येन मेऽपहृतं तेजो देवविस्मापनं महत् ५ यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः उक्
थेन रहितो ह्येष मृतकः प्रोच्यते यथा ६ यत्संश्रयाद्द्रुपदगेहमुपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानां तेजो हृतं खलु मया
विहतश्च मत्स्यः सज्जीकृतेन धनुषाधिगता च कृष्णा ७

तेन हरिणा श्रीकृष्णेन हरेण साक्षाद्भगवता वंचितोऽस्मि रहितोऽस्मीत्यर्थः ये
नेत्यादीनां पदानां तेनाहमस्मि मुषितः पुरुषेण भूम्नेत्युपरिष्टादन्वयः देवानामपि विस्मापनं माश्चर्यकरं यन्महत् मम तेजो येनाप
हृतं देवेति राज्ञः संबोधनं वा ५ यस्य च भगवतः क्षणमात्रवियोगेनाप्यप्रियदर्शनं यस्य तथाभूतोऽयं मन्मूर्तिर्लोको भवति यथैव लोके
देहः उक्थेन प्राणेन रहितः मृतकः शवः प्रोच्यते अप्रियत्वाद्दर्शनायोग्यः प्रोच्यते तद्वत् ६ यत्संश्रयादिति अस्मदीयशौर्या
दिकं यदधीनं तेन वंचितोऽस्मीति संप्रदायार्थः द्रुपदो हि द्रौपद्याः स्वयंवरा स्वमुखे स्वयंवरप्रारंभे स्मरेण कामेन हेतुना दुर्मदाः म
दोयेषां तेषामुपागतानां राज्ञां तेजो मया यस्य भगवतः संश्रयाद्धृतमपहृतं खलु तथा सज्जीकृतेन समारोपितज्या केन धनुषा
मत्स्याकारो यंत्रविशेषः अभिहतः छिन्नः कृष्णा द्रौपदी चाभिगता लब्धा च ७॥ राम ७२ म ४

73

यस्य भगवतो बाहुदंड एवाभ्युदयो येषां तेन तदुपजीविनः तद्रूपा यदुप्रवीराः न विद्यते कुतोपि भयं येषां तथाभूताः संतः सुरसत्तमानामिंद्रादीनां
मुचितां नित्यमेव बलादाहृतां सुधर्माख्यां सभां अंघ्रिभिर्मुहुर्मुहुरधिक्रमंति ३८ तस्यानिर्वेदस्य हेतून् विकल्पयन् पृच्छति हेतात तवानामयं
मयमारोग्यं कच्चित् भ्रष्टतेजा यस्मात्तथाभूतो विभासि तस्मात्पृच्छामि हेतात त्वं तत्र चिरमुषितः हे तुगर्भमिदं चिरमुषितत्वादलब्धमानोसि
येनतथाभूतः किं अथवा तैरवज्ञातः अवमतः किं ४० अभावैरितिच्छेदः न विद्यते भावः सद्भावो येषां तैरमंगलैर्वा शब्दादिविषयैर्नाभिहतः
कच्चित् आशया अर्थिभ्यो याचकेभ्यः यत्प्रतिश्रुतं दास्यामीति प्रतिज्ञातं तत्तेभ्यः किं वा न दत्तं ४१ ब्राह्मणादीन्त्वं शरणोपसन्नं शरणागतं

यद्बाहुदंडाभ्युदयानुजीविनो यदुप्रवीरा ह्यकुतोभया मुहुः अधिक्रमंत्यंघ्रिभिराहृतां बलात्सभां सुधर्मां सुरसत्तमोचितां ३८ कच्चित्तेना
मयं तात भ्रष्टतेजा विभासि मे अलब्धमानोवज्ञातः किं वा तात चिरोषितः ४० कच्चिन्नाभिहतोभावैः शब्दादिभिरमंगलैः न दत्तमुक्तमर्थि
भ्य आशया यत्प्रतिश्रुतं ४१ कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियं शरणोपसृतं सत्त्वं नात्याक्षीः शरणप्रदः ४२ कच्चित्त्वं नाग
मोऽगम्यां गम्यां वासत्कृतां स्त्रियं पराजितो वाथ भवान्नोत्तमैर्नासमैः पथि ४३ अपि स्वित्पर्यभुंक्थास्त्वं संभोज्यान्वृद्धबालकान्
जुगुप्सितं कर्म किंचित्कृतवान्न यदक्षमं ४४ कच्चित्प्रेष्ठतमेनाथ हृदयेनात्मबंधुना शून्योस्मि रहितो नित्यं मन्यसे तेन्यथा न रु
क् ४५ इति श्रीमद्भागवते महापुराणे प्रथमस्कंधेऽर्जुनागमनं नाम चतुर्दशोध्यायः॥१४॥ ॥ ॥श्रीराम

तं शरणप्रदः रक्षकस्त्वं नात्याक्षीः कच्चित् ४२ अगम्यां स्त्रियं त्वं नागमः भवान् कच्चित् गम्यामप्यसत्कृतां वा नागमः कच्चित् अथ
न नु भवान् पथ्युत्तमैरधमैर्वा जनैः पराजितो वा किं ४३ संभोज्यान्सहभोक्तुं योग्यान् वृद्धान्बालकांश्च अपरित्यज्य स्वयं वर्जनाद्वे
परित्यज्य त्वं अभुंक्थाः अपि भुक्तवान् किं नोऽस्माकं मदर्थं अक्षमं अयोग्यं किंचिन्निंदितं कर्म कृतवान्किं ४४ हृदयेन हृदयंगमेन नितं
प्रियतमेनात्मबंधुना श्रीकृष्णेन रहितः अत एव शून्यो निरानंदोस्मीति मन्यसे कच्चित् अन्यथा ते हेतुं नामस्तत्त्वमस्याप्यभावे ते
तव रुग्रोगः आधिर्न स्यात् यद्वा रुग्दीप्तिरन्यथा तव गोविंदनाम्नः केनचिद्दुःखान्मनसैव हेतुनाभाविततया मितत्वं ४५ प्रथमे चतुर्दशः
ने२

यानइति योऽयुताग्रभुगपुत्तेन विप्राणामयुतेन सहाग्रेभुंक्ते इति तथाऽयुतस्याग्रेवा तस्माद्दरिणाद्दुर्योधनेन विहितात्तद्दुर्वाससः हे
तोरागतात्तदुरंतकष्टाद्दयारसंकटात् यो भगवान्नोस्मान् शाकान्नकान्नावशिष्टलेपमुपयुज्यभुक्त्वाजुगोप यतः शाकावशिष्टमुप
भुक्तवतो भगवतो हि तोः सलिले विनमग्नः संघोभूतसंघ रूपोदिहोयस्मद्दुर्वासाः त्रिलोकीमपि तृप्तामम त्वामन्यत भगवता
भा०पु० ७४ मुक्तितोस्मीत्यन्वयः एषा चात्र कथास्त्यत्र दुर्वासा मुनिवर्योपि दुर्योधनगृहंगतः तं राजा पूजयामास सार्घ्यपाद्यासनादिभिः
निमंत्रयामास सतं भोजनाय नराधिपः तं वाढमिति चामंत्र्य कृत्वा नित्यादिकाः क्रियाः बुभुजेन्नं बहुगुणं ब्राह्मणैः सहयंत्रिवि
त् अब्रवीच्च सरागानं भुक्त्वा तुष्टमनामुनिः वरं वरय भद्रं ते वरदोस्मि नराधिप याचयामि यदि किमहं वरवं तं मुनोश्वरं इति चिं
तो समायन्नोध्यजाद्दुर्योधनस्तदा मुहूर्तं चिंतयित्वा च प्रतिवेदमनोगतं बनवासं गतायेतु पांडवाः शंसितव्रताः तेषामस्य मुनेः शा
पजनयेयत्नवानहं तु सद्दृष्टे भुक्तसद्देशं यदा वांछति भोजनं तत्र दातुं शक्नुवंति ते वने क्लेशभागिनः तदाकोपवरीतात्मा शा
पं दास्यत्यसंशयं दूत्येवं दुरभिप्रायो वरं वव्रेसुदारुणं वने मे भ्रातरः संति पांडवा दुःखभागिनः भोक्तव्यं तद्गृहे गत्वा मद्गृहे भुक्तवा

योनोजुगोपवनमेत्य दुरंतकष्टात् दुर्वाससोरिविहितादयुताग्रभुग्यः शाकान्नशिष्टमुपभुज्य यतस्त्रिलोकीं तृप्ताममंस्तसलिले विनि
मग्नसंघः ११

74

न्यथा तथेति मुनिरुक्त्वा तं गत्वा याचत भोजनं अयुतब्राह्मणाग्रेमां भोजयाशु युधिष्ठिरं श्रुत्वैतद्वचनं राजा हरिं संजातवेपथुः भुक्तमस्ति
मिरधुनाशिष्टमन्नं न विद्यते तथान ब्राह्मणाः संति सामग्री च कदा तु न यद्यहं न ददाम्यन्नं शापं दास्यति कोपतः तथाप्येनं निमं
त्र्यैवमुपायं मृगयेधुना इत्येवं मनसा ध्यायन्राजा मुनिमथाब्रवीत् भगवन्नित्यकर्मादि कृत्वा स्नानादिकर्म च शीघ्रमागमनं
कार्यं सिद्धं सर्वं तथा मम ततः समित्यनुज्ञाप्य गत्वा चाश्रमं विवेश ह तत्राघमर्षणं कुर्वन्ध्यात्वा तद्ब्रह्मनिष्कलं एतस्मिन्नेव काले तु भ
गवान्यदुनंदनः आजगाम कुरुश्रेष्ठ संनिधौ क्लेशनाशनः विषण्णवक्त्रान्दृष्ट्वा पांडवान्मधुसूदनः उवाच राजन्किं दीर्घं प्रायसे
क्लेशभागिन सोस्मै न्यवेदयत्सर्वं मुनेरागमनादिकं श्रुत्वैतद्भगवान्कृष्णस्त्वं दुर्योधनविचेष्टितं श्रुत्वा वाचावशिष्टं तदन्नं किं
चिदस्तिवै शाकमात्रावशिष्टो मे पाक इत्यब्रवीत्तयः उवाच भगवान् शिष्टं शाकमानीयतामिति आनीतं भक्ष्यामास राज्ञा सुखोप राम ७४
शांतये दुर्वासास्तु मुनिर्मेने तृप्तस्या चरजंगमं इत्यादिका कथावर्तते ॥ ॥

यत्संनिधाविति यस्य भगवतः संनिधौऽहमु भूते सुरगणैः सहितमिंद्रं जवेन विजित्य खांडवाख्यं वनमहमग्नयेऽदां दत्तवानस्मि अहं उ इति
छेदः उ शब्दः निपातो विस्मयद्योतकः आश्चर्यमेवंविधं कर्म कृतवानस्मीति भावः तथा मयकृता मयेन निर्मिता अद्भुतान्याश्चर्यभू
तानि शिल्पानि रचनादीनि माया आन्यान्यप्याश्चर्याणि यस्यां सा सभा मया लब्धा अद्भुतानि शिल्पानि पाणिपादादिनैपुण्यानि यस्या
सुता माया आश्चर्यरूपाः प्रतिभादयो यस्यामिति वा तथा यत्संनिधौ तेन वा अध्वरे अश्वमेधे नृपतयो दिग्भ्यो बलिमुपाहरन्नाहृत्य समर्प
यामासुः ८ तवानुजो मम आर्यो ऽग्रजः गजानामयुतस्य सत्वं बलं तत्तुल्यं वीर्यं यस्य स भीमः तव मखार्थं यज्ञार्थं यस्य भगवतः संज्ञयाद्
तोऽन्यस्य जरासंधस्य शिरोंघ्रिमिति प्राण्यंगत्वात्समाहारद्वंद्वैकवद्भावः शिरोग्रीवा अहन् तेनानयेनाहूता नृपास्ते तेनैव विमोचिताः संतोय

यत्संनिधावहमु खांडवमग्नयेऽदामिंद्रं च सामरगणं तरसा विजित्य लब्धा सभा मयकृताद्भुतशिल्पमाया दिग्भ्योऽहर
न्नृपतयो बलिमध्वरे ते ८ यत्तेजसा नृपशिरोंऽघ्रिमहन्ममार्यो भीमोऽनुजस्तव गजायुतसत्ववीर्यः तेनाहृताः प्रमथ
नाथमखाय भूपा यन्मोचितास्तदनयन्बलिमध्वरे ते ९ पत्न्यास्तवाधिमखक्लृप्तमहाभिषेकश्लाघिष्ठचारुक
कबरं कितवैः सभायां स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या यस्तत्स्त्रियोऽकृत हतेश विमुक्तकेशाः १० ॥श्री॥श्री॥

प्रमथस्य रुद्रस्य भैरवस्य वा मखाय मखार्थं संभृतं धनं तद्वाध्वरे बलिं करमनयन्नानीतवंतः नृपाणां शिरःसु अंघ्रिर्यस्य
तं जरासंधमिति वा ९ पत्न्या इति तव पत्न्या द्रौपद्या अधिमखं राजसूयाख्ये यज्ञे विभक्त्यर्थेऽव्ययीभावः क्लृप्तः कल्पितो यो महा
भिषेकः तेन श्लाघिष्ठमत्यंतश्लाघ्यं चारु सुंदरं धम्मिल्लं विकीर्य विक्षिप्य यैर्दुःशासनादिभिः स्पृष्टं तेषां स्त्रियः स्त्रीः कृता हतना
ईशाः पतयो यासां ताश्च विमुक्ताः केशा यासां ताश्च तथाभूताः योऽकृत कृतवान्स तवानुजो नृपशिरोंघ्रिमहन्निति पूर्वे
णान्वयः कथंभूतायाः पत्न्याः पादयोर्दुःशासनस्य भगवतो वा स्वस्य वा पदयोः पतिताः अश्रूणि मुखे यस्यास्तथाभू
तायाः १०॥

कबरं ३
केशबंधं
[illegible] ३

कितवैः ३

यद्वोः ष्विति यस्य भगवतो दोः भुव इति धायितेन येतिशेषः तयाय दुर्जैक करणेनेन कृतं मामितसर्थः गुरुद्रोणः तस्य वनिमिनिर्मित रूपितानि
प्रयुक्तानि प्रतिहतमहिमानमस्त्राणि तो पदस्थ शान् यथा प्रास्त्रासुराणसुरेण कशिपुना कारित्ता एयस्त्रपातादीनिन्निरासिह दासं इत्कादि
भा०प्र० ७५ नास्य पांस्तत्वन् २६ सोस्य इति यस्य भगवतः यास्य पंजन्मयाः साधवो भवामयमुक्त येभजंति यस्यास्मरणात्मपर्यंतवदन्यः यस्यात्मदो
बलदापकए कोबहूनां यो विदधाति कामानिति श्रुतेः ईश्वरः सर्वनियंताकु बुद्धिनामेमयासो सेसारथ्यनिमित्ते रनः स्मोलैवाहिः
कृतमतएव भुवि रमेथिमां यस्य भगवतः प्रभावेन निरस्तं विमोहितंचितं येषां तेन्यानं प्राहरल इहतवंतः २७ नर्मापीति हेनदी
कृतमतएवभुवि रमेथिमां यस्य भगवतः प्रभावेन निरस्तं विमोहितं चितं येषां तेन यानं प्राहरल इहतवंतः
वनस्यमाधवस्य श्रीकृष्णस्य उदारेण रुचिरेण सुंदरेण चस्मितेन शोभितानि नर्माणि परिहासवाक्यानि हे पार्थेत्यादिस्मरणेन संबो
धनात्म कानि जल्पितानि च स्मरतो मम हृदयं लुठंति छिंदंति २८ शय्येति शय्यादिव्यापारेषु कांसाधारणयसाम्यविरुयावत ते

यद्दोः शुभा प्रतिहितं गुरुभीष्मकर्णद्रोणत्रिगर्तशालसैंधववाह्लिकाद्यैः अस्त्राण्यमोघमहिमानि निरूपितानि नोपस्पृशुर्न
हरिदासमिवासुराणि २६ सोसेवते कुमतिना मदईश्वरो मे यत्पादपद्ममभजंतिभव्याः मोप्यात वाहमरथी रथिनो भु
विष्टेन प्राहरन्यदनुभावनिरस्तचित्ताः २७ नर्माण्युदाररुचिरस्मितशोभितानि हे पार्थहेर्जुनसखेकुरुनंदनेति संजल्पितानिन
रदेवहृदिस्पृशानि स्मर्तुर्लुठंति हृदयं मम माधवस्य २८ शय्यासनाटनविकत्थनभोजनादिष्वैक्याद्वयस्यकमृतवानिति वि
प्रलब्धः सख्युः सखेव पितृवत्तनयस्य सर्वं सेहे महान्महितया कुमतेरघं मे २९ सोहं नरेंद्र रहितः पुरुषोत्तमेन सख्या प्रि
येण सुहृदाहृदयेन शून्यः अध्वन्युरुक्रमपरिग्रहमंगरक्षन् गोपैरसद्भिरबलेव विनिर्जितोस्मि ३० ॥ श्री ॥ ॥ श्री ॥ ॥

ननविघ्नेन्द्वयं दैविधमस्मत्तस्य प्रापारांतरं यस्य तस्य कुमते मेर्मम मैरेपुरघं सखेव तनयपर्यायं पितृवत्पित्रेवेति श्रीसूत्रकारेण
विप्रलब्धो वाधितिप्रोक्त भुमानभवोदेवा स्तद्वान् धनवानितिवत् देवानां स्वामी सर्थः महामहितया महिमहिमत्वात् महान्महि
तयेति पाठे महिम्ना माहात्म्येन तेन महान् सर्वमघमपराधं सेहे सोढवान् अमत्वामितिपाठे अत्वं समेवाचिकं का कुगर्भंविवक्षितं संसत्य राम
वा सौ किले सैवमादिरूपेण विप्रलब्धो पीत्यर्थः २९ सोहमिति सर्वएकाद्वयोहं हेनरेन्द्र स्वामिने ऽप्रियेण निरतिशयप्रीतिविषये ७५
ण हृदयेनेन गच्छतीति हृदयः अयगतावितिधातुः हृदयं गमेन सुहृदा हितेषिणा पुरुषोत्तमेन नन्दात्मजेन रहितः अंगहे राजन् लब्धानि उ
रुक्रमस्य श्रीकृष्णस्य परिग्रहं कलत्रमंडलं रक्षन् गोपैरसद्भिर्दुर्जनैरबलेव योषिदिवा निर्जितोस्मीति ३० ॥ ॥ ॥

हृदिग्रपतेर

यत्तेजसेति यस्य भगवतस्तेजसा मया हि तेन देहेन भगवान् शूलपाणिः शंभुः किरातरूपो युद्धे विस्मापितः स्येनिशीथः विस्मयं प्रापितः
सच गिरिशो रुद्रः मे मह्यं स्वमस्त्रं पाशुपताख्यं दत्तवान् तथा अन्ये च शक्रादयो विस्मापिताः इत्यर्थः तथाऽहममुनैव साधुना तेजोहीनेन कलेव
रेण एव महेन्द्रस्य भवने महदासनस्यार्द्धं प्राप्तः इंद्रासनस्यार्द्धमधिष्ठितवानस्मीत्यर्थः महदिति पदस्थपदं आसनपार्श्वात् महत्तदर्द्धमवाप्तिः
आर्षत्वात् नदभावे महदासनस्येत्यन्वेतुं शक्यं १२ तत्रैव महेन्द्रभवने विहरतो मम गाण्डीवलक्षणं गाण्डीवेन सह लक्ष्यते इति तथा येन
भगवता अनुभावितं प्रभावं प्रापितं तं भुजदण्डयोर्युग्मं सेन्द्रा देवा अरातिवधाय कालकेयनिवातकवचाद्यसुरवधार्थं आश्रिताः सहायत्वे
नाश्रिताः हे आजमीढ तेनाहं भूम्ना परिमितानन्दरूपेण परमपुरुषेण श्रीकृष्णेनाहं मुषितो वंचितोऽस्मि मां विहाय स्वलोकं गतः

यत्तेजसा च भगवान्युधि शूलपाणिर्विस्मापितः सगिरिशोऽस्त्रमदान्निजं मे अन्येऽपि चाहममुनैव कलेवरेण प्राप्तो महें
द्रभवने महदासनार्द्धं १२ तत्रैव मे विहरतो भुजदण्डयुग्मं गाण्डीवलक्षणमरातिवधाय देवाः सेन्द्राः श्रिता यदनुभावितमाज
मीढ तेनाहमद्य मुषितः पुरुषेण भूम्ना १३ यद्बान्धवः कुरुबलाब्धिमनन्तपारमेको रथेन ततरेऽहमतीर्यसत्वं प्रत्याहृतं बहुध
नं च मया परेषां तेजास्पदं मणिमयं च हृतं शिरोभ्यः १४ यो भीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमण्डलमण्डितासु ॥
अग्रेचरो मम विभो रथयूथपानामायुर्मनांसि च दृशा सह ओज आर्छत् १५ ॥ ॥ ॥ ॥

मेत्यर्थः १३ यद्बांधव इति यच्छब्दानामध्याहृततच्छब्देन तात्पर्यं इति इदं स्थं मम माधवस्येत्यनेनान्वयः यो भगवान् बांधवो
यस्य मोहो मे क एवातीर्यमवार्यं सत्वं बलं यस्य तमनन्तपारं निरवधिकं कुरूणां कुरुबलेयमब्धिं रथेन साधनेन ततरे तीर्णवानस्मि
आर्षत्वात् फलभञ्जनस्य श्लेषेणाभावात् सलोपाभावः आत्मनेपदं च तथा यद्बांधवेन मया परेषां शत्रूणां बहुधनं प्रत्याहृतं
ध्यातेषां शिरोभ्यः तेजस्पदं तेजः सुपदं स्थानं मणिमयं मणिमयलक्षणं धनं प्रत्याहृतं १४ यदिति हे विभो अग्रेचरः भागणः भीष्मा
णां बहूनां राजन्यश्रेष्ठानां रथजालैः मण्डितासु भीष्मादीनां सेनासु यो भगवान् मम अग्रेचरः अवस्थितः दृशा दृष्टिमात्रेण रथ
यूथपानामोजसा सहितमायुर्मनांसि चार्छत् हृतवान् तेनाहं मुषितोऽस्मीति संबंधः १५ ॥ ॥ ॥

इत्थमतिगाढेनापरेण सौहार्देन कृष्णस्य पादसरोरुहं चिंतयतोर्जुनस्यात एव विमला शांता रागाद्यकलुषिता च मतिरभूव २८ वासुदेवस्यांघ्री
रनुध्यानेन परिबृंहितं हितं वर्द्धितं रंहो वेगः प्रावल्यं यस्यास्तया वासुदेव भक्त्या विच्छिन्नस्मृतिसंतानरूपया श्री सात्विकया निर्मथिता नि
रस्ताः अशेषाः कषायाः कषायवद्दुर्मोच्या रागादयो यस्याः सा धिषणा बुद्धिर्यस्य सोर्जुनः २९ संग्राममूर्द्धनि युद्धारंभे यद्भगवता गीतं
गीतोपनिषद्रूपेण विदिष्टं ज्ञानं स्वात्मपरमात्मतत्त्वप्राप्तिसाधनादिप्रधानं तत्तु महता कालेन कर्मणा तमो गुणेन रुद्धं
रोहितमपि विभुस्तत्त्वावधारणसमर्थः अत्र निर्मथिताशेषकषायत्वं हेतुः पुनरध्यगमदध्यवस्यत् ३० ब्रह्मसंपत्त्या पं ... गती गत्वा ... व द
बुध्वा र्थी ब्रह्मविषयकसमग्रज्ञानेनार्जुनस्तदानीं मुक्तः तेनोपलक्षितः यद्वा तेन हेतुना संछिन्नो द्वैतसंशयः ब्रह्मज्ञानेन छिन्नो देवादिर्द्वे
स

भा०प्र० १५

७६

सूत उवाच॥ एवं चिंतयतो जिष्णोः कृष्णपादसरोरुहं सौहार्द्देनातिगाढेन शांतासीद्विमलामतिः २८ वासुदेवांघ्र्यनुध्यान परिबृंहितरं
हसा भक्त्या निर्मथिताशेषकषायधिषणोर्जुनः २९ गीतं भगवता ज्ञानं यत्तत्संग्राममूर्द्धनि कालकर्मतमोरुद्धं पुनरध्यगमद्विभुः ३०
विशोको ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः लीनप्रकृतिनैर्गुण्यादलिंगत्वादसंभवः ३१ निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च स्वः
पथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः ३२ पृथाप्यनुश्रुत्य धनंजयोदितं नाशं यदूनां भगवद्गतिं च तां एकांतभक्त्या भगवत्यधोक्षजे नि
वेशितात्मोपरराम संसृतेः ३३

ती १ संयुक्तिरितिगीतोपनिषद्रूपं षट्कोक्तवृत्तुत्सेवः ब्रह्मसंपत्त्येति मध्यमषट्कार्थज्ञानोन्मेषयुक्तः यद्वा ब्रह्मसंपत्त्या संछिन्नो द्वैतसंशयः
ब्रह्मज्ञानेन संछिन्नो देवादिर्द्वैतस्त्वनिष्टद्वैतसंशयः इत्यर्थः अलिंगत्वादिति स्थूलदेहविरहानुसंधानमुक्तं लीनप्रकृतिनैर्गुण्यादिति
सूक्ष्मप्रकृतित्रयगुणत्रयविरहात्तदनुसंधानादित्यर्थः देहवर्तमानत्वादर्जुनस्यासंभवः अत एव पुनर्जन्मरहितः ततो विशोको भ
वदित्यर्थः विशोकग्रहणमपहतपाप्मत्वादिगुणाष्टकयुक्तस्वरूपोपलक्षणं ३१ भगवतो मार्गं स्वलोकगमनप्रकारं ... कुल
संस्थां तन्नाशं चेति यावत् श्रुत्वा युधिष्ठिरः निभृतात्मा समाहितचित्तः स्वःपथाय ... राम १५
यमतिं चक्रे ३२ अर्जुनोदितं यदूनां नाशं तां भगवतो गतिं च श्रुत्वा ... भगवत्यधो... निवेशितात्मा म
नोप्यानवत्... ...वादिरक्षावभ्रव

नारीति येभगवता सहावस्थानदशायां धनुरादयस्त एवाधुनापि रथी चाहं स एवाधुनापि यतो ये नृपा यस्मा नमंति विशिष्टं रथिनं मां मन्यंते तदु-
त्यर्थः यद्यप्येवं तथापि तत्सर्वं धनुरादिकं ईशरिक्तं श्रीकृष्णरहितं तत्क्षणेनासदसमर्थमभूत् यथा भस्मनि हुतं ... कुहकराद्धं दोषवद्धि
प्रसाराद्धं धनं दानादिसत्कारः यथा चोप्तामूषरभूमावुप्तं बीजं तद्वत् २१ हे राजन्सुहृत्पुरे द्वारकायां त्वयाभिपृष्टानां नोस्माकं सुहृदां ... चतुः
पंचावशेषिताः चत्वारः पंच वाव शिष्टाः अन्ये तु सर्वे विनष्टा इत्यर्थः तत्र हेतुं वदन्विशिनष्टि विप्रशापमूढानां शापेन विमोहितानां ... नानां
२२ वारुणीं मदिरां सुरां पीत्वा तेनोन्मथितं विभ्रांतं चेतो येषां अत एव ते वान्योन्यमजानंता इव मिथो मुष्टिभिर्हताः २३ तन्मिथो निहननं भवितव्यता
यदीश्वरस्य कृष्णस्य विचेष्टितमेतत्संकल्पमूलकमेवेति भावः तदेव स्पष्टंतमाह यद्यथा यत्संकल्पान्मिथो भूतानि भावयंति वर्द्धयामा-

तद्वै धनुस्त इषवः स रथो हयास्ते सोहं रथी नृपतयो यत आनमंति सर्वं क्षणेन तदभूदसदीशरिक्तं भस्मन्हुतं कुहकराद्धमिवोप्तमूष्यां २१
राजंस्त्वयाभिपृष्टानां सुहृदां नः सुहृत्पुरे। विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः २२ वारुणीं मदिरां पीत्वा मदोन्मथितचेतसां अजा-
नतामिवान्योन्यं चतुःपंचावशेषिताः २३ प्रायेणैतद्भगवत ईश्वरस्य विचेष्टितं मिथो निघ्नंति भूतानि भावयंति च यन्मिथः २४
जलौकसां जले तद्वन्महांतोदंत्यणीयसः दुर्बलान्बलिनो राजन्महांतो बलिनस्तथा २५ एवं बलिष्ठैर्यदुभिर्महद्भिरितरान्वि-
भुः यदून्यदुभिरन्योन्यं भूभारान्संजहार ह २६ देशकालार्थयुक्तानि हृत्तापोपशमानि च हरंति स्मरतश्चित्तं गोविंदाभिहितानि मे २७॥

सुः तथा तत्संकल्पादेव मिथो निघ्नंति विनिर्जघ्नुः २४ युक्तं चैतत्तस्य भूभारावतारायावतीर्णस्य तन्निग्रायेण स्वयमुदासीनतयेन्नभारं संजहा-
रेत्याह जलौकस इति द्वाभ्यां तत्र विवक्षितार्थोपयोगितया दृष्टांतमाह जलेन लोकसां मत्स्यादीनां मध्ये यथा अणीयसः स्वल्पान्जलौकसो
महांतस्तत्सादंति भक्षयंति यथा च दुर्बलांस्तान्बलिनो हंति यथा च हे राजन्महांतो बलिनस्तथैव मिथो घ्नंति २५ एवं विभुर्बलिष्ठैर्महद्भिर्य-
दुभिरितरान्दुर्बलानन्यान्भूतान् ततोन्यो ... यदुभिर्यदूनेव मिथो भुवो भारभूतान्संजहार संहृतवान् २६ देशकाला ... दे-
शकालानुगुणकर्तव्यप्रयोजनेन तद्युक्तानि तत्कालिकानि एवं तान्हृत्तापशमानि दुःखोपशमानि गोविंदस्याभिहितानि भाषितानि मे भा-
षणानि गीतादिरूपाणि स्मरतो मम चित्तं हरंति २७॥

भा०पु० ११

ततो युधिष्ठिरः पुरे राष्ट्रे गृहे आत्मनि जनानां देहेषु च तस्य कलेः परिसर्पणमनुवर्तनं बुधः जानन् तन्मूलकं लोभाद्यधर्माणां चक्रं जालमवलो
क्य गमनाय महाप्रस्थानं पर्यधात् परिहितवस्त्रो बभूवेत्यर्थः ३७ ततः स्वराट् राजा युधिष्ठिरः गुणैरात्मनः स्वस्य समं विनयिनं च पौ
त्रं परीक्षितं हास्तिनपुरे तोयनीव्याः समुद्रमेखलाया भूमेः पतिमभ्यषिञ्चदभिषिक्तवान् विनिमयमात्मनोऽनवममिति पाठे [illegible]
मपार्थं सदृशमनवममन्यूनमित्यर्थः ३८ तथा मथुरायां वज्रं स्वयदुकुलकुमारं शूरसेनानां जनपदानां पतिमभ्यषिञ्चत् [illegible]
प्राजापत्यां निरूप्य कृत्वा ईश्वरो युधिष्ठिरो गार्हपत्याहवनीयादीनपि वह्नीनात्मन्यारोपितवान् ३९ तत्र स्वगृह एव [illegible]
दुकूलादिकं त्यक्त्वा वाचं जुहावेत्यर्थः ते कथंभूतः निर्ममः देहाद्यनुबन्धिषु स्वकीयत्वाभिमानरहितः निरहंकारः दे[illegible]

युधिष्ठिरस्तत्परिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तथात्मनि विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं
गमनाय पर्यधात् ३७ स्वराट् पौत्रं विनयिनमात्मनः सुसमं गुणैः तोयनीव्याः पतिं भूमेरभ्यषिञ्च
द्गजाह्वये ३८ मथुरायां तथा वज्रं शूरसेनपतिं ततः प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः ३
९ विसृज्य तत्र तत्सर्वं दुकूलवलयादिकं निर्ममो निरहंकारः संछिन्नाशेषबंधनः ४० वाचं जु
हाव मनसि तत्प्राण इतरे च तं मृत्यावपानं सोत्सर्गं तं पंचत्वे ह्यजोहवीत् ४१ ॥ ॥ ॥श्री॥ ॥

ततः संछिन्नाशेषबन्धनः अशेषाणि बन्धनानि प्रतिबन्धकत्वादीनि येन तथाभूतः प्रकृत्यादिमोक्षमनुसंहितवानित्यर्थः ४० तत्प्रकारमाह वाचमि
त्यादिना वाचं वागादिकर्मज्ञानोभयेन्द्रियव्यापारं मनसि जुहाव मनोऽधीनममन्यत मनसः इन्द्रियप्रवर्तकत्वाभावादयमेवार्थः तन्मनः प्राणे
जुहाव मनःप्रवृत्तिं प्राणाधीनां मेने तथा प्राणसंवादादिषु दर्शनात् तत एव हितत्वस्पृहस्य प्राणे तं प्राणादीनां लयानुसंधानप्रकारमाह
इतरे च तं मृत्यावपानं सोत्सर्गमिति तं प्राणमितरे इतरस्मिन्नपाने तं सोत्सर्गमपानमुदानमिति [illegible] उत्सर्गशब्दो [illegible]
दर्शनार्थः [illegible] विशिष्टानामेव तेषु [illegible] लयमनुसंहितवानित्यर्थः [illegible] पंचत्वे [illegible]
दियं चक्रकारणे वायावित्यर्थः [illegible] प्राणः [illegible] अतो [illegible]

५२

राम ११

भगवन्मार्गमिति भगाऊ [illegible]मित्यनेनचोक्ता भगवतः स्वलोकं प्रतिगतिः किं रूपा स्यत्तनुत्यागपूर्विका उ [illegible] दिभावयति॥
ययेति अजो भगवान्यया तन्वा भुवो भारमहरत्तां तनुं विजहौ मनुष्यसंस्थानं दिजहौ [illegible] याचतु [illegible] मा चावतीर्यपितोः।
प्रार्थनया यां मनुष्यसंस्थानसंस्थितां तां तनुं भूभारमपनेतुं जग्राह तां तनुं तिरोधाप्य स्वासाधा [illegible] मनु [illegible]
पनोदनोपाधिकत्वेन यावदुपाधितत्संस्थापनायत्नो द्यमयनुष्य स्वासाधारणयैव जगामेति भावः मनुष्यसंस्थानेनैव किं न जगामेत्याकां।
क्षायां तत्र दृष्टांतमुखेनोत्तरमाह यथा कंटकविद्धचरणः पुमान्यावत्तत्र यनोदं कंटकांतरं परिगृह्णाति ततस्तदनुपत्तनोपनेन [illegible] नो [illegible]
द्कमपि कंटकद्वयं जहाति तद्वदीशितुर्भगवतः द्वयमपि समं भयनोदकदुष्टतनस्थशरीरजालमपनोदकं मनुष्यसंस्थानं चोभयमपि समंहा

ययाहरद्भुवोभारं तांतनुंविजहावजः कंटकंकंटकेनेव द्वयंचापीशितुःसमं ३४ यथामत्स्यादि
रूपाणिधत्तेजह्याद्यथानटः भूभारःक्षपितोयेनजहौतच्चकलेवरं ३५ यदामुकुंदोभगवानिमां
महींजहौस्वतन्वाश्रवणीयसत्कथः तदाहरेवाप्रतिबुद्धचेतसामभद्रहेतुःकलिरन्ववर्तत ३६॥

तमत्वेनसममपनोदकशरीरस्यापि यावदुपाधिधार्यत्वादितिभावः ईशितुःकर्मयमित्यनेनदुःकच्छरीरे ष्वपंतुः [illegible] पंतु
भगवतएवस्वरूपत्वेवेति सूचितं कंटकदृष्टांतेनैवंचेत्तदभिप्रेतं यथोभयोः कंटकयोः कंटकत्वमविशिष्टमेवमु [illegible] शरीरयोः
स्वशरीरत्वमविशिष्टमिति ३४ इदमेवप्रसिद्धदृष्टांतांतरेणाप्याह यथेति यथानटोनाट्योपयुक्तानि वेषांतराणि परि [illegible]
स्थानंतरं स्वेनरूपेणैवावतिष्ठते तथाव भगवानपि तत्तत्प्रयोजनाय मत्स्यादिरूपाणि यावत्प्रयोजनं धत्ते तदंते पुनर्जहाति च।
स्वकीयरूपेणैवावतिष्ठते तथा येन शरीरेण भूभारः क्षपितो निरस्तः तत्कलेवरं जहौ तत्तिरोधाय स्वासाधारणेनैव [illegible] णैः
३५ यदेति श्रोतव्याः सत्याः कथा यस्य स भगवान्मुकुंदः स्वतन्वा स्वासाधारणदिव्यमंगलविग्रहेण इतः महीं यदा यस्मिन्नहनि
जहौ तदहरेव तस्मिन्नहन्येव विवेकिनामभद्रहेतुरशुभहेतुः कलिरन्ववर्तत ३६ ॥ ॥ ॥ ॥

तस्यवैकुंठपदांबुजस्यध्यानेनोद्रिक्तयाभक्त्याविशुद्धाधिषणाबुद्धिर्येषांते नारायणपद्माख्यपरमपुरुषेणैकांतमतिर्येषांम
त्रं२ तैरेकांतमविजातीयप्रत्ययाप्रवेधानं विषयेषुशब्दादिषुश्रवणादात्मामनोयेषांतैरसद्भिर्दुर्वासनाभिर्दुःरे [illegible] श्र
भा०प्र० कथांगतिंमुक्त्यात्मिकामवापुः तदेवोपपादयति विधूतानिनिरस्तानिकल्मषाणिभगवत्प्राप्तिप्रतिबंधकानिपूर्व [illegible] ये
१८ षांतेविरजेनरजस्तमोरहितेनआत्मनास्वरूपेणस्थानं श्रीनारायणस्यपदमवापुरित्यनुषंगः ४७ ४८ विदुरोपिवि [illegible] ले
तीर्थान्यटित्वापांडवादीनांगतिमाकर्ण्यात्मवान्भगवतिसमाहितचित्तःप्रभासेदेहंपरित्यज्यकृष्णावेशेनकृष्णसम [illegible] तुरंतर
चित्तःकृष्णैकविषयकचित्तःपितृभिःपितृदेवताभिःसह [illegible] स्वस्थानंययौ पुनर्यमएवभूत्वास्वकंलोकंप्रपन्नित्व [illegible] कृष्णोप

तद्ध्यानोद्रिक्तयाभक्त्याविशुद्धधिषणाःपरे तस्मिन्नारायणपदेएकांतमतयोगतिं ४७ अवापुर्दुरवापांतेअसद्भिर्विषया
त्मभिः विधूतकल्मषाःस्थानंविरजेनात्मनैवहि ४८ विदुरोपिपरित्यज्यप्रभासेदेहमात्मवान् कृष्णावेशेनतच्चित्तःपि
तृभिःस्वक्षयंययौ ४९ द्रौपदीचतदाज्ञायपतीनामनपेक्षतां वासुदेवेभगवतिह्येकांतमतिराप्तत ५० यःश्रद्धयैतद्भग
वत्प्रियाणांपांडोःसुतानामितिसंप्रयाणं शृणोत्यलंस्वस्त्ययनंपवित्रंलब्ध्वाहरौभक्तिमुपैतिसिद्धिं ५१ इतिश्रीमद्भागवते
महापुराणेप्रथमस्कंधेपांडवप्रस्थानंनामपंचदशोध्यायः॥१५॥ ॥ ॥

देशइतिपाठेयदुकुलसंहारयत्रश्रीकृष्णस्यःप्रविष्टस्तस्मिन्देशेप्रभासइत्यर्थः पुनरध्यःपतनाभावात्पांडवादीनांमुक्तवर
कथनंतेहिप्रारब्धकर्मावसानेविमोक्ष्यंतएवातोनविरोधः ४९ तदाद्रौपद्यपिपतीनामनपेक्षतांमाज्ञायज्ञात्वावासुदेवेभ
गवतिएकांताविजातीयप्रत्ययांतरायवहितामतिर्यस्याःसाभूत्वातंवासुदेवमवाप ५० श्रीकृष्णादीनांपांडवःकैवल्यवर्णन। राम
त्रं२ दिफलमाहयइति इतिसंप्रयाणंस्वस्त्ययनंश्रृणोतिपठतांचशुभावकंपवित्रंचभगवतःप्रियाणांपांडोः सुता [illegible] १८
यःपुमान्श्रद्धयाप्राप्नोतिसहरौभक्तिंलब्ध्वासिद्धिंमुक्तिमुपैति ५१ ॥ ॥ ॥इतिश्रीमद्भा [illegible] पंचदशः १५ ॥ ॥

एवमिंद्रियसर्गप्राणवृत्तिनिरोधानुसंधानमुक्तं अथ वायुनासह तानि पंचभूतानि त्रिष्वात्मा अहंकारकार्यमिति तदुभयं त्रिवृत्सात्वि
कराजसतामसरूपत्रिविधाहंकारेजुहावेत्यर्थः सर्वत्रलयप्रत्ययः यथायथमिंद्रियाणां सात्विकाहंकारेलयः भूतानां तामस इति त्रिवेकं
त्वाहंकारत्रये एकत्वे एकस्मिन्प्रकृतितत्वे महत्तत्वद्वाराजुहावेत्यर्थः सर्ववागादि प्रकृत्यंतं मात्मनि जीवेजुहवीच्च तेनात्स्वेतनप्र धीना
वृत्तिः अत एवमुक्तं नहि जीवः प्रकृतेरुपादानं आत्मानं जीवममव्यये ब्रह्मण्यजुहोति जीवस्य ब्रह्माधीनवृत्तित्वात्तस्मिंस्तत्सम
सनिराहारः बद्धवाग्मौनी मुक्ताविकीर्णा मूर्द्धजाः केशा येन सः जडदिव
पितवानित्यर्थः ४२ ततश्चीरं वल्कलंवासो यस्य

त्रित्वे हुत्वा च पंचत्वं तच्चैकत्वेऽजुहोन्मुनिः सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ४२
चीरवासा निराहारो बद्धवाग्मुक्तमूर्द्धजः दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ४३
अनवेक्षमाणो निरगादशृण्वन्बधिरो यथा उदीचीं प्रविवेशाशां गतपूर्वां महात्म
भिः हृदि ब्रह्म परं ध्यायन्नावर्तेत गतो यतः ४४ सर्वे तमनु निर्जग्मुर्भ्रातरः कृतनि
श्चयाः कलिनाधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि ४५ ते साधुकृतसर्वार्था ज्ञात्वा
त्यंतिकमात्मनः मनसा धारयामासुर्वैकुंठचरणांबुजं ४६ ॥ ॥ ॥

दात्मनः स्वस्वरूपमाकारं दर्शयन् लोकस्येति शेषः ४३ यथा बधिरस्तद्वदशृण्वन् अंध इवानवेक्षमाणः निरगाद्गृहात् ... ॥
पूर्वं गता आगतपूर्वा यतो यां गतः पुनर्नावर्तेत तां महात्मभिः विरक्तैः गतपूर्वां उदीचीं दिशं हृदि परं ब्रह्म ध्यायन्प्रविवेश ... ॥
ते युधिष्ठिरमनु समस्ता भ्रातरः सर्वे कृतनिश्चयाः गमनाय कृतो निश्चयो यैस्ते कृतविवेका वा निर्जग्मुः तेषां ततः युधिष्ठि...
अधर्ममित्रं यस्य तेन कलिना स्पृष्टाः प्रजाः भुवि दृष्ट्वा ४५ असाधु कृतास्तु ... कृताः सर्वे अर्थाः ... तदनु ...
ता आत्मनो देहस्यात्यंतिकं मरणं ज्ञात्वा भगवच्चरणांबुजं मनसा धारयामासुः युधिष्ठिरादयः ४६ ॥ ॥ ॥

श्रुते

त्वहे तुं वदन्ति त्वत्तङ्क्तकथानाश्रयाणाम श्रोतव्यत्वमवर्णनीयत्वं चाह किमस्यैरिति अंगहे सूत यद्येवं तस्मादायुषोऽसद्व्ययः निरर्थकः तयोर्मैत्रि ७२
तैः क्षुद्रायुषामल्पायुषामस्तं कर्मफलमिच्छतां मर्त्यानां मरणशीलानां न एणां संबन्धिभिरस्यैर्वि त्वत्तङ्क्ते जनाकथानाश्रयैरनएवासद्भिरा
लापैः किं वर्णितैर्वा न किंचित्प्रयोजनं किं तु केवलमायुर्व्ययएवेति भावः यद्वा हे सत्य परं ब्रह्म इच्छतां तस्यैव कामयमानानां मरण
भा०स्क० शीलानामल्पायुषां नएणामस्माकमन्यैरसदालापैः किं न किंचित्प्रयोजनमसिपनोमेभ्यः केवलमायुषोऽसद्व्ययो भवतीत्यर्थः
१९ ननु क्षुद्रायुषां मर्त्यानामस्माकं यावदल्पश्रवणेन श्रवणजीवनमप्यवसानं तु शकामित्यत्राह इहेति इहनैमिषे देवे शामिवरूपेति
कर्मणि यामिः यथा संतयपितृ वाची शामयितान्न भगवानस्त्विति श्रुतेः सचेह पापापनोदकं भगवद्गुणानुभवितव्यं वेधे
ग्रस्यं कर्मणि भगवद्गुणात्मकं ब्रह्म सत्रं इत्यर्थः भगवान्स्तु पाहुतः सचांतकोयावदिहास्तितावदत्र न कश्चिन्म्रियते मरणमेव ८ किमर्थं

किमस्यैरसदालापैरायुषो यदसद्व्ययः क्षुद्रायुषां नृणामंगमर्त्यानामृतमिच्छतां ७ इहोपहूतो भगवान्मृत्युः शामि
त्रकर्मणि नकश्चिन्म्रियते तावद्यावदास्त इहान्तकः ८ एतदर्थं हि भगवानाहूतः परमर्षिभिः अहो नृलोके पीयेत हर
रिलीलामृतं वचः ९ मंदस्य मंदप्रज्ञस्य वयो मंदायुषश्च वै निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः १० ॥श्री ॥

माहूत इत्यत्राह एतदर्थमिति एतनदर्थमत्रावस्थितानामस्माकममरणार्थमेव हि परमर्षिभिर्भगवान्मृत्युराहूतः इत्यर्थः मृत्युरपिन
व्यापारं विहाय भगवद्गुणश्रवणे रहनकिंचिदपि ह न्यादिसमभिप्रायेणाहूत इतिभावः तत्कथ्यतां महाभाग इत्यादिश्लोकद्वयेन वि
ष्णुत्के कथाश्रवणस्यैव वर्णनीयत्वं श्रोतव्यत्वं चोक्तं तदेव सहेतुकमुपपादयति अहो इति सार्द्धेन नृलोके हरेर्लीलायास्मिन्नतिपा
इयिलीलं तदमृतं तनुलं वचः पीयेत पातुं श्रोतव्यमित्यापिवत्येषि वंतितानभिनंदति अहो इति तेषां भाग्यमेतावदिति वक्तुमशक्यमि
राम तिभावः ९ कुतः यद्यस्मान्मंदस्य मंदबुद्धेः समंदप्रज्ञस्य बुद्धिर्यस्य मंदमल्पमायुर्यस्य तस्य हरिलीलामृतं वचोऽश्रावयतो दिवसस्यैव
७८ केवलं नक्तं रात्रौ निद्रया ह्रियते हृत्यते दिवाऽहनि तु व्यर्थैः पुरुषार्थशून्यैः कर्मभिः सांसारिककर्मभिः ह्रियते [illegible] १० ॥ १० ॥
वत्तस्तु वयः सफलं [illegible]

तदेवं संस्थानं पांडुपुत्राणां वदेत् कृष्णकथोदयमिति प्रतिज्ञातं तं पांडुपुत्रसंस्थानं परीक्षिज्जन्मोद्देश्य ... भिः वर्णितं परीक्षि-
तोपराजर्षेः जन्मकर्मविलापनमिति प्रतिज्ञातान्निवर्णयति तत्र तज्जन्म पांडवपुत्रत्वज्ञापनाय यान्यभिहितं ... विलापनं ... विवेके
वक्ष्यति इतः परं चतुरध्यायाक मीति णिवर्ण्यते इति विवेकः तत्र इति ततः पितृनिर्गमनानंतरं महात्मगुणायस्य ... तत्राह १
स्यां जन्मदिने जातककोविदाः विप्रायथा समादिशन् तथैव द्विजवर्यशिक्षया महाभागवतः सन्महीं शशास पालयामास १ स परी-
क्षिदुत्तरस्य मातुलस्य तनयामिरावतीमुपयेमे उवाह तत्र तस्यामिरावत्यां जनमेजयादींश्चतुरः सुतानुत्पादयत् अश्वमेधा-
नागमशास्त्रस्यानित्यत्वाद् २ शारद्वतं कृपं गुरुं कृत्वा गंगातीरे त्रीनश्वमेधानाजहार यत्र येषु अश्वमेधेषु देवा इंद्रादयः

सूत उवाच ततः परीक्षिद्द्विजवर्यशिक्षया महीं महाभागवतः शशास ह यथा हि सूत्यामभिजातकोविदाः समादिशन् वि-
प्र महद्गुणस्तथा १ स उत्तरस्य तनयामुपयेम इरावतीं जनमेजयादींश्चतुरस्तस्यामुत्पादयत्सुतान् २ आजहाराश्व-
मेधांस्त्रीन् गंगायां भूरिदक्षिणान् शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः ३ निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित्
नृपलिंगधरं शूद्रं घ्नंतं गोमिथुनं पदा ४ शौनक उवाच कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः नृदेवचिह्नधृक् शूद्र-
कोऽसौ गां यः पदाहनत् ५ तत्कथ्यतां महाभाग यदि विष्णुकथाश्रयं अथवास्य पदांभोजमकरंदलिहां सतां ६ ...

गोचरा बभूवुः तथा विधानाजहारेत्यर्थः ३ कदाचिद्दिग्विजये निमित्तेन चरन् वीरः परीक्षित् क्वचिद्देशे पदा पादेन गो-
मिथुनं वृषं ... गोर्वृषयोर्युग्मं घ्नंतं ताडयंतं शूद्रमपि नृपचिह्नधरं कलिमोजसा पराभिभवसामर्थ्यात्मकेन निजग्राह निगृहीत- ४
वान् तत्र लब्धप्रश्नावसरः पृच्छति शौनकः कस्य हेतोरिति नृपः परीक्षिद्दिग्विजये कस्माद्धेतोः कलिं निजग्राह एकः प्रश्नः
पदाहनत् ताडयत् सोऽसौ नृपचिह्नधारी शूद्रः कः इत्यपरः यद्यपि नृपलिंगधरं शूद्रं कलिमिति सामानाधिकरण्यनिर्देशेनैव कलि-
र्नृदेवचिह्नधृक् शूद्र इति ज्ञातं एवेति प्रश्नानुपपत्तिस्तथापि कलेरस्य किं गुणाकृत्यमभिप्रायः अतः प्रश्नोपपत्तिः ५ तत्कलिनिग्रह-
दिकं केवलमस्माभिः पृष्टं इत्येव वर्णनीयं किं हे महाभाग यदि विष्णुकथाश्रयं भगवत्कथोपेतं अथवास्याः विष्णोः पदांबुजमकरंद-
नो १

भा०प्र०
८०

तस्य परीक्षितः पूर्वं यो युधिष्ठिरादीनां वृत्तिमन्वहं वर्तमानस्य सतः तस्य नातिदूरे सन्निकृष्टदेशे यन्महद्राज्यमासीत्तत्कथयिष्य तो मे मत्तः निबोध शृणु २८ धर्म इति धर्मः धर्माधिदेवो वृषरूपधरः एकेन पदेन चरन् विच्छायां निस्तेजस्कां गां गोरूपधरां सहितां मातरमिवाश्रुमुखवदनेयस्यास्तां पृच्छति स्माप्रच्छत् २९ प्रश्नमेवाह कच्चिदित्यादिभिः षड्भिः हे भद्रे तव कुशलं देहस्य अनामयमारोग्यमस्ति कच्चित् ईषन्म्लान ... मुखेन विच्छाया निस्तेजस्का भवसि अहं तु भवती त्वामंबरा ... आधिः क्लेशो यस्यास्तथाभूता मालक्षये ... न विच्छायामुत्पश्यामि हे अंब कंचन दूरस्थं बंधुं शोचसि ३० किं वा पादैस्त्रिभिर्न्यू

तस्येवं वर्तमानस्य पूर्वेषां वृत्तिमन्वहं नातिदूरे किलाश्चर्यं यदासीत्तन्निबोध मे २८ धर्मः पदैकेन चरन्विच्छायामुपलभ्य गां पृच्छति स्माश्रुवदनां विवत्सामिव मातरं २९ धर्म उवाच कच्चिद्भद्रेऽनामयमात्मनस्ते विच्छायासि म्लायतेषन्मुखेन आलक्षये भवतीमंतराधिं दूरे बंधुं शोचसि कंचनांब ३० पादैर्न्यूनं शोचसि मैकपादमात्मानं वा वृषलैर्भोक्ष्यमाणं आहो सुरादीन्हृतयज्ञभागान्प्रजा उत स्विन्मघवन्नवर्षति ३१ अरक्ष्यमाणाः स्त्रिय उर्वि बालान्शोचस्यथो पुरुषादैरिवार्तान् वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्यान् ३२ किं क्षत्रबंधून्कलिनोपसृष्टान्राष्ट्राणि वा तैरवरोपितानि इतस्ततो वाशनपानवासस्नानव्यवायोन्मुखजीवलोकं ३३ ॥ ॥ ॥

।पञ्चक्तिः

नं एकः पादो यस्य तं मां एतर्हि शोचसि उत वृषलैः शूद्रप्रायै राजभिर्भोक्ष्यमाणं स्वात्मानं एवं शोचसि आहोस्वित् हृतयज्ञ
न०२ भागविभागोपेक्षितान्देवान्स्वित् उत स्वित् मघवति देवे अवर्षति सति दुर्भिक्षपीडिता प्रजाः शोचसि ३१ यद्वा हे कुर्वि पुरुषादैः राक्षसैरिव नृशंसैः स्वर्नृपीडितान् बालकान् अरक्ष्यमाणाः स्त्रियः स्त्रीः प्रति शोचसि किं ब्रह्मकुले कुकर्मणि दुर्वृत्ते सति देवस्य विदेशः ... वर्धिनी वाचं च त्रयीं प्रति उत राजकुले अब्रह्मण्ये ब्राह्मणद्वेषसाधुनि सति कुलाग्र्यान् ... राजानः ... क्षत्रियाधमाःक्षत्रि यस्तैः क्षत्रबंधुभिः अवरोपितान्युपद्रुतानि राष्ट्राणि प्रति उत इतस्ततो निविष्टे ...

इत्थमाख्यः स हेतुकं कलिनिग्रहादिकं वर्णयति सूतः यदेत्यादिना यावत्सप्तदशाध्यायसमाप्ति यदा परीक्षित् [illegible] ततः कुरुजांग
पु२ लेषु च जनपदेषु वसन्निज चक्रेण स्वाम्याज्ञाचक्रेण वर्त्तिते अनुशिष्टे देशे स्वसेनाधिष्ठिते देशे प्रविष्टं कलिं [illegible] मनतिप्रियां वा
र्त्तां निशम्याकर्ण्य ततः संयुगे युद्धे शौंडिः प्रवीणो राजा शरासनं धनुरादे ददे जग्राह निजचक्रवर्त्तिते कुरुजांगले वसन्निति वान्वयः ११
ततः सु अलंकृतं श्यामैः तुरंगैः संयोजितं मृगेंद्रः सिंहः स किल ध्वजो यस्मिंस्तं रथमास्थितो अधिष्ठितः रथादिचतुरंगयुक्तया सेनया परिवृतो दि
ग्विजयाय निर्गतः कुरुजांगलादिक्षितिशेषः १२ भद्राश्वादिवर्षाणि निर्जित्य बलिं करं जग्रहे १३ तत्र तत्र देशेषु स्वपूर्वेषां युधिष्ठिरादी
नां महात्मनां कृष्णस्य भगवतो माहात्म्यसूचकं प्रगीयमानं यशः १४ अश्वत्थाम्नो ब्रह्मास्त्रतेजसा परित्रातमात्मानं च वृष्णीनां पृ[illegible]

सूत उवाच यदा परीक्षित् कुरुजांगलेऽवसन् कलिं प्रविष्टं निजचक्रवर्त्तिते निशम्य वार्त्तामनतिप्रियां ततः शरासनं संयुगशौंडि
रादेदे ११ स्वलंकृतं श्यामतुरंगयोजितं रथं मृगेंद्रध्वजमाश्रितः पुरात् वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विज
यायनिर्गतः १२ भद्राश्वं केतुमालं च भारतं चोत्तरान् कुरून् किंपुरुषादीनि वर्षाणि विजित्य जगृहे बलिं १३ तत्र तत्रोपशृण्वा
नः स्वपूर्वेषां महात्मनां प्रगीयमानं च यशः कृष्णमाहात्म्यसूचकं १४ आत्मानं च परित्रातमश्वत्थाम्नोऽस्त्रतेजसः ।
स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे १५ तेभ्यः परमसंतुष्टः प्रीत्युज्जृंभितलोचनः महाधनानि वासांसि ददौ हारान्महामनाः
१६ सारथ्यपारिषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामान् स्निग्धेषु पांडुषु जगत्प्रणतिं च विष्णोर्भक्तिं करोति

नां च केशवे कृष्णे स्नेहमनुरागं च तथा तेषां तस्मिन् भक्तिं चोपशृण्वन् १५ नितरां तुष्टः प्रीत्या उज्जृंभिते लोचने यस्य स महः [illegible] योग्य
रत्नहारान्ददौ राजा तेभ्यः आवपित्यभ्यः महाधनानि बहुमूल्यानि दुकूलानि वासांसि हारान्मुक्ताहारांश्च ददौ १६ स्निग्धेषु [illegible] तेषु
पांडुषु युधिष्ठिरादिषु विष्णोः कृष्णस्य सारथ्यादिकं [illegible] कृतं प्रणामं च स्वभक्तिविशेषः नृपतिः परीक्षित्
स्नेहाच्छरणागतविदेहभक्तिं करोतीति स्वचकारेत्यर्थः तत्र सारथ्यं प्रसिद्धं पारिषदं सभ्यत्वं सेवनं भृत्यकर्म दौत्यं दूतकर्म वीरासनानुगम
नं वपासनाधिष्ठितं प्रत्यनुवर्त्तनं स्तवनं स्तुतिकर्म प्रणामो नमस्कारः विष्णुकर्तृका [illegible] विषयानेनास्मै तैलमर्थः २ ॥ ॥

ज्ञानमात्मज्ञानं निष्परिहार्यं प्रायोपायपुक्तं विरक्तिर्विषयेषु निस्पृहत्वं विषयानाकृष्टचित्तत्वं वा ऐश्वर्यं स्वव्यतिरिक्तसर्वनि
यन्तृत्वं शौर्यं युद्धे धैर्यं मुरव्यं तेजो धृष्यत्वं बलं स्मृतिः सत्त्वापि विपुलेऽप्यहं प्रजापतीनां च सर्वेषामीश्वरः प्रभुः समस्तविसुरचितसा
त्मैतिह्यस्मरणं उपकारविषयस्मरणं स्वातंत्र्यमन्यानपेक्षत्वं कौशलं नैपुण्यं कांतिः तत्तत्स्वयोभाती निगुणं विधाहीनिः धैर्यं
वीर्यं तत्त्ववृद्धे स्वगृहस्वप्रवेशसामर्थ्यं मार्दवं क्रूरता स्वातंत्र्यं सौभगं कांतिरिति पाठे सौभगं स्पृहणीयत्वं २८ प्रागल्भ्यं सभायुधार्ष्ट्यं
प्रश्रयो महत्सु विनयः शीलं सद्वृत्तिः सहः प्राणसत्त्वाभाविकसामर्थ्यं ओजोऽन्वादिजनितं बलं धारणसामर्थ्यं भगो ज्ञानायुत्कर्षः
गांभीर्यं दुरवगाह्याभिप्रायत्वं स्थैर्यं क्रोधनिमित्तेरविकारः आस्तिक्यं शास्त्रार्थविश्वासः कीर्त्तिर्यशः मानः पूज्यत्वं अनहंकृति

ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः स्वातंत्र्यं कौशलं कान्तिर्धैर्यं मार्दवमेव च २८ प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भ
गः गांभीर्यं स्थैर्यमास्तिक्यं कीर्त्तिर्मानोऽनहंकृतिः २९ एते चान्ये च भगवन्नित्या यत्र महागुणाः प्रार्थ्या महत्त्वमिच्छद्भिर्न
वियंति स्म कर्हिचित् ३० तेनाहं गुणपात्रेण श्रीनिवासेन सांप्रतं शोचामि रहितं लोकं पाप्मना कलिनेक्षितं ३१ आत्मानं
चानुशोचामि भवंतं चामरोत्तमं देवान्पितॄनृषीन्साधून्सर्वान्वर्णांस्तथाश्रमान् ३२ ब्रह्मादयो बहुतिथं यदपांगमोक्षकामा
स्तपः समचरन्भगवत्प्रपन्नाः सा श्रीः स्ववासमरविंदवनं विहाय यत्पादसौभगमलं भजतेऽनुरक्ता ३३ तस्याहमब्जकु
लिशांकुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृतांगी त्रीनत्यरोच उपलभ्य ततो विभूतिं लोकान्स मां व्यसृजदुत्स्मयतीं

देहात्माभिमानराहित्यं २९ ३० श्रीपतेर्ब्रह्मादिभिरिति श्रीः तस्याः निवासः श्रीनिवासः तेन तस्याभेदेन ३१ आत्मानं मां भवंतं त्वा
नुशोचामि त्यर्थः ३२ तदेव विवृण्वति ब्रह्मादय इति बहुतिथं बहुप्रभृतयः यस्यापांगमोक्षः ईषत्तिर्यग्प्रसारस्तद्विषयत्व
मात्मानं कामयमाना बहुतिथं बहुकालं तपः समचरन्चक्रुः सा श्रीरपि कमलवनं स्वनिवासं विहाय भगवन्तमेव प्रपन्ना
यस्य पादयोः सौभगं सौंदर्यमेवालं नितरां भजते सेवते ३३ तस्य भगवतः अब्जादीनां केतुनां चिह्नानां ... ... पदैः पार्थिव
न्यासैरलंकृतमंगं यस्याः साहं ततः अतएव विभूतिं लक्ष्मीमप्युपलभ्य तया यथा विभागेन लब्ध्वेत्यधिगत्य विभूतिं सर्व
समृद्धिं प्राप्य तेन वा त्रीनपि लोकानत्यरोचे त्रिलोकीमतिक्रम्य नतोऽप्यधिकं दीप्तिमत्यासम् ... तु स्मयन्तीं गर्विताम् ... भग

भा०प्र० ८१

श्रीभा० ८१

[illegible]

यद्वाहे अंब हे धरित्रि त्वं बभूरिभारस्यावतारायापहरणाय कृतः अवतारो येन तस्य हरेरधुनांतर्हितस्य श्री ... विकर्त्तविशेषी
तेन विसृष्टात्यक्ता सती तस्य कर्माणि चेष्टितानि निर्वाणविलंबितानि स्मरंती सुशोचसि निर्वाणं मोक्षं ... लं वितानि संनिहि
निमात्रात्कृतानीति यावत् पदानिर्वाणं सुखं विलंबितमधुनांतर्हितं येभ्यस्तानि २४ हे वसुंधरे तवाधेर्मूलमिदमुपस्थितं मम सम
चक्ष्वाख्याहि येन विकर्शिता कृशत्वं प्रापितासि तस्याधेर्मूलमित्यर्थः हे अंब वसुंधरे अपि वा सुरैः अर्चितं तव सौभाग्यं हृतं यत्तत् बलि
नामपि बलीयसा कालेन किं वापहृतं २५ एवमुक्ते धरण्याह भवानित्यादि दशभिः नत्वं ममाधिमूलं सर्वं नूनं भवान्वेदजानाति
कुतः यद्यस्मात् धर्मात्वमनुपृच्छसि अज्ञातत्वो धर्मप्रश्नोनुपपन्न इति भावः अयापि किं मयि निर्वेदेन कारणेन त्वं
लोकानां सुखावहैः चतुर्भिः पादैर्वर्तसे वर्तथाः अधुनायेन कारणे ... नैकपादेन वर्त्तसे तदेवममाध्याधिमूलमित्यर्थः

यद्वांब ते भूरिभरावतारकृतावतारस्य हरेर्धरित्रि अंतर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलंबितानि २४ इदं मम
चक्ष्व तवाधिमूलं वसुंधरे येन विकर्शितासि कालेन वा ते बलिनां बलीयसा सुरार्चितं किं हृतमंब सौभगं २५ धरण्युवाच भवान्हि वेद
तत्सर्वं यन्मां धर्मानुपृच्छसि चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः २६ सत्यं शौचं दया क्षांतिस्त्यागः संतोष आर्जवं शमो द
मस्तपः साम्यं तितिक्षोपरतिः श्रुतं २७

कारणविशेषजिज्ञासायां तदुपपादयति सत्यमित्यादिपंचभिः सत्यादयोऽष्टचत्वारिंशद्गुणा महत्त्वमिच्छद्भिर्जनैः प्रार्थ्या गुणाः ...
स्याः कदाचिदपि यस्मिन्न वियंति तेन गुणानां पात्रेण मुख्याश्रयेण श्रीनिवासेन श्रीकृष्णेन सांप्रतमधुना रहितं मत
त्वा पाप्मना पापेन कलिना ईक्षितं लोकं सम्यक् शोचामीत्यन्वयः तत्र सत्यं भूतहितं शौचं बाह्यं कं वा शौचं हेयप्रतिभटत्वं दांतिः
पराधजनसहिष्णुता त्यागः अनादरः पूर्णकामत्वं युक्तः तथा च ... एते सर्वमिदमस्मात्तोवा कचनादर इति आत्मपर्य ...
दात्यागः संतोषः कर्हिचिदपि लेशराहित्यं आर्जवं मनोवाक्कायानामेकरूपत्वं शमो मनोनिग्रहः दमो बाह्येंद्रियनिग्रहः तपः
स्वालोचनं जगत्पापारोपयुक्तं साम्यं शत्रुमित्रादिराहित्यं तितिक्षा द्वंद्वसहिष्णुता उपरतिर्व्यापारोपरतिः श्रुतं सर्वशा
स्त्रार्थयाथात्म्यविवेक २७

भा०पु० ८२

प्रश्नमेवाह कस्त्वमित्यादिभिरेकादशभिः तावद्वृषलं प्रति प्रश्नमाह द्वाभ्यां कस्त्वं त्वं कः प्रति प्रश्नः किमर्थं पृच्छसीत्यत्राह मद्रमेवश
रणं रक्षितारं यस्य तस्मिन्नसि त्वो केवलीसन्त्वमबलान्बलाद्धंसि अतः पृच्छामीति भावः नयोऽहमित्यत्राह नरदेवेव नरदेवोसि किं ६
मणोत्वद्विजः शूद्रः ५ गांडीवधन्वनार्जुनेन सह श्रीकृष्णेदूरं स्वलोकं प्रतिगते सति त्वमेवशोकान हीन्वहंसि प्रहस्वधर्मोसि
वध्योसि स्वजनेनेतिशेषः ६ अथ वृषभं पृच्छति त्वमिति हे मृणाल धवल पादैस्त्रिभिर्न्यूनः पदैकेन चरन्नत्वं वाकः नोस्मान्
परिखेदयन्किं वा कश्चिद्देवः ७ कौरवेंद्राणां दोर्दंडपरिरंभिते प्राप्नितेष्टपालितेइतियावत् अस्मिन्भूतले विनातिवां विना के
विदपि प्राणिनां शुचः शोकं श्रुविदवः कदाचिदपि नपतंति ८ हे सौरभेय मानुशुचः शोकं माकार्षीः तेतवर षलादस्मा

परीक्षिदुवाच कस्त्वं मच्छरणो लोके बलाद्धंस्यबलान्बली नरदेवोसि वेषेण नटवत्कर्मणा ऽद्विजः ५ कस्त्वं कृष्णे
गते दूरे सह गांडीवधन्वना शोच्योस्यशोच्यान्रहसि प्रहरन्वधमर्हसि ६ त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन् वृ
षरूपेण किं कश्चिद्देवो नः परिखेदयन् ७ न जातु कौरवेंद्राणां दोर्दंडपरिरंभिते भूतलेनुपतंत्यस्मिन्विना ते प्राणि
नां शुचः ८ मा सौरभेयात्र शुचो व्येतु ते वृषलाद्भयं मा रोदीरंब भद्रं ते खलानां मयि शास्तरि ९ यस्य राष्ट्रे प्रजाः सर्वास्त्र
स्यंते साध्व्यसाधुभिः तस्य मत्तस्य नश्यति कीर्तिरायुर्भगो गतिः १० एष राज्ञः परो धर्मो ह्यार्तानामार्तिनिग्रहः अत एनं व
धिष्यामि भूतद्रुहमसत्तमं ११ कोऽवृश्चत्तव पादांस्त्रीन्सौरभेय चतुष्पदः मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्तिनां १२

अद्य एवेनं नश्यतु आमाश्वासयन्नाह मेति हे अंब खलानां दुरात्मनां शास्तरि दंडधरे मयि सति इति सति त्वं मा रोदीः रोदनं मा कार्षीः॥
तेन तव भद्रं सुखमेव भविष्यति ९ हे साध्वि यस्य राष्ट्रे दुरात्मभिः सर्वाः प्रजास्त्रस्यंते विभ्यति असाधुभिरिति करणे तृतीया
यात्तीया प्रयुक्ता अन्नोन भीत्रार्थानामिति अपादानत्वं तस्य मत्तस्य राज्ञः कीर्त्यादयो नश्यंति भगो भाग्यं गतिः परलोकगतिः
१० आर्तानां दुःखितानामार्तिपरिहार इत्युपदेष राज्ञां परउत्कृष्टो धर्मः यस्मादेवमतः भूतद्रोहकारिणमतएवासत्तमं
वधिष्यामि ११ पुनर्वृषं पृच्छन्नाश्वासयति क इति सौरभेय तव त्रीन्पादान्कोऽवृश्चत्छिन्नवान् राज्ञां कृष्णानुवर्तिनां राष्ट्रे त्वादृशा दुःखिता मा भवन्नसत् १२

राम ८२

यो वा इति मम अतीव भाररूपम् असुरवंशे असुरसंप्रयुक्ते वंशे जातानां राज्ञाम् अक्षौहिणीनां शतम् अपानुदत् अपनीतवान् [illegible] कृतवान् इति
त्र्यः ऊनपदमूर्तं बरं वा दद्ध्यं यस्सत्त्वमतएव दुःस्थे दुःखिते त्वाम् आत्मनि स्वस्मिन् पौरुषेण सामर्थ्येन [illegible]
कर्तुमिच्छुर्यदुषु रमणीयमंगं शरीरमबिभ्रत् धृतवान् ३५ यः प्रेमपूर्वकावलोकनेन रुचिरेण सुंदरेण स्मितेन सुंदरेण भाषितेन च
मधुमानिनीनां यादवस्त्रीणां स्थैर्यं धैर्यं गर्वं च समहरत् हृतवान् यस्य चांघ्रिभिर्विटंकितायाः अलंकृतायाः मम रोमोत्सवो रोमहर्षो बभूव तस्य
पुरुषोत्तमस्य श्रीकृष्णस्य विरहं का वा मादृशी सहेत तेने का धीरा ३६ इत्थं तयोः पृथिवीधर्मयोः कथयतोर्मिथः संभाषमाणयोः सतोः
परीक्षिन्नाम राजर्षिः प्राचीं सरस्वतीं प्रभासतीर्थं प्राप्तः गतः ३७ इति प्रथमे षोडशः तत्रेति तत्र प्राच्यां सरस्वत्यां पूर्वोक्तमनाथवद्वृषमा

र्वपाहीनो
रस्वतीकृ
देवे ३

यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुदमात्मतंत्रः त्वां दुःस्थमूनपदमात्मनि पौरुषेण संपादयन्यदुषु रम्यमबि
भ्रदंगं ३५ का वा सहेत विरहं पुरुषोत्तमस्य प्रेमावलोकरुचिरस्मितवल्गुजल्पैः स्थैर्यं समानमहरन्मधुमानिनीनां रोमोत्सवो
मम यदंघ्रिविटंकितायाः ३६ सूत उवाच ॥ तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा परीक्षिन्नाम राजर्षिः प्राप्तः प्राचीं सरस्वतीं ३७
इति श्री॰ प्रथमस्कंधे षोडशोऽध्यायः १६ सूत उ॰ तत्र गोमिथुनं राजा हन्यमानमनाथवत् दंडहस्तं च वृषलं ददर्श नृपलांछनं १
वृषं मृणालधवलं मेहंतमिव बिभ्यतं वेपमानं पदैकेन सीदंतं शूद्रताडितं २ गां च धर्मदुघां दीनां भृशं शूद्रपदाहतां विवत्सामा
श्रुवदनां क्षामां यवसमिच्छतीं ३ पप्रच्छ रथमारूढः कार्तस्वरपरिच्छदं मेघगंभीरया वाचा समारोपितकार्मुकः ४ ॥ ॥

नं गोमिथुनं नृपस्येव लांछनानि यस्य दंडो हस्ते यस्य तं वृषलं च राजा परीक्षिद्ददर्श १ तत्र गोमिथुने पुमांसं विशिनष्टि वृषमिति वृ
षं मृणालवद्धवलं मेहंतं मूत्रं मुंचंतमिव बिभ्यतमुद्विजंतं एकेन पादेन कंपमानं शूद्रेण ताडितमतः सीदंतं क्लिश्यंतं २ स्त्रियं विशि
नष्टि गामिति धर्मदुघां घृतपयोरूपधर्महेतुद्रव्यदोग्ध्रीं शूद्रस्य पादेन ताडितामत एव भृशं दीनां वत्सरहितामश्रुसहितं वदनं
यस्यास्तां क्षामां कृशां यवसं तृणं इच्छतीं काममपमानां च चकार वृषलं च पप्रच्छ तन्नृपः ३ कार्तस्वरः स्वर्णमयः परिच्छदः
परिकरो यस्मिंस्तं रथमारूढः समारोपितं सज्जीकृतं कार्मुकं धनुर्येन स मेघगर्जितवद्गंभीरया गिरा पप्रच्छ ४ ॥ ॥

केचित्त्वप्रतर्क्यानतर्क्यागोचरादनिर्देश्यादृष्टमशक्यात् क्लेशाद्विकारणादित्याहुः इतीत्थं केषांपिनिश्चयः नेत्यध्याहारः यद्वा
तदभिमानानुसारेणापिनिश्चयः इत्यर्थः तत्रैवं क्लेशकारणेषु विकल्पितेषु हे राजर्षे यदनुरूपं प्रकृते क्लेशानुगुणं कारणं तत्त्व
मनीषया स्वप्रज्ञया धिया विमृश्य स्वविचारय २० इत्थं धर्मं प्रवदन्तं सम्राट् हे द्विजसत्तमाः स सम्राट् सार्वभौमः परीक्षित् [illegible] तरव
दः समाहितेन मनसा तं धर्मं स्याभिप्रायं प्रत्यचष्ट चष्टिर्दर्शने पिवर्त्तते इह वाक्ले ज्ञाने शीनवानित्यर्थः निर्णीतमेव तदभिप्रा[illegible]मा ना४
ह धर्मस्मितादिभिः षड्भिः तत्र क्लेशबीजाव हेतु पुरुषे संनिहिते पि यदुक्तं क्लेशबीजानि यतः पुरुषं न जानीम इति तत्र तदभि
प्राय निर्णयमाह धर्ममिति हे धर्म ज्ञसाक्षात् वृषरूपधृक् धर्मरूपो वासि अतएवापद्यपि पुरुषं ते न विजानीम इति धर्मं
ब्रवीषि अधर्मकारिणि पुरुषे संनिहिते यद्धर्मस्य चकं वचः तद्धर्ममेवेत्यर्थः कुतः यद्यस्माद् धर्मकृतो ऽधर्मकारिणः स्था

सूत उवाच एवं धर्मे प्रवदति स सम्राट् द्विजसत्तमा समाहितेन मनसा विखेदः पर्यचष्टतं २१ परीक्षिदुवाच धर्मं ब्रवीषि
धर्मज्ञ धर्मोसि वृषरूपधृक् यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत् २२ अथवा देवमायाया नूनं गतिरगोचरा
चेतसो वचसश्चापि भूतानामिति निश्चयः २३ तपः शौचं दयासत्यमिति पादाः प्रकीर्तिताः अधर्मांशैस्त्रयो भग्नाः स्मय

नं यत्सूचकस्याप्यधर्मसूचकस्यापि तत् स्थानं भवेत् यन्निर्वंतितं तद्दुःखकायन्तिष्ठतीति शास्त्रादितिभावः २२ अथवा विमृश्य स्वमतीम
येतियदुक्तं तदभिप्रायमाह अथवेति देवमायाया ईश्वरसंकल्पस्य मायायाः पुनं तत्त्वानि इति तत्त्वावयवायोत्रमायाशब्दः मायया सतन्नवे
भिप्राणिनां च प्रभाप्रभं इति प्रयोगाच्च गतिर्भूतानां चेतसो [illegible] वचसश्चागोचरा अपि वेदयम् ते निवानिश्चयः न जानीम इति वि
मृश्यास्वेतिच वदतान्वयायेवापकारिति सूचनमधर्मईश्वरसंकल्पश्च वाङ्मनसागोचरइतिवादर्शितमित्यर्थः २३ धर्मोसीत्यते
न त्वं साक्षाद्धर्माधिदेवताएवेत्युक्तं यतएवमतएव तव पादाश्च पिनलौकिकवृषभपादसजातीयाअपितु विशिष्टाएवेति वि
स्तरं जेकानुदर्शयति तप इति धर्माधिदेवस्य तव यादास्तपआदयश्चत्वारः प्रकीर्तिताः तत्र त्रयः पादाः अधर्मस्ता ८३
त्रिभिः स्मयादिभिर्भग्नाः तत्र स्वस्मिन्नुत्कर्षधीः स्मयः स च तपो नाशहेतुः संगः शौचविरोधी मदो दयाविरोधी चित्ताव
काराः विवेकाद्यमलरूपः मदेनात्तीनामार्तिमवश्यत्नदयां कुरुते

भा०स्कं०
८३

हे रक्ष वः भद्रमेव भविष्यतीति किं त्वत्तो नागसो निरपराधिनां साधूनां युष्माकं मात्मैवेन्यकारिणं पार्थानं अस्मान्मतं वः ...
नष्यानमारभ्यात्ति २३ कस्माना गसि निरपराधेजने द्रोहं युञ्जन्नास्तेन स सर्वनरः सर्वत्र मन्यतः भयं भविष्यति २४ ये नागसि
जने धुनिरंकुशः उत्पथः स न्नागस्कृद्द्रोहकृद्भवति तस्य साक्षादमर्त्यस्य देवस्य ... ऽपि ... अमां मांसि ... हरिष्यमाणो
स्वधर्मस्यानां पालनमेव राज्ञः परमो धर्मः कथंभूतस्येहलोके ऽनापद्युत्पथानं दुर्वृत्तानमानसाधून् शासतः २५ पतः अ...
पद्युत्पथानित्यनेनापदि दुर्वृत्तनिर्दोषाव हेति सूचितं २६ एवमुक्तवंतं माहत्म्यः एतदिति त्रिभिः नद्धर्वोभिनंदति एतदि...
पांडुवंशजानां युष्माकमेतदात्तनां नभयं यस्मात्तद्वचो युक्तमेव पांडवेयाविशिष्टानहि येषां पांडवेयानां गुणगणैः हेतुभिर्भिः

अस्मान्नाहि रक्ष भद्रं वः साधूनामकृतागसां आत्मवैरस्य कर्त्तारं पार्थानां कीर्त्तिदूषणं २३ अनेनागस्य यं युंजन्सर्वतोस्य च भद्रं
यं साधूनां भद्रमेव स्यादसाधुदमने कृते २४ अनागः स्विह भूतेषु य आगस्कृन्निरंकुशः आहर्त्तास्मि भुजं साक्षादमर्त्यस्यापि ...
पिसांगदं २५ राज्ञां हि परमो धर्मः स्वधर्मस्यानुपालनं शासतोन्यान्यथाशास्त्रमनापद्युत्पथानिह २६ धर्मं ...
एतद्धः पांडवेयानां युक्तमार्त्ताभयं वचः येषां गुणगणैः कृष्णो दौत्यादौ भगवान्कृतः २७ नवयं क्लेशबीजानि यतः सुः ...
पुरुषर्षभ पुरुषं तं विजानीमो वाक्यभेदविमोहिताः २८ केचिद्विकल्पवसना आहुरात्मानमात्मनः दैवमन्ये परे कर्म स्व ...

वान्ये ... दौत्यादौ कर्मणि कृतः दौत्यादिकर्मार्थं वनरत्यर्थः येषां मितिकर्त्तारि त्वष्टीयैः कृतइत्यर्थः एवंविधगुणगणा
र्थपाणामेतद्वचो युक्तमेवेति भावः २७ कोव कश्चिदिति यत्पृष्टं तत्रोत्तरमाह हे पुरुषर्षभ यस्मात्सुंसः क्लेशबीजानि दुःख
रणानि स्युस्तं पुरुषं वयं न जानीमः तत्र हेतुर्वदन्त्यान्यन्नो विशिनहि वाक्यभेदविमोहिताः क्लेशकारणनिवृत्तांक...
नानाविधवाक्यैर्विमोहिताः २८ वाक्यभेदानेव दर्शयति केचिदिति सार्द्धेन क्लेशकारणवादिनां मध्ये केचिद्दैवमेव
वंविधो विकल्प एव वसनं वसनवन्निर्णीन्नत्वा र्थापारकं येषां तथा मताः आत्मनः स्वस्यात्मानमेव क्लेशकारणमाहुः अन्ये तु
दैवमपरे तु कर्म शास्त्रं तं ... तं इत्तरे तु स्वभावं परे तु ... तत्र दैवं जीवादृष्टं स्वभावः प्रकृतेः परिणामस्वभावः प्रभुरीश्वरः २९

भा०पु०
८४

तदेवप्रपंचयति त्वामिति नरदेवानां देहेषु वर्तमानं त्वामनुस्मत्प्रवृत्तो भवन्नयमधर्मसमुदायः कोसावधर्मपूगस्तत्राह
लोभइति अनार्यशाठ्यमंहः पापं ज्येष्ठा अलक्ष्मीः मायामायागुणकार्यं रागद्वेषादिकं अपन्हवावादंभो वंचनं ३२ तत्तस्माद्धे अध ३२
र्मवंधो धर्मेण सत्येन च वर्त्तितव्ये अस्मिन्ब्रह्मावर्त्ते त्वया न वर्त्तितव्यं सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं तद्ब्रह्मावर्तं तत्रापि यत्र
यज्ञवितानविज्ञाः यज्ञानुष्ठानकोविदाः यज्ञैर्यज्ञेश्वरं परमपुरुषमाराध्य यजंति तत्र ब्रह्मावर्त्ते न वर्त्तितव्यं भवतेत्यर्थः ३३ (
किंच नायमस्मिन्देशे हरिर्भगवानिज्यमान आराध्य इज्यात्मा इज्यस्य मूर्तिः शरीरं यस्य सः यज्ञे इज्यमानो वायुरिवस्थावराणां जंगमा
नां च भूतानामंतर्वहिश्च आत्मेति शेषः आत्मांतः प्रविश्य प्रशासनधारणं कुर्वन्यजतामाराधयितॄणाममोघान्कामान्विदधं

त्वांवर्तमानंनरदेवदेहेष्वनुप्रवृत्तोयमधर्मपूगः लोभोनृतंचौर्यमनार्यमंहोज्येष्ठाचमायाकलहश्चदंभ ३२ नवर्तितव्यंतद
धोधर्मेणसत्येनचवर्तितव्ये ब्रह्मावर्तेयत्रयजंतियज्ञैर्यज्ञेश्वरंयज्ञवितानविज्ञाः ३३ यस्मिन्हरिर्भगवानिज्यमानोइज्यात्ममूर्तिः
शंतनोति कामानमोघान्स्थिरजंगमानामंतर्वहिर्वायुरिवैषआत्मा ३४ सूतउवाच॥ परीक्षितैवमादिष्टसकलिर्जातवेपथुः
तमुद्यतासिमाहेदंदंडपाणिमिवोद्यतं ३५ यत्रक्वचनवत्स्यामि सार्वभौमतवाज्ञया लक्षयेतत्रतत्रापित्वामात्तेषुशरासनं ३६ त
न्मेधर्मभृतांश्रेष्ठस्थानंनिर्देष्टुमर्हसि यत्रैवनियतोवत्स्यआतिष्ठंस्तेनुशासनं ३७ सूतउवाच॥ अभ्यर्थितस्तदातस्मैस्थानानिक
येददौ द्यूतंपानंस्त्रियःसूनायत्राधर्मश्चतुर्विधः ३८ पुनश्चयाचमानायजातरूपमदात्प्रभुः ततोनृतंमदंकामंरजोवैरंचपंचमं

श्वसुरंसमोहात्करंसंचरन्नोति प्रच्छेयोति तत्रसर्वत्रापिनभवतावर्त्तितव्यं इत्थंपरीक्षितानुशिष्टःकलिर्जातवेपथुः संजातगात्रकंपः उद्यत उद्य तो
तासिःखड्गोयेनतंदंडपाणिंयममिवोद्यतमुद्युक्तमिदंवक्ष्यमाणमाह ३५ तदेवाह यत्रेति द्वाभ्यां हे सार्वभौमतवाज्ञयायत्र क्वापिवत्स्यामियत्र
नंभवान्निर्दिशति तत्रक्वचिद्वत्स्यामि किंतुतत्र त्वामेवगृहीतशरासनमालक्षये ३६ अतस्त्वामेवंविधंनयत्रलक्षये हे धर्मभृतांश्रेष्ठ तत।
नुशासनमाज्ञामातिष्ठन्ननुपालयन्नियमेनवत्स्येतत्स्थानंनिर्दिष्टुंत्वमर्हसि ३७ इत्थमभ्यर्थितोराजाततस्तस्मैकलयेवासस्थानानिददौ ता राम
न्येवाह द्यूतमिति येषुस्थानेषुद्यूतादिरूपश्चतुर्विधोऽधर्मस्तानिददावित्यर्थः तत्रद्यूतंमदैर्देवनंपानंमद्यपानंस्त्रियःस्त्रीणांसंगःसूनाभूतहिं ८४
सा ३८ पुनश्चयाचमानायकलयेप्रभुःपरीक्षिज्जातरूपंसुवर्णंस्थानमदात्ततःपुनरपिस्थानं [illegible] याचमानायानृतादीनिपंचरूपेषुतानिस्थानानि
ददौ ३९

अथ वृषलेनच्छिन्नौ पादौ चतुर्थं च निश्चिन्वन्नाह इदानीमिति हे धर्म यत्त्वं तुरीये पादे सत्येन वर्तसे तमपि निवर्तयेत् यस्मात् अधर्मेण छिद्रा
नीमस्य नैनैधितः प्रवृत्तोयमधर्मरूपः कलिस्तं जिघृक्षति ग्रहीतुमिच्छति तपः शौचादीनां क्रमेण निवर्तकाः स्मयसंगमदात्ताना मभा
वाः संस्थापिकं तपः शौचादीनि स्मयादिभिर्भज्यंते २५ अथ पतनत्कारणं च निश्चिन्वन्नाह इयमिति द्वाभ्यां इयं गौः साक्षाद्भू
र्भगवता श्रीकृष्णेन न्यासितोपनीतः उरुभारो यस्यास्तथा भूता श्रीमद्भिः सुन्दरैः कलिकाश्रीः शोभा येषामस्तीति तैस्तस्य भगवतः
पादन्यासैः सर्वत्र कृतं कौतुकं उत्सवो यस्याः सा बभूव २६ अधुना तु भगवतोज्झिता त्यक्ता सती साध्वी भर्त्रा एव भाग्यहीनेवाबल
वृक्त कुला साधवः नृपव्याजाः नृपवेषमात्रधराः शूद्रा मां भोक्ष्यंतीति हेतोरश्रूणां कलाबिंदवो यस्यास्तथाभूता शोचति २७

इदानीं धर्म पादस्ते सत्यं निर्वर्तयेद्यतः तं जिघृक्षत्यधर्मोयमनृतेनैधितः कलिः २५ इयं च भूर्भगवता न्यासितोरुभरा
सती श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका २६ शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिताधुना अब्रह्मण्या नृपव्याजाः
शूद्रा भोक्ष्यंति मामिति २७ सूत उवाच ॥ इति धर्मं महीं चैव सांत्वयित्वा महारथः निशातमाददे खड्गं कलयेऽधर्महेत
वे २८ तं जिघांसुमभिप्रेत्य विहाय नृपलांछनं तत्पादमूलं शिरसा समगाद्भयविह्वलः २९ पतितं पादयोर्वीरः कृपया
दीनवत्सलः शरण्यो नावधीच्छ्लोक्य आह चेदं हसन्निव परीक्षिदुवाच न ते गुडाकेशयशोधराणां बद्धांजलेर्वै भ
यमस्ति किंचित् न वर्तितव्यं भवता कथंचन क्षेत्रे मदीये त्वमधर्महेतुः ३१

इतीत्थं धर्मं महीं च सांत्वयित्वा महारथः...
हि दधर्महेतवे कलये तद्वधार्थं निशातं तीक्ष्णं खड्गमाददे उद्धृतवान् २८ तं परीक्षितं जिघांसुं हंतुमिच्छुमभिप्रेत्याल
क्ष्य कलिर्नृपलांछनानि किरीटादीनि विहाय यावनीय भयेन विह्वलगात्रः शिरसा तस्य परीक्षितः पादयोर्मूलं समगात्सयाते
२९ पादयोः पतितं कलिं वीरो दीनवत्सलः शरणमर्हः शरण्यः श्लोक्यः प्रशस्यो राजा कृपया नावधीत् न हतवान् किं तु ह...वे
दं वक्ष्यमाणमाह ३० न ते वा इति ते तव अस्माभिः गुडाकेशयशो धराणामर्जुनकीर्तिवर्धनानां अस्माकं संनिधावित्यर्थः ब
द्धांजलेस्तेतव किंचिदपि भयं नास्ति किंत्वस्मदीये क्षेत्रे कथंचन भवता न वर्तितव्यं कुतः यतस्त्वमधर्मस्य बंधुरनुबंधी ३१

वं धा॰ ६

हमो२ पे२

अथैतत्सर्वं धर्षयिष्यन्पृच्छस्यामुद्बोधयितुं पारीक्षितमवशिष्टं वृत्तान्तं संक्षेपात्तावदनुसंहरति यश्चेति दशभिः यो वै परीक्षिन्मातुरुदरे द्रौण्यस्त्र
विप्लुष्टो दग्धोऽप्यद्भुतकर्मणः कृष्णस्य भगवतोऽनुग्रहान्न मृतः १ यश्च ब्रह्मकोपेन ब्राह्मणशापात्मकेन उत्थितात्तस्मादुपस्थितात्प्राणानां विप्ल
वो नाशो यस्मादुरुभयं यस्मात्तस्मात्तक्षकात्संमुमोह न प्राप्तः नाबिभेदित्यर्थः कथंभूतः भगवत्यर्पितः आशयोऽन्तःकरणं येन तथाभूतः सन् २ सर्वा
भा०प्र० जात्सर्वतः सर्वत्र देहतदनुबंधादिषु संगमुत्सृज्य वैयासकेः शुकस्य शिष्यो भूत्वा विज्ञाता अजिते भगवति संस्थितिर्निष्ठा यस्य सः स्वकलेवरं गं
८५ हौ तत्याज मोहाभावमेव सहेतुकमुपपादयति नेति ३ उत्तमश्लोकस्य भगवतो वार्ता येषां तेषां न भयं मोहो वास्तीत्यर्थः किमुत तस्योत्तमश्लोकस्य [illegible]

॥सूत उवाच॥ यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः १॥
ब्रह्मकोपोत्थिताद्यस्तु तक्षकात्प्राणविप्लवात् न संमुमोहोरुभयाद्भगवत्यर्पिताशयः २ उत्सृज्य स
र्वतः संगं विज्ञाताजितसंस्थितिः वैयासकेर्जहौ शिष्यो गंगायां स्वं कलेवरं ३ नोत्तमश्लोकवार्तानां जु
95 षतां तत्कथामृतं स्यात्संभ्रमोऽन्तकालेऽपि स्मरतां तत्पदाम्बुजं ४ तावत्कलिर्न प्रभवेत्प्रविष्टोऽपीह स
र्वतः यावदीशो महानुर्व्यामाभिमन्यव एकराट् ५ यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गां तदैवे
हानुवृत्तोऽसावधर्मप्रभवः कलिः ६

मृतं जुषतां सेवमानानां तु तत्पदाम्बुजं स्मरतां अन्तकालेऽपि संभ्रम एव स्यात् ४ सिंहावलोकनन्यायेन यस्य पालयतः क्षोणीमित्यनेनाभि
प्रेतं उपपादयति तावदिति इह लोके सर्वत्र प्रविष्टोऽपि कलिर्यावदुर्व्यामभिमन्युसुत एकराट् स्वतन्त्रः सम्राड् ईश्वरोऽधिपतिर्बभूव तावन्न राम
त्रा वा यावदनुवृत्तो बभूव तावत्कलिर्न प्रभवेन्न समर्थो बभूव ५ कदा प्रवृत्त [illegible] यस्मिन्न [illegible] निय [illegible] हतो भगवान् कृष्ण [illegible] ८५
भूमिमुत्ससर्ज तत्याज तस्मिन्नेवाहनि इहागतो चासावधर्मप्रभवः कलिरनुप्रवृत्तः [illegible] ६ ॥ श्री [illegible]

रजः क्रोधः प्रभवस्तस्मादिति प्रभवः अधर्मप्रभवः कलिरौत्तरेयेण परीक्षिता दत्तान्यमूनि पञ्च स्थानान्यनृतादीनि पूर्वोक्तानि द्यूतादीनि च औत्तरेयस्याज्ञानुवर्ती स कलिर्न्यवसत् ४० यतो द्यूतादीनि कलेरावासस्थानान्यथातः बुभूषुः भूतिमिच्छुरात्मनः कल्याणमिच्छुः पुमानेतानि द्यूतादीनि न सेवेत बुभूषुरित्यनेनैतानि निःश्रेयसविरोधीनि तत्र स्थावरतां प्राप्नुवन्तस्तत्र यो भवेत्तस्मिन् राज्ञा तु विशेषतस्तानि न सेवेत कुतः यतो धर्मशीलः धर्म एव शीलं वृत्तं यस्य सः तच्च कुतः लोकपतिः लोकानां जनानां पतिः पालयिता अन्यथा राजानमवलोक्य प्रजा अपि तथा कुर्वीरन् नश्येयुरिति भावः एतच्च राज्ञोऽनुचितमित्यभिप्रायेणैव विशिनष्टि गुरुः हितोपदेष्टा ४१ ततो वृषस्य वृषरूपधर्मस्य नष्टांस्त्रीन् पादान्प्रतिसंदधे संयोजयामास परीक्षिदिति शेषः तथा महीं चाश्वास्य संवर्धितवान् सम्यगवर्धयत् ४२ स इति स एव हेतुर्विधेयाः

अमूनि पञ्च स्थानानि ह्यधर्मप्रभवः कलिः औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृत् ४० अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ४१ वृषस्य नष्टांस्त्रीन्पादान् तपः शौचं दयामिति प्रतिसंदध आश्वास्य महीं च समवर्धयत् ४२ स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितं पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता ४३ आस्तेऽधुना स राजर्षिः कौरवेन्द्रश्रियोल्लसन् गजाह्वये महाभागश्चक्रवर्ती बृहच्छ्रवाः ४४ इत्थंभूतानुभावोऽयमभिमन्युसुतो नृपः यस्य पालयतः क्षौणीं यूयं सत्राय दीक्षिताः ४५ इति श्रीभागवते महापुराणे प्रथमस्कंधे कलिनिग्रहो नाम सप्तदशोऽध्यायः ॥१७॥ ॥ श्री श्री

भाव एष परीक्षिदेतर्ह्यधुनाऽस्मिन्काले विप्रकृष्टकाले वनं विविक्षता प्रवेष्टुमिच्छता पितामहेन राज्ञा युधिष्ठिरेणोपन्यस्तं पार्थिवस्य सार्वभौमस्योचितं सिंहासनमध्यास्ते वर्तमानसामीप्ये वर्तमानवद्वेति भूते लट् ४३ कौरवश्रेष्ठः श्रिया सार्वभौमश्रिया उल्लसन् शोभमानो विपुलकीर्तिश्चक्रवर्ती चक्रं भूमण्डलं वर्तयति पालयतीति तथाभूतः राजर्षिर्महाराजः परीक्षित् गजाह्वये पुरेऽधुना वर्तमानसन्निकृष्टभूतकाले आस्ते आस्त ४४ न केवलमुक्त एव तस्य प्रभावः किंत्वित्थंभूतो ऽन्योऽपि च प्रभावो यस्य तथाभूतोऽयमभिमन्योः सुतो नृपः परीक्षित् अत एवाधुना तस्याभावेऽपि तत्कृपया कलेरत्र देशे प्रवेशाभावादेवमभवत् तामिदं सत्रं प्रवर्तत इत्याह यस्येति यस्य परीक्षितः क्षौणीं पालयतः अत्रापि वर्तमानसामीप्ये भूते लट् शत्रादेशः पालितवतः सतः अपनीतविघ्नसारे तस्मै टीकायां तद्दासतानुवर्तितवतः चक्रानुवर्तनैरेव हेतोर्यूयं सत्राय कृतसंकल्पाः प्रवर्तते अन्यथा कलिना विभूतं सत्रमिदं नाप्रावर्ततेत्यर्थः ४५ ॥ इति प्रथमे सप्तदशः १७

सं।२

तदेवं नन्तिकर्मणीति अनाश्वासेऽविश्वसनीये निर्भये निर्भयत्वाभिमतेऽस्मिन्सत्रादिकर्मणि निष्ठानामिति शेषः धूमधूम्रा
त्मनां मत्तानावृतमनसां यद्वा धूमेन यज्ञीयेन धूम्र आत्मा शरीरं येषां केवलकर्मजडानामिति भावः भवान् गोविंदस्य पादपद्मयो रास
वमसज्जेमधुमधुरं पाययति १२ यतएवमतस्तव स्वर्गमोक्षादयोपि न भगवत्संगिलेशेनापि तुल्या इत्यभिप्रायेणाह तुलयामेति भगवत्
भा०१० संगिनः स्वादृशास्तेषां यः संगः तस्य लवेन लेशमात्रेणापि स्वर्गमपुनर्भवं मोक्षं चापि न तुलयाम न तुल्यं मन्यामहे इत्यर्थः यतस्ते[illegible]
८६ मोक्षावेव न तुलयामः किं पुनर्मर्त्यानामाशिषो राज्यकामादीन् तुलयामेति १३ नन्वस्तु भगवद्गुणकर्मैव किं रसवित्तत्राह क[illegible]
ना६ त्तमैकान्तपरमुख्यः एवमयनं प्राप्यः प्रापकश्चाधारश्च ई यन्ते इत्ययनं ईयं यन्तेनेत्ययनं ई यं यस्मिन्निति अयनं इति त्रिधा व्युत्पत्तेः
मयनशब्दानां तन्त्रेणा निर्देशात्तस्य भगवतः कथायां विषयभूतायां रसज्ञः को नाम तृप्येत् न कोपीत्यर्थः ननु [illegible]

कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान् आपाययति गोविंदस्य पादपद्मासवं मधु १२ तुलयाम लवेनापि न स्वर्गं नापुनर्भवं
भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः १३ को नाम तृप्येद्रसवित्कथायां महत्तमैकान्तपरायणस्य नांतं गुणानामगुणस्य जग्मु
र्योगेश्वराः ये भवपाद्ममुख्याः १४ तन्नो भवान्वै भगवत्प्रधानो महत्तमैकांतपरायणस्य हरेरुदारं चरितं विशुद्धं शुश्रूषतां नो
वितनोतु विद्वन् १५ स वै महाभागवतः परीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलं १६

गवद्गुणानां कर्मणां पुनः श्रवणेन को वा रसो निष्पद्यते इत्याशंकां निराकुर्वन् भावं विवृणोति नष्टि यस्या गुणस्येयं गुणरहितस्य [illegible]
नामंतमवधिं रुद्रचतुर्मुखादयो योगेश्वरा अपि न जग्मुः अश्रुतानामपि गुणकर्मणामानंत्यात् श्रुतानामपि न [illegible] वायमानत्वाच्च
पि न तृप्येदिति भावः १४ यतएवमतो महत्तमैकांतपरायणस्य हरेरुदारं विपुलमाचरितं चेष्टितं विशुद्धं एवं तावदत्तं च विशुद्धा [illegible]
भगवानेव प्रधानो मुख्यः श्रेयो यस्य स भवान् हे विद्वन् भगवद्गुणस्य हरेरुदारं तया [illegible] श्रोतुमिच्छतां नोऽस्माकं वितनोतु यास १०।
रनुकथयतु इति पावन् १५ संप्रति पृष्टं वस्तु प्रस्तौति सवाइतिद्वाभ्यां स उक्तविधो महाभागवतो ऽनल्पबुद्धिः परीक्षिद्येन वैयास ८६
किशब्दि[illegible]तेन शुकोपदिष्टपुराणजेन ज्ञानेन गरुडध्वजस्य भगवतः पादमूलं भेजे प्राप्तः १६ ॥ ॥ ॥ ॥ ॥

ननु कलिं कुतो न हतवानित्यत्राह नेति सम्राट् सार्वभौमः परीक्षित् कलिं नानुद्वेष्टि ... ... कृतवानित्यर्थः वर्तमानसामीप्ये लट्
कुतः यतः सारंग इव भृंगवत् सारभुक् सारानुभवितासारग्राहीतियावत् सारंगो भृङ्ग ... सारं ... ... नाशयति तद्दर्
कलिगतसारग्राहित्वान्न तं जघानेत्यर्थः कोसौ नन्वत्र सारः यन्निमित्तं नानुद्वेष्टीत्यत्राह कुशलानीति यस्मिन्कलौ कृतानि भ
मकीर्तनादिरूपाणि पुण्यकर्माण्याशु सिध्यंति भगवत्प्राप्तिभावं हंति इतराण्यकुशलेकर्माणि पापानीतियावत् तान्याशु न सिध्यं
तीन फलराशिं भवंतीत्यतस्सारभुक् न द्वेष्टीत्यनेन कृतादियुगेषु कुशलानां चिरेण फलदत्वमितरेषां त्वाश्वितिसूचितं ७ ननु कलिन
शर्द्ध भूतेजनैः कुलानि न कृतान्येव स्युः येनाशु सिद्धेयुरित्यत्राह किंन्विति बालेषु विषयभूतेषु शूरेण धीरेषु विवेकिषु तु भीरुणा कलिना
नु कृतं स्यान्न कोप्यनर्थः कृतः स्यादित्यर्थः तदेतद्दृष्टांतेन दर्शयन्विशिनष्टि यः कलि ... वृक इव प्रमत्तेषु जनेषु प्रमत्तो वर्त ८७

नानुद्वेष्टि कलिं सम्राट् सारंग इव सारभुक् कुशलान्याशु सिध्यंति नेतराणि कृतानि यत् ७ किन्नु बालेषु शूरेण कलिना धीर
भीरुणा अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्तते ८ उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया वासुदेवकथोपेतमाख्यानं यदपृच्छत ९
या याः कथा भगवतः कथनीयोरुकर्मणः गुणकर्माश्रयाः पुंभिः संसेव्यास्ता बुभूषुभिः १० शौनक उवाच सूत जीव समाः सौम्य शाश्वती
र्विशदं यशः यस्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः ११

यद्यूयं मां पृच्छत तद्वासुदेवस्य कथोपेतमत एव पुण्यं तावद्दत्तं
पारीक्षितं सर्वं आख्यानं मया वो युष्मभ्यं उपवर्णितं ९ किं पृच्छथ मुदो धियि तुष्ट एव साकल्येन भगवत्कथानां श्रोतव्यतां
ति कथनीयान्युरूणि बहूनि कर्माणि चेष्टितानि यस्य तस्य भगवतो गुणाः कर्माणि चाश्रया विषयास्तां ताः कथास्ता बुभूषुभिः पुंभिः ...
यद्वा मुमुक्षुभिः सर्वतः संगविरहात्प्राप्तिसंस्थितिः वैयासकेर्महोशिष्यः शुकोपदिष्टेन सुरगणत्वज्ञानेन मुक्तो बभूवेति तद्वैयासक
दिष्टपुराणश्रवणादारात्तज्ज्ञस्मरणानलिप्सुः पृच्छति शौनकः सूतेति सप्तमिः तावज्जन्ममरणाद्यनंतदुःखावहदुःसहसंसृति ...
दायानि रतिशयानंदरूप परब्रह्मप्राप्तिहेतुं तत्कथामृतं पाययतं महोपकर्तारं सूतं माशास्ते सूतेति हे सूत हे सौम्य शाश्वतीः ... याव
त्समानजीव कालाध्वनोरत्यंतसंयोगे द्वितीया कुत एवमाशास्तद्रूपत्वं तं विशिनष्टि यस्त्वं कृष्णस्य विपुलं विशदं यशस्तत्तुल्यं
यशो मर्त्यानां नोऽस्मभ्यं शंससि कथयसि अतो हर्षातिशयादाशास्महेतिभावः ११ ॥

महद्गुणत्वाभिप्रेतमेव विशदयंस्तत्त्वं गह्वरदर्शयामीत्यभिप्रायेणाह एतावतेति गुणैर्न विद्यते साम्यं यस्य तैर्न विद्यतेऽतिशायनमति।
शयो यस्य सा स्यश्चासावनतिशायनस्तस्य निःसमाभ्यधिकगुणस्येत्यर्थः सूचितेन दिङ्मात्रदर्शितेनैतावता महिम्नालं बहुनाकिंत
भा०प्र० द्दर्शनीयमिति भावः किं च ता विभूतिर्लक्ष्मीः प्रार्थयमानानपीतरान्ब्रह्मादीन्हित्वा नभीप्सोरकामयमानस्यापि यस्य भ… ङ्घ्रि
८१ रेणुं जुषते सेवते इत्नी यत्ताङ्घ्रियः पतिव्रतमेव तन्मात्रप्रदर्शनायालमित्यर्थः २० अन्यमपि तन्महात्म्यदिशं दर्शयामीत्यभिप्रायेणाह
अथापीति अथाप्यपि च पुनरपि चेत्यर्थः यस्य भगवतः वामपादांगुष्ठनखावसृष्टमर्वाक् प्रसृतं विरिंचेन ब्रह्मणोपहृतं स…
तमर्हणं भोग्यजलं गंगाख्यं कर्त्तसेशं रुद्रादिलोकपालैः सहितं जगत्पुनातीत्येतावता सूचितेन महिम्नालमित्यर्थः …
गुणगणयुक्ता च श्रीनिवासानीर्थपदान्मुकुंदादन्यः को वा लोके भगवत्पदार्थः भगवत्पदाभिधेयः ज्ञानशक्तिबलैश्वर्यतेजःप्रभृ
सरलेपकल्याणगुणयोग्यत्ववदभिधायकेन भगवच्छब्देन प्रवृत्तिनिमित्ताभावात्त्रयः पुरुषोत्तमादन्यः को वाभिधीयते न कोऽपीत्यर्थः

97 एतावतालं ननु सूचितेन गुणैरसाम्यानतिशायनस्य हित्वेतरान्प्रार्थयतो विभूतिर्यस्यांघ्रिरेणुं जुषतेऽनभीप्सोः २० अथापि यत्पाद
नखावसृष्टं जगद्विरिंचोपहृतार्हणांभः सेशं पुनात्यन्यतमो मुकुंदात्को नाम लोके भगवत्पदार्थः २१ यत्रानुरक्ताः सहसैव धीरा।
व्यपोह्य देहादिषु संगमूढं व्रजंति यत्पारमहंस्यमंत्यं यस्मिन्नहिंसोपशमः स्वधर्मः २२ अहं हि पृष्टोऽर्यमणो भवद्भिराचक्ष आत्मा
वगमोत्र यावान् नभः पतंत्यात्मसमं पतत्रिणस्तथा समं विष्णुगतिं विपश्चितः २३ एतेन योनंतशक्तिर्भगवानित्याकांक्षा शामिता अ

यत्रेति यत्र यस्मिन्भगवति मुकुंदेऽनुरागयुक्ताः संतो धीराः जितेंद्रियाः सहसाऽकस्मादेव देहेऽहमादिशब्दात्तदनुबंधिषु पुत्रादिषु ऊढं … संगम
पोह्य तत्पारमहंस्यमंत्यं तुरीयं परमहंसाश्रमं व्रजंति यस्मिन्पारमहंस्ये ऽहिंसोपशमश्च स्वधर्मः स्यादिति २२ एवंवि
२३ धमहात्म्यशालिनो भगवतो महात्म्यं वर्णयितुमहं न प्रभुः यथाविधयामति वर्णयामीत्यभिप्रायेणाह अहमिति अर्यमणः हे ज्ञानाधिकाः
अगतो गतस्य परं बुद्ध्यर्थः अत्र भगवन्महात्म्ये भवद्भिः पृष्टोऽहं यद्वा हि अर्यमणः सूर्याः त्रयीमूर्तयः यावानात्मनो बुद्धेरवगमः प्रसरः याव
न्महिमा मद्बुद्धिविषयो भवति तावंतं महिमानमात्मबुद्धेर्वर्णयामि तथाहि यथा … यत्रिणो वा … स्वबलानुरूपं
३२ एवं नभः प्रतिपतंति इत्युक्तं तथा विपश्चितो विद्वांसः स्वबुद्धिबलानुरूपं विष्णुगतिं भगवन्महिमानं … विषयीकुर्वंति नहि प
२८ तत्रिणो नभसि उच्छ्रितानभसोऽर्वाग्निवर्तंते स्वर्वद्यान्निवर्तंते एवं विपश्चितो … भगवन्महिम्नः …

तदाख्यानं पुराणं नोस्मभ्यमाख्याहि कथय कथंभूतं वदतोऽस्य एव तां च परं पुण्यं निरतिशयपुण्यावहं पक्षायरमुत्कृष्टमतुलसाधि कपुराणान्तररहितमसंवृतार्थं सं कुचितार्थः स्पष्टा वाऽर्था मुमुक्षूणामुपादेयाः श्रीरत्नाः प्रतिपाद्या यस्मिन् अत्यद्भुतो भगवद्भक्तियोग निष्ठ यस्मात् अनंतस्यापरिच्छिन्नस्वरूपस्वभावस्य भगवतः आचरितैश्चेष्टितैः प्रतिपाद्यैरुपपन्नं युक्तमत एव भागवतानामभिरामं भा गवतमिति भावः भागवतश्रवणस्पान्यगामित्वमुदासाय विशिनष्टि पारीक्षितं परीक्षिताश्रुतं १७ इत्थं भगवद्गुणानुवर्णने प्रवर्तित वदात्मानं कृतार्थं मन्यते अहो इति स्वभाग्यं शिरःकंपेनाविःकरोति किं तद्भाग्यमित्यत्र तदेव दर्शयति वयं विलोमजाता अ त्र्यण्यां क्षत्रियाज्जाता अपि वृद्धानां ज्ञानेन वयसा जन्मना च वृद्धानां भागवतानामनुवृत्त्या हेतुभूतयाऽधुना जन्मभृता प्रशस्त दे तः अस्म भवामहे त्या पापव्यपहर्षे वा विलोमजानामपि हे वंतरेण प्राशस्त्यमूलको हर्षः आश्चर्यं च युक्तमेवेत्यभिप्रायेणाह दौष्कुल्य

तन्नः परं पुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठं आख्याह्यनंताचरितोपपन्नं पारीक्षितं भागवताभिरामं १७

सूत उवाच अहो वयं जन्मभृतोऽद्य हास्म वृद्धानुवृत्त्यापि विलोमजाताः दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयो गः १८ कुतः पुनर्गृणतो नाम तस्य महत्तमैकांतपरायणस्य योऽनंतशक्तिर्भगवाननंतो महद्गुणत्वाद्यमनंतमाहुः १९ ॥

मिति महत्तमानां वाद्धानामभिधानयोगः श्रवणमाख्यानसंबंधः दौष्कुल्यं दुष्कुलप्रभवत्वप्रयुक्तं हीनत्वं माधिं मनः खेदं श्रीघ्रं विधुनोति निरस्यति १८ यतो महत्तमानामभिधानानयोग एवाधिं दौष्कुल्यं च विधुनोति कुतः पुनः साक्षान्महत्त मस्य भगवतो नाम गृणतः कीर्तयतः पुंसो दौष्कुल्यमाधिश्च संभवेत ननु कोसौ महत्तमैकांतपरायणभूतः केतस्य ना मग्रहणे हेमात्रस्येव कथं दौष्कुल्यादिपरिहारक त्वं कथं तरां तद्भक्ताभिधानयोगस्य तत्राभिमतः तं विशिंषन्नाह यो भगवान्पूर्णं नंतगुणत्वादनंतमाहुः सत्यं ज्ञानमनंतं इत्यादयो वेदांता सत्यनाम गृणतं इत्यन्वयः अनंतोऽनंतगुणत्वाच्चेत्यनेन स्वरूपतो गुणतश्चानंत्यमनंतपदप्रवृत्तिनिमित्तमिति सूचितं अनेन स्वभक्ताभिधानयोगस्य दौष्कुल्याद्यपनोदकत्वं गु णाश्रयत्वमुक्तं गुणानां महत्त्वं नामानंत्यमनितरसाधारणं चानितरसाधारणानवधिकगुणत्वादित्यर्थः १९ ॥ श्रीराम

अनंतशक्तिरित्या० म३

अनंतशक्तित्वाद्दुःसर्वपदतौर दुनो२

किमर्थं निहितवानित्यत्र राज्ञस्तात्पर्यमाविःकरोति एवमिति किमेषमुनिर्निभृतानि निपमितान्यशेषाणि करणानींद्रियाणि येन मीलि
तेईक्षणेलोचने येन तथाभूतः यथार्थसमाधिनिष्ठः आहोस्वित् क्षत्रबंधुभिरस्माकं किंप्रयोजनं विद्यते इति बुद्ध्या मृषासमाधिस्थाभूतः समा
धिर्यस्य तथाभूत एवमास्ते इत्यभिप्रायेण निधाय गतः इत्यर्थः ३१ ततस्तस्य मुनेः पुत्रः अतितेजस्वी ब्रह्मतेजःसंपन्नः बालकोर्भकैः सखी
इत्यातं पितरं राज्ञा ऽघं प्रापितमपराधविषयीकृतं श्रुत्वा तत्रैवेदं वक्ष्यमाणमब्रवीत् ३२ तदेवाह अहो इति पंचभिः बलिभुजां
श्चनां वायसानामिव बलीवूर्णाधिता नां पालानां राज्ञामहो ऽधर्मः पश्यतां कोसावधर्मः द्वारपानां श्चनामिव दासभूतानां राज्ञः
स्वामिनि ब्राह्मणे ऽघमपराध इतियदेषएवाधर्मः ३३ तदेवोपपादयति क्षत्रबंधुर्हि ब्राह्मणे द्वारपालत्वेनैव विनिवेशितः

भा०पु० ८८ एवं किं निभृताशेषकरणो मीलितेक्षणः मृषासमाधिराहोस्वित्किंनु स्यात्क्षत्रबंधुभिः ३१ तस्य पुत्रोतितेजस्वी विहरन्बाल
कोर्भकैः राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ३२ पुत्र उवाच॥ अहो अधर्मः पालानां पीनां बलिभुजामिव स्वामिन्यघं
दासानां द्वारपानां श्चनामिव ३३ ब्राह्मणैः क्षत्रबंधुर्हि द्वारपालो निरूपितः सकथं तद्गृहे द्वाःस्थः सभांडं भोक्तुमर्हति ३४
कृष्णे गते भगवति शास्तर्युत्पथगामिनां तद्भिन्नसेतूनद्याहं शास्मि पश्यत मे बलं ३५ इत्युक्त्वा रोषताम्राक्षो
वयस्यानृषिबालकान् कौशिक्याप उपस्पृश्य वाग्वज्रं विससर्ज ह ३६ इति लंघितमर्यादं तक्षकः सप्तमेहनि धक्ष्यति स्म कु
लांगारं चोदितो मे ततद्रुहं ३७ ततोभ्येत्याश्रमं बालो गलेसर्पकलेवरं पितरं वीक्ष्य दुःखार्तो मुक्तकंठो रुरोदह ३८

द्वाःस्थः क्षत्रबंधुस्तद्गृहे ब्राह्मणगृहे श्वेव कथं सभांडं कुपात्रं यथा भोक्तुमर्हति योग्यो भवेत् ३४ उत्पथवर्तिपत्नानां शास्तरि दं
नरि कृष्णे भगवति स्वलोकं प्रतिगते सति तान् भिन्नमर्यादानहमद्य शास्मि शिक्षये मम बलं पश्यत ३५ वयस्यान् समानवयस्का
श्री० ३ बालकान्प्रतीति त्युक्त्वा रोषेण ताम्रे रक्ते ईक्षणे यस्य सऋषिबालकः कौशिक्यानद्या अप उपस्पृश्याचम्य वाग्वज्रं शापात्मकं
वाग्रूपं वज्रं विससर्ज प्रायुक्त ३६ वाग्वज्रमेव दर्शयति इतीत्यं उल्लंघितामर्यादा येन तं मे ततद्रुहं तत स्तातं पितातस्यापका गा० ३८
रिणं कुलनाशकं राजानं इतः सप्तमेऽहनि मया चोदितः प्रेरितस्तक्षकः सर्पो दंक्ष्यतीति ३७ [illegible] मागत्य गलेकंठे सर्प
पस्य तत्कलेवरं यस्य तं पितरमालोक्य दुःखपीडितो मुक्तः कंठो येन सः उच्चस्वरयुक्तः इत्यर्थः [illegible] ३८ ॥ श्री ॥

अथ तस्यैव भागवताख्ये पुराणे परीक्षिच्छुकसंवादरूपं श्रावयिष्यन् तावत्संवादप्रसक्तिं तयोः तरूपं परीक्षिच्छुकयोः संगमं परी
क्षितः प्रायोपवेशनं तन्मूलं विप्रशापं तन्निमित्तं चाह एकदेत्यादिना यावत्स्कंधसमाप्ति तावत् प्रायोपवेशनिमित्तमाह षड्भिः एकदेति कदा
चित्परीक्षित् धनुरुद्यम्य उद्धृत्य वने मृगयां विचरन् धूपमानः श्रांतः निरंतरं तृषितः तृषा संजाता यस्य संजातेति तथा नारदत्वादि ना२
तच्च २४ क्वचिदपि जलाकरमपश्यमानस्तमाश्रमं प्रविवेश आंगिरसस्याश्रमं प्रविष्टवानित्यर्थः तत्र मुनिमांगिरसं ददर्श कथंभूतमासी
नमुपविष्टं शांतं प्रसन्नं मीलितलोचनं पेनन्नं २५ प्रतिरुद्धानि निर्व्यापारितानि इंद्रियादीनि येन तम् अत एवोपारतं बाह्यव्यापारादुपरतं स्था
नत्रयात् जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयात् परं स्वात्मानं प्राप्तमनुसंदधानं ब्रह्मभूतं ब्रह्मविषयकभावनयान्वितम् अविक्रियं षड्भावः

एकदा धनुरुद्यम्य विचरन्मृगयां वने मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशं २४ जलाशयमचक्षाणः प्रविवेश तमा
श्रमं ददर्श मुनिमासीनं शांतं मीलितलोचनं २५ प्रतिरुद्धेंद्रियप्राणमनोबुद्धिमुपारतं स्थानत्रयात्परं प्राप्तं ब्रह्मभूत
मविक्रियं २६ विप्रकीर्णजटाछन्नं रौरवेणाजिनेन च विशुष्यत्तालुरुदकं तथाभूतमयाचत २७ अलब्धतृणभूम्यादि
रसंप्राप्तार्घ्यसूनृतः अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह २८ अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः ब्राह्मणं
प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च २९ स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा विनिर्गच्छन्धनुःकोट्या निधाय पुरमागमत् ३०

विकाररहितं २६ विप्रकीर्णाभिर्विक्षिप्ताभिर्जटाभिश्छन्नम् आवृतं रौरवेण रुरोर्मृगस्य संबंधिना चर्मणा छन्नं एवंभूतं मुनिं विशुष्य
त्तालुकं शुष्कतालुः स तथाभूतो राजा उदकं जलमयाचत २७ न लब्धं तृणं भूमिरित्यादि शब्दात् आसनोपवेशार्घ्येन न संप्राप्तमर्घ्यं सूनृतं च म
६३ धुरवाक्यं येन तथाभूतो राजा एवं ज्ञानमवहेलितमिवात्मानं मन्यमानो राजा चुकोप २८ क्षुत्तृड्भ्यामर्दितः पीडित आत्मा शरीरं यस्य तस्य
राज्ञो ब्राह्मणं प्रति अभूतपूर्वः पूर्वं भूतो भूतपूर्वः न भूतपूर्वोऽभूतपूर्वः कदाचिदपि पूर्वं न जात इत्यर्थः मत्सरो मन्युश्च हे ब्रह्मन् ब्राह्मणं
प्रति अभूद्बभूव मन्युः क्रोधः अमर्ष इति यावत् मत्सरो द्रोहोऽपचिकीर्षेति यावत् २९ ततः स तु राजा निर्गच्छन् लिंगं तु मृधुक्वा रु
षा ब्रह्मर्षेरंसे धनुःकोट्या धनुषोऽग्रभागेन गतप्राणं सर्पं निधाय पुरं ययौ ३० ॥ ॥ ॥ ॥

स्कंधे ८

किंच तदा नरदेवनाम्नि रथांगपाणाविव लक्ष्यमाणे सति वर्णाश्रमाचारयुतः त्रय्या आगतस्त्रयीमयः तत्र आगत इत्यधिकारे मयट् इति म
यट् वैदिक इत्यर्थः नृणामार्यधर्मः सतां धर्मश्च विलीयते नन्दयति ततो धर्मलयादर्थकामयोर्निवेशित अभिनिविष्ट आत्मा मनो येषां
नृणां शुनामिव कपीनामिव च संकरो भविष्यति ४६ एवं सामान्येन नरदेवस्यानिग्राह्यत्वमुक्त्वा यत्कृतं परीक्षितं निर्दिशन्नाह धर्मपा
भा०प्र० ल इति सतु नृपतिः परीक्षित् धर्मपालः वर्णाश्रमधर्ममर्यादापालकस्तथात्वेन विश्रुतः विपुलकीर्तिः सार्वभौमश्च तत्रापि महाभागवतः
८९८ अनेन ब्रह्मविदपकर्तॄणां नो गतिरेव नास्तीति भावः राजर्षिः केवलं राजन्नर्षिरेव हयमेधेन याज्ञ ईष्टवान् ४७ क्षुत्तृट्श्रमयुतः श्रमसे
न युक्तः अत एव दीनश्च तथाभूतः सर्वथा अस्मच्छापं नार्हति एवमात्मजमनभिनन्द्य तत्कृतादघादात्मनोऽनर्थमाशंक्य भगवन्तं क्षमाप

तदार्यधर्मश्च विलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः ततोर्थकामाभिनिवेशितात्मनां शुनां कपीनामिव वर्णसं
करः ४६ धर्मपालो नरपतिः सतु सम्राड्बृहच्छ्रवाः साक्षान्महाभागवतो राजर्षिर्हयमेधयाट् ४७ क्षुत्तृट्श्रमयुतो दी
नो नैवास्मच्छापमर्हति अपापेषु स्वभृत्येषु बालेनापक्वबुद्धिना ४८ पापं कृतं तद्भगवान्सर्वात्मा क्षन्तुमर्हति तिरस्कृता
विप्रलब्धाः शप्ताः क्षिप्ता हता अपि नास्य तत्प्रतिकुर्वन्ति तद्भक्ताः प्रभवोपि हि ४९ इति पुत्रकृताघेन सोनुतप्तो महा
मुनिः स्वयं विप्रकृतो राज्ञा नैवाघं तदचिन्तयत् ५० ॥

यन्ति अपापेष्विति सर्वात्मा सर्वान्तरात्मा शप्तृशप्तयोरप्यन्तरात्मतया ५९६
वस्थित इति भावः भगवान् अपापेषु स्वभक्तेषु अनेनापक्वबुद्धिना अविवेकरहितेन बालेन कृतं पापं इदं क्षन्तुमर्हति ४८ साक्षान्महि
मा पापराधः कथंचिन्मत्सरेण गणादिना सह्यः स्यान्मद्भक्तविषयापराधस्तु न कथंचिदपि किंतु तैरेव सह्यः इत्येवंविधं भगवदभिप्रायमा
लोच्य तानेव क्षमापयति तिरस्कृता इति तिरस्कृताः परिभूताः अपि प्रलब्धाः प्रतारिता अपि क्षिप्ता निन्दिता अपि हता स्ताडिता अपि तद्दुरुक्ता भा०
भगवद्भक्ताः प्रभवोपि प्रत्यपकर्तुं समर्था अप्यस्य तिरस्कारकर्तुः तत्कृततिरस्कारादिकं [illegible] कुर्वन्ति किं तु केवलं [illegible] ८९
४९ इति एवं स महामुनिः पुत्रकृतेनाघेनानुतप्तः राज्ञा स्वयं विप्रकृतोपि तद्राजकृतमघं [illegible] नैवाचिन्तयत् ५०

ततोहेब्रह्मन्तस्यैवांगिरसः सुतस्य विलापनं श्रुत्वा शोकेन नेत्रे उन्मील्यांसे मम तमुरगं दृष्ट्वा ४० तं परिकृष्य पुत्रं [illegible] एवमेवाह हे वत्सक स्माद्धेतोः त्वमितिशेषः विरोदिषि रोदनं करोषि केन वा तेन त्वां पालकं भावेक्तः इतीत्थमुक्तो बालकः सर्वं तेभ्यो न्यवेदयत् कथयामास ४१ ततो ऽनंतरं हं शापानहं राजानं शप्तमाकर्ण्य पित्रा ब्राह्मणः आंगिरसः पुत्रेनाभ्यनंदत् तदेव दर्शयति अहो इति सार्द्धैः सप्तभिः हे अहो वयो महदंहः पापमहो कृतं त्वया किं तदः अल्पीयसि द्रोहे अल्पापराधनिमित्ते उरुः दमो दंडो धृतः कृतः इत्येतत् ४२ अपकर्त्तेनापि राज्ञा नाप कार्यं इत्याह न वा इति हे अविपक्वबुद्धे नृभिः परिपक्वैः नरदेवो नापकार्यः अतस्त्वं नरदेवं परात्मकं परमपुरुषं इति सामर्थ्यलक्षेण नरदेवनाम्नि रथांगपाणाविति वक्ष्यमाणानुगुणात् नरदेव इत्यात्मा मात्रमेव सनत्कुमारादी ईश्वराणां वेत्तिभावः तं संमातुमर्हाह

श्लो २

स वा आंगिरसो ब्रह्मन् श्रुत्वा सुतविलापनं उन्मील्य शनकैः नेत्रे दृष्ट्वांसे मत्तोरगं ४० विसृज्य पुत्रं पप्रच्छ वत्सक स्माद्धि रो
दिषि केन वा ते प्रतिकृतं मित्युक्तः सन्न्यवेदयत् ४१ निशम्य शप्तमतदर्हं नरेंद्रं स ब्राह्मणो नात्मजमभ्यनंदत् अहो बतांहो मह
दद्य ते कृतमल्पीयसि द्रोह उरुर्दमो धृतः ४२ न वै नृभिर्नरदेवं परात्मसंज्ञं समानुमर्हस्य विपक्वबुद्धे यत्तेजसा दुर्विषहेण गुप्ता वि
दंति भद्राण्यकुतोभयाः प्रजाः ४३ अलक्ष्यमाणे नरदेवनाम्नि रथांगपाणावयमंगलोकः तदा हि चौरप्रचुरो विनंक्ष्यत्यरक्ष्यमा
२ णो विवरूथवत् क्षणात् ४४ तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य वसोर्विलुंपकात् परस्परं घ्नंति शपंति वृंजते पशून् स्त्रि

सितत्वपकर्त्तुं तत्र हेतुमाह यदिति यस्य यद्दृश्यानपकारात्तस्य दुर्विषहेण शत्रुभिरसोढव्येन तेजसा गुप्ताः प्रजाः कुतश्चिदपि भय रहिताः भद्राणि मंगलानि सुखानीत्यावत्तविंदंति लभंते तस्माल्लोकसुखावहो नरदेवो न हंतव्य इति भावः ४३ विपर्यये दोषमाह अलक्ष्यमाण इति त्रिभिः नरदेवाख्ये चक्रपाणौ विष्णावलक्ष्यमाणे ऽविद्यमाने सत्यं गेहे पुत्र तदा अयं लोकः अरक्ष्यमाणः सन् चौरभूयिष्ठः सन् चक्रप्रचुरा विनंघ इव क्षणान्नक्ष्यति नष्टो भविष्यति ४४ नंदंतनुकानो हानिरित्यत्राह तदिति [illegible] न अन्वयं संतानं नाशकं यथाधुना नास्मानुपैति किं यत्पापं यद्विलुंपकाद्धेतोर्वसोर्द्धनस्य नष्टनाथस्य रक्षकरहितस्य सतः पुरवो व कुलाद स्यवोपेवांतेजनाः परस्परं घ्नंति शपंति वाक्याक्कत्यं कुर्वंति वृंजते छिंदंति सर्पाद्वृजते हरंतीत्येतत् ४५

अथोतत्तः इममम्मुंचलोकं विहायलोकान् इतिलोकः फलं सुखमितियावत् ऐहिकामुष्मिकसुखस्पृहां विहायेत्यर्थः इममम्मुंचलोकं
विशिनष्टि स्वेनपुरस्तात्पूर्वमेवहेयतयाविमर्शितौ विचारपूर्वकं हेयत्वेननिश्चितौ इममम्मुंचलोकं विहायेत्यर्थः ततः कृष्णस्यभग
वतोंघ्रिसेवामधिमन्यमानः निरवधिपुरुषार्थसाधनत्वेनमन्यमानः अमर्त्यनद्यां देवनद्यां गंगायां प्रायमनशनव्रतमुपाविशदनशन
भा०प्र० शनव्रतेनदीक्षितोबभूवेत्यर्थः ५ स्वर्गेऽन्यत्रवाप्रायमुपविश्य किं विशेषेणामर्त्यनद्यामेवतदुपाविशदित्यत्रतांविशिंषन्नाह यावै
९० लसंत्याश्रीतुलस्यामिश्रोयः कृष्णस्यांघ्रिरेणुस्तेनाभ्यधिकस्य वशस्तस्यांबुनोंभसोनेत्री प्रवहंती याऽमर्त्यनदी उभयत्रेहामुत्र च सेशान्
लोकपालैः सहितान्लोकान्यानामुनानिर्णीतान् नदीं मरिष्यमाणः कोवापुमान्नसेवेत सर्वोपिसेवेतेत्यभिप्रायेण तस्यामेवप्रायमुपाविशत्

अथो विहायेममम्मुंचलोकं विमर्शितौहेयतयापुरस्तात् कृष्णांघ्रिसेवामधिमन्यमानउपाविशत्प्रायममर्त्यनद्यां ५ यावैल
सच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुनेत्री पुनातिलोकानुभयत्रसेशान्कस्तांनसेवेतमरिष्यमाणः ६ इतिव्यवच्छिद्य
90 सपांडवेयः प्रायोपवेशं प्रतिविष्णुपद्यां दधौमुकुंदांघ्रिमनन्यभावोमुनिव्रतोमुक्तसमस्तसंगः ७ तत्रोपजग्मुर्भुवनंपुनानामहानुभावामुनयः सशिष्याः प्रायेणतीर्थाभिगमापदेशैः स्वयंहितीर्थानिपुनंतिसंतः ८ अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमि
र्भृगुरंगिराश्च पराशरोगाधिसुतोथराम उतथ्यइंद्रप्रमदेध्मवाहौ ९ मेधातिथिर्देवलआर्ष्टिषेणोभारद्वाजोगौतमःपिप्प
लादः मैत्रेयऔर्वः कवषः कुंभयोनिर्द्वैपायनोभगवान्नारदश्च १० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

समा८

त्यर्थः लसच्छ्रीतुलसीकृष्णांघ्रिरेणुनाहेतुनोऽभ्यधिकरहितमंबुतस्यनेत्रीत्यर्थः ६ सपांडवेयः परीक्षिदित्यंविष्णुपद्यांगंगायां
प्रायोपवेशं प्रतिव्यवच्छिद्यविनिश्चित्यसंकल्प्यमुक्तः समस्तेषुदेहतदनुबंध्यादिषुसंगोयेनमुनीनांव्रतंयस्यनविद्यतेन्योभावनाचिंतायस्य
स्यसः मुकुंदांघ्रिंदध्यौध्यातवान् ७ तदातत्रराज्ञः संनिधौमहानुभावाः सशिष्यामुनयोलोकं पुनानाः पवित्रीकुर्वंतः आजग्मुः भुवनं
नानाइत्येतदेवोपपादयति प्रायेणसंतः साधवः तीर्थयात्राव्याजैः स्वयमेवतीर्थानिपुनंतिहि यथाचपुनंतितथोपपादितं कीर्ति
तीर्थीकुर्वंतितीर्थानीत्यत्र ८ केचत्तेमुनयस्तत्रतान्दर्शयति अत्रिरितिसार्द्धद्वयेन गाधिसुतोविश्वामित्रः रामोभार्गवः कुंभयोनिर
गस्त्यः १०

कुतो नाचिंतयदित्यत्राह प्रायश इति लोके परे रन्यै द्वंद्वेषु शीतोष्णसुखदुःखादिषु योजि[illegible]ता प्रायेणन व्यथंतिन दुः
ख्यंतिच यथा सुखे योजिता न हृष्यंति तथा दुःखे योजिता न व्यथंतीत्यर्थः कुतः यतः आत्मा[illegible]यः यद्वाऽऽगुणाश्रयइतिछे
दः गुणकार्यरागद्वेषाद्यनाश्रयः ५२ प्रथमे शार्दूलः महीपतिरिति अथ स्वपुर प्रवेशानंतरं महा[illegible]तिः दशान्तिदात्मकृतं तदुःखनिधं[illegible]
गर्ह्यं कर्म चिंतयन् दुर्मनाः आत्मनिंदापरो बभूवेत्यर्थः तदेव दर्शयति साई दूयेन अहो मया मूर्खवन्निरागसि निरपराधिनि गूढ मनसि
कृते तेजः सामर्थ्यं यस्मिन् ब्रह्मणि ब्राह्मणविषये ऽसौ वंनिं कृष्ट कर्म कृतमसौ वंपाय १ ततोऽसौ वाह्यतादेवहेलनरूपा कर्मणोनिमित्ता
नर्द् तं केवलं मया ब्राह्मणो वहेलितः किंतु साक्षाद्देवो भगवानेवेत्यभिप्रायेण देवहेलनादित्युक्तं मेममनातिदीर्घोऽस्तु मनंतरकालमेवधृत्व

नीकृंदलापि पा० ६

प्रायशः साधवो लोके परैर्द्वंद्वेषु योजिताः नव्यथंति न दुःख्यंति यतस्त आत्मा गुणाश्रयः ५२ इति श्री० प्रथमस्कंधे परीक्षितंशापो नाम द्वा
शोऽध्यायः १८ सूत उ० महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिंतयन्नात्मकृतं सुदुर्मनाः अहो मया नीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढ
तेजसि १ ध्रुवं ततो मे कृतदेवहेलनाद्दुरत्ययं व्यसनं नातिदीर्घात् तदस्तु कामं त्वघनिष्कृताय मे यथा न कुर्यां पुनरेवमद्धा २
अद्यैव राज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे दहत्वभद्रस्य पुनर्न मेऽभूत्पापीयसी धीर्द्विजदेवगोभ्यः ३ स चिंतय
न्नित्थमथाशृणोद्यथा मुनेः सुतोक्तो निरृतिस्तक्षकाख्यः स साधु मेने नचिरेण तक्षकानलं प्रसक्तस्य विरक्तिकारणं ४॥

यमतिवर्तितुमशक्यं व्यसनं दुःखं ध्रुवं नूनं भविष्यति तत्स्वस्य हितमेव मन्ये तदिति तद्व्यसनं ममाघनिः कृताय पापविशुद्धये कामं
प्रकामम स्तु किमनिष्टं प्रार्थयसे इत्यत्राह यथा पुनरेवं विधमघं न कुर्यामद्धा न कुर्यामेव अद्धेति स्फुटावधारणयोर्द्योतकमव्यय
शिक्षार्थमस्त्विति भावः अस्त्वद्धाऽस्त्वेवेति वान्वयः २ अद्येति प्रकोपितं कोपं प्रापितं यद्ब्रह्मकुलं तत्कर्तृकं निग्रहात्मकोऽनलोऽग्नि
रद्यैव मम राज्यं बलं सैन्यं प्रभूतधनं कोशं च दहतु यथा पुनर्मेऽभद्रस्य ममद्विजेभ्यो देवेभ्यो गोभ्यश्चापचिकीर्षा प्रकाचेवंदि[illegible] पापी
यसी बुद्धिर्माभूत् यथा शिक्षार्थं दहत्विति भावः ३ इत्थं संचिंतयन्नाज्ञा यथा येन प्रकारेण तक्षकाख्यो निरृतिर्मृत्युर्मुनेः सुतनोक्तः
शापात्मकोक्त्या प्रचोदितस्तथैव सुश्राव ततः स राजा प्रसक्तस्य विषये स्थितिशीलस्य विषयासक्तस्य स्वस्य विरक्तिकारणं हेतुगर्भमि

मस्त्वेवंप्रकृतंकिमित्याह तमिति हे विप्रा भवंतः इयंदेवीगंगाचैशेभगवतिध्यानैर्येनतथाभूतंतंमुक्तविधंउपयातमनुवर्तिनंप्रतियं
तु हे, योवादेयथुस्कृषुंजानेतित्यर्थः द्विजेनोपसृष्टःप्रचोदितःतन्दकःकुहकःविस्मापकःमांवंचयन्नलंनितरांदशतुनाहंबिभेमीतिभावः
किंतुयूयंविष्णोर्गाथाःकथागायतकथयत अलंगायन्त्वितिवान्वयः १५ पुनःकिंचममभागवत्स्वनंतेरतिर्भक्तिःसदाश्रयेषुभगवद्भक्ते
भा०प्र० षुसंगश्चस्यादेवमनुगृह्णन्त्विति भावः किंचयांयांसृष्टियद्यज्जन्मप्राप्नोमितत्रसर्वत्रजन्मनिमहत्सुभवादृशेषुमैत्रीश्चानुकूल्यं
८१ द्विजेभ्योवानमः १६ इतीत्येनिश्चयपयुक्तोराजाधीरःस्वसुतेजनमेजयेन्यस्तोनिहितोराज्यभारोयेनतथाभूतःसमुद्रपत्न्यागंगायादक्षि
णाकूलेदक्षिणतीरेप्राचीनकूलेषुप्राचीनाग्रेषुदर्भेषुउपविष्टवान् १७ इत्थंतस्मिन्नरदेवानोदेवेपरीक्षितिप्रायोपविष्टे

तंमोपयातंप्रतियंतुविप्रागंगाचदेवीधृतचित्तमीशे द्विजोपसृष्टःकुहकस्तक्षकोवादशत्वलंगायतविष्णुगाथाः १५ पुन
श्चभूयाद्भगवत्यनंतेरतिःप्रसंगश्चतदाश्रयेषु महत्सु यांयामुपयामिसृष्टिंमैत्र्यस्तुसर्वत्रनमोद्विजेभ्यः १६ सूतउवाच इति
स्मराजाऽध्यवसाययुक्तःप्राचीनमूलेषुकुशेषुधीरः उदङ्मुखोदक्षिणकूलआस्तेसमुद्रपत्न्याःस्वसुतेन्यस्तभारः १७ एवंच
तस्मिन्नरदेवदेवेप्रायोपविष्टेदिविदेवसंघाः प्रशस्यभूमौव्यकिरन्प्रसूनैर्मुहुर्मुदुंदुभयश्चनेदुः १८ महर्षयोवैसमुपा
गतायेप्रशस्यसाध्वित्यनुमोदमानाः ऊचुःप्रजानुग्रहशीलसारायदुत्तमश्लोकगुणाभिरूपं १९ नवाइदंराजर्षिवर्यचि
मू०८१ त्रंभवत्सुकृष्णंमनुव्रतेषु येध्यासनंराजकिरीटजुष्टंसद्योजहुर्भगवत्पार्श्वकामाः २० ॥ ॥ ॥ ॥

दिविदेवसंघाःतंप्रशस्यप्रसूनैःप्रसूनैःकुसुमैःपुनःपुनर्भूमौव्यकिरन्दुंदुभयश्चनेदुर्दध्वनुः १८ येसमागतामहर्षयस्ते
सर्वेउत्तमैःश्लोक्याःप्रशंसनीयागुणास्तैरभिरूपंराजानंप्रशस्यसाधुसाध्वित्यनुमोदमानाःऊचुःकुतःयद्यतस्तेप्रजास्वनुग्रहाय
वशीलस्वभावःसएवसारोयेषांतेतथाभूतास्तान्प्रशस्यानुमोदमानाःऊचुरित्यर्थः १९ उक्तिमेवाह नवाइति हेराजर्षिवर्यनि टी०
त्यंश्रीकृष्णमनुव्रतेअनुवर्तिषुभवत्स्विदंविचित्रंनवेनभवति किंतत्येभवंतःभगवतःपार्श्वसामीप्यंकामयमानाःसंतोराज ८१
किरीटैर्जुष्टंसेवितमध्यासनंसार्वभौमसिंहासनंसद्योजहुःस्तत्यजुरित्येतत् २० ॥ ॥ ॥ ॥

अन्ये च देवर्षयो ब्रह्मर्षयो राजर्षिवर्याः अरुणादयश्च ऋषयः नानागोत्राः नानाविधार्षेयप्रवरान्समेतान् संघीभूतानभ्यर्च्य राजा परीक्षित् शिरसा ववंदे २१ अथ तेषु सुखं यथा तथा उपविष्टेषु सत्सु पुनरपि कृतः प्रणामो येन स राजा उपस्थितः तेषां समीपे तिष्ठन् अभिगृहीतपाणिः बद्धाञ्जलिः विविक्तं युक्तं चेतो यस्य तथाभूतः स्वचिकीर्षितं कर्तुमिष्टं यत् तद्विज्ञापयामास २२ तदेवाह अहो इति च द्वाभ्यां ना मध्ये वयमहो धन्यतमाः उत्तमाः खलु धन्यतमत्वे हेतुं वदन्नात्मनि विशिनष्टि महत्तमैर्भवद्भिरनुग्रहणीयाः यमनुगृहीतुं योग्यं शीलं येषां ब्राह्मणानां भवतां पादशौच्चात् पादसेवामूलकं विसृष्टं दूराद्विसृष्टं दूरात्यक्तं यद्राज्ञां कुलं तद्गर्ह्यं निंद्यं कर्म यस्य तथाभूतं भवति बत इति खेदे २३ ननु महत्तमा

अन्ये च देवर्षिब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च नानार्षेयप्रवरांस्तान्समेतानभ्यर्च्य राजा शिरसा ववंदे २१ सुखोपविष्टेष्वथ तेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत् विज्ञापयामास विविक्तचेता उपस्थितोऽभिगृहीतपाणिः २२ परीक्षिदुवाच अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः राज्ञां कुलं ब्राह्मणपादशौचाद्दूराद्विसृष्टं बत गर्ह्यकर्म २३ तस्यैव मेऽघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभीक्ष्णं निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो भयमाशु धत्ते २४ ॥

१८२

नुग्रहणीयशीलस्य तव कथमधुना तन्निग्रहः प्रवृत्तः इत्यत्र तन्निग्रहोऽप्यनुग्रहरूप एवेत्याह तस्येति तस्यैव अभीक्ष्णं पुनः पुनः गृहेषु व्यासक्तं चित्तं यस्य तस्य अघकृतब्रह्मविद्यपचारस्य पर्यवरि हारक इति शेषः निर्वेदमूलः देहतदनुबंध्यादिषु वैराग्यस्य हेतुः द्विजशापरूपः परावरेशो भगवानेव प्रसक्तः प्रवृत्तः मामनुगृहीतुं भगवत्संकल्प एव द्विजशापव्याजेन प्रवृत्त इत्यर्थः कथंभूतः स्यानुग्रहस्य तमित्यत आह यत्र यस्मिन्मयि प्रसक्तो द्विजशापरूपः परावरेशः आशु भयं धत्ते आदधाति ब्रह्मविदपचारहेतुत्वान्निर्वेदमूलत्वात्संगद्वारा मुक्त्याधायकत्वाच्चानुग्रहरूप एवेत्यर्थः २४ ॥ छ ॥ छ ॥ छ ॥ छ

तत्रैवं प्रच्छतो राज्ञः संनिधौ भगवान् व्यासस्य पुत्रः श्रीशुको भवदागमत्तस्यो कथंभूतः यदृच्छया गां भूमिमटमानः तत्र हेतुरनपेक्षकः
कृत्यपेक्षारहितः तत्र हेतुः निजलाभेन ब्रह्मात्मकस्वात्मानुभवेनैव तुष्टः अलक्ष्यं केश्चिदिभिज्ञातुमशक्यं लिंगं स्वरूपं यस्य तत्र हेतुरव
धूतवेषः अभिभाव्यवेषः अत एव बालैर्वृतः परिवृतः २५ तमिति तमागतं गूढं मषीसंवृतमणिवन्निरोहितं वर्चो यस्य तथाभूतमपित
स्य शुकस्य चिन्हाभिज्ञा मुनयः स्वासनेभ्यः प्रत्युत्थिता बभूवुरित्यन्वयः कथंभूतं द्यष्टवर्षं षोडशवर्षवयस्कं इव स्थितं द्विरावर्तनाभ्यं शोच
र्षाणि यस्य तमिति समाः सुकुमाराः पादादयो यस्मिंस्तद्गात्रं शरीरं यस्य चारुणी सुंदरे आयते विशाले ऽक्षिणी यस्मिन् उन्नता नासिका

॥सूत उवाच॥ तत्राभवद्भगवान्व्यासपुत्रो यदृच्छया गामटमानोनपेक्षः अलक्ष्यलिंगो निजलाभतु
ष्टो वृतश्च बालैरवधूतवेषः २५ तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाहूंसकपोलगात्रं चार्वाय
ताक्षोन्नसतुल्यकर्णसुभ्र्वाननं कंबुसुजातकंठं २६ निगूढजत्रुं पृथुतुंगवक्षसमावर्तनाभिं
वलिवल्गूदरं च दिगंबरं वक्त्रविकीर्णकेशं प्रलंबबाहुं स्वमरोत्तमाभं २७ श्यामं सदापीच्यवयोऽ
गलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन प्रत्युत्थितास्ते मुनयः स्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसं
२८

यस्मिन् तुल्यौ समौ कर्णौ यस्मिन् शोभने भ्रुवौ यस्मिंस्तत्तस्तेषां कर्मधारयः तदाननं यस्य कंबुवच्छंखवद्वर्तुलः रेखात्रयोपेतश्च कंठो य
स्य २६ निगूढे मांसलत्वेनाप्रकाशे जत्रुणी अंसद्वयसंधिगतास्थिनी यस्य पृथु विशालं तुंगमुन्नतं वक्षो यस्य आवर्त आवर्तवद्वर्तुला वि
विक्तारंध्रयुक्ता च नाभिर्यस्य वलिभिस्त्रिभिर्वल्गु सुंदरं यस्य दिगंबरं दिगेवांबरं वस्त्रं यस्य चीरधरत्वेन प्रशस्तांबररहितमित्यर्थः
उपरि वाससा रहितं वा अन्यथा मोक्षधर्मादिषूक्तप्रकारविरोधात् वक्त्रविकीर्णाः केशा यस्य प्रलंबा आजानुलंबौ बाहू यस्य स्व
मरोत्तमस्यामरश्रेष्ठस्येवाभा यस्य २७ श्यामं कमनीयं वयो यस्मिंस्तत्स्यांगस्य लक्ष्म्या कांत्या सुंदरस्मितेन च स्त्रीणां मनोज्ञं स्पृह
णीयं २८

भा०प्र०
८२

92

राम
८२

एवं राज्ञा नमुक्तार्थमित्यत्राहुः सर्व इति यावद्भागवतप्रधानानितरां सेव्यायस्यासौ राजा कलेवरं विहाय विरजस्कं शुद्धसत्वमयं वि
शोकमिदमुपलक्षणं अपहतपाप्मत्वादिगुणाष्टकप्रादुर्भाववद्देशं परलोकं नित्यविभूत्याख्यं यास्यति तावद्वयमत्रैव यस्मिन्हे वराज्ञः सन्निधा
वेवास्महे आसीमहि २१ तत्समं वैषम्यरहितममृतस्राविगुर्वाशयगंभीरमव्यलीकं निष्कपटं च मुनीनां वचनमाकर्ण्य राजानंदितानां
त्महितान्चरणोद्युक्तान्ऋषीनभिनंद्य विष्णोश्चरितानि श्रोतुकामः परीक्षिदभाषत २२ तदेवाह समागताइति त्रिपृष्ठे सत्यलोके यथामूर्ति
धराः वेदास्ते समाः सर्वे यूयं सर्वतः सर्वाभ्यो दिग्भ्य इह समागताः मदनुग्रहार्थं इह समागता इति भावः तदेव व्यक्ति समागतानां वः परानु

ना१

॥सर्वे वयं तावदिहास्महेऽथ कलेवरं यावदसौ विहाय लोकं परं विरजस्कं विशोकं यास्यत्ययं॥
॥भागवतप्रधानः २१ आश्रुत्य तदृषिगणवचः परीक्षित्समं मधुच्युद्गुरु चाव्यलीकं आभाषतै॥
॥नानभिनंद्य युक्तः शुश्रूषमाणश्चरितानि विष्णोः २२ परीक्षि॰ समागताः सर्वत एव सर्वे वेदा यथा॥
॥मूर्तिधरास्त्रिपृष्ठे नेहाथवामुत्र च कश्चनार्थः ऋते परानुग्रहमात्मशीलं २३ ततश्च वः पृच्छ्यमि॥
॥मं विपृच्छे विश्रभ्य विप्रा इति कृत्यतायां सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियुक्ताः २४

ना१

ग्रहमात्मशीलं विना इहामुत्र च लोके अर्थः प्रयोजनं कश्चिदपि नास्ति हि परेषु महेशोऽनुग्रहरूपमात्मशीलं स्वस्वभावं स्वव्रतं वा विना
न्यथागमनकारणं नास्ति हीत्यर्थः २३ यतो भगवदागमनमस्मदनुग्रहैकप्रयोजनं ततो हे विप्राः वो युष्मान् विस्रम्भ्य विश्वस्येति कृत्यता
यामिति कर्तव्यतायां पृच्छ्यं इमं वक्ष्यमाणं पृच्छामि कर्तव्यतापारप्रकार इति कृत्यतांतरसो निमित्तभूतायामिति कर्तव्यताज्ञानार्थं पृष्ट
व्यं पृच्छामीत्यर्थः पृच्छामेव दर्शयंस्तत्सम्यक् निर्णीय कथयतेत्याह म्रियमाणैर्मुमूर्षुभिर्जनैः सर्वात्मना सर्वप्रकारेण करणत्रयेण
कर्तव्यं शुद्धं संसारनिमित्तं च यत्कर्म तत्राभियुक्तास्तद्विमर्शनाभिमुखाः युक्ताः संतो यूयं मृशत विमृशत तदुपदिशत हे अभियुक्ता इ
ति संबोधनं वा २४ ॥

ॐ०
भा०प्र०
९३

यत एवमतो हे महायोगिंस्तव सान्निध्यादेव हेतोः पुंसां मादृशानां महांत्यपि सर्वाणि पातकानि सद्य एव नश्यंतीति ३४ किंच भगवतः श्रीकृ
ष्णस्य अनुग्रहकारितं भवद्दर्शनादिकं मन्यथा तु दुर्लभमित्याह अपीति द्वाभ्यां तावत्तदनुग्रहस्त्वस्माकं सुलभ इति संभावयामीत्यभिप्रायेण
ह अपीति अपिशब्दः संभावनाद्योतकः मम भगवान्कृष्णः प्रीतः प्रसन्नः स्यात्तत्र हेतुं वदंस्तं विशिनष्टि पांडुसुताः प्रिया यस्य सः पांडुसुतानां च
प्रियः अस्तु पांडुसुतप्रियः त्वत्प्रियस्तु कथं स्यात्तत्रोपपत्त्यानुगतं हेतुं वदन्विशिनष्टि पितुर्भगिनी पितृष्वसा कुंती तस्या अपत्यानि ये तेषा
मेपास्तेषां प्रीत्यर्थं तद्गोत्रस्य पैतृष्वसेयसंतानस्यापि बांधवः पितृष्वसुः प्रियस्तत्प्रीत्यर्थं तत्पुत्रेषु पुनस्तत्प्रीत्यर्थं तत्पुत्रादिष्विति बंधा
वत्तत्संतानप्रिय इत्यर्थः आत्तबांधव इति पाठे आत्तः उपात्तः परिगृहीतो बांधवः इष्टबांधव इत्यर्थः भगवत्प्रसादेन त्वद्दर्शनं जा त

सान्निध्यात्ते महाबाहो पातकानि महांत्यपि सद्यो नश्यंति वै पुंसां विष्णोरिव सुरेतराः ३४ ॥
अपि मे भगवान्प्रीतः कृष्णः पांडुसुतप्रियः पैतृष्वसेयप्रीत्यर्थं तद्गोत्रस्यात्तबांधवः ३५
अन्यथा तेऽव्यक्तगतेर्दर्शनं नः कथं नृणां नितरां म्रियमाणानां संसिद्धस्य वनीयसः ३६
अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुं पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ३७

त्वत्प्रसादस्तु नः पितृष्वसुः संतानप्रभवत्वादिति भावः ३५ अन्यथा भगवतः प्रीत्यभावेऽव्यक्तगतेः सांसारिकैरलक्ष्यगतेर्वनीयसः अतिशयेन
वनवासिनः संसिद्धस्य कृतकृत्यस्य ते तव दर्शनं नृणां संसारिणां तत्रापि नितरां म्रियमाणानां नोऽस्माकं कथं स्यात् वनमस्यास्तीति वनी
वनवासमकृतवदृषिसंघापेक्षयातिशयेन वनी इति वनीयांस्तस्य वनीयसः ३६ यतो दुर्लभमपि त्वद्दर्शनमभूदतो योगिनामपि परमं गुरुं राम
त्वां संसिद्धिं पृच्छामि संसिद्धिः सर्वो मुक्तिसाधनोपचरितः मुक्तिसाधनं पृच्छामीत्यर्थः तदेव विशदयति इहलोके पुरुषस्य मुमुक्षोः स ९३
र्वदा तत्रापि म्रियमाणस्य यत्कर्तव्यं मुक्तिसाधनं तद्वेति शेषः तत्पृच्छामीत्यन्वयः तद्गृहीत्वा तरेणान्वयः ३७ ॥ ॥ ॥

९२

93

अथ स विष्णुरातः परीक्षिदागताय तिथये तस्मै श्रीशुकाय शिरसा नम्रेणेति शेषः सपर्यां पूजां जहार स्वस्यार्थ शिरसा प्रणामपूर्वं पूजां चकेत्यर्थः तथा तमनुसृत्यागता अज्ञा बालकाः प्रतिनिवृत्ता बभूवुः ततः स पूजितः शुकः महासने मह इति राज्ञा समर्पिते आसने उपविवेश २८ तत्रासने उपविष्टः स महीयसामपि महीयान् महात्म्ययुक्तः भगवान् शुकः ब्रह्मर्षिप्रभृतीनां संघैः लं नितरां अरोचत यथा ग्रहर्क्षादीनां निकरैः समूहैः परिवृतश्चन्द्रस्तद्वत् ग्रहाः भौमादयः ऋक्षा अश्विन्यादीनि नक्षत्राणि तारा अभयेन तारास्ताः ३० प्रशान्तं सात्त्विकवेषम कुण्ठा आवरणरहिता मेधा धीर्यस्य तं पद्मपि निषण्णमासीनं नृपः परीक्षिन् मूर्ध्ना प्रणम्य अवहितः कृताञ्जलिरवहितः

स विष्णुरातोऽतिथय आगताय तस्मै सपर्यां शिरसाजहार ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने सोपविवेश पूजितः २८
स संवृतस्तत्र महान्महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसंघैः व्यरोचतालं भगवान्यथेन्दुर्ग्रहर्क्षतारानिकरैः परीतः ३० प्रशान्तमा।
सीनमकुण्ठमेधसं मुनिं नृपो भागवतोऽभ्युपेत्य प्रणम्य मूर्ध्नावहितः कृताञ्जलिर्नत्वा गिरा सूनृतयान्वपृच्छत् ३१ परीक्षिदु०
अहो अद्य वयं ब्रह्मन्सत्सेव्याः क्षत्रबंधवः कृपयातिथिरूपेण भवद्भिस्तीर्थकाः कृताः ३२ येषां संस्मरणात्पुंसां सद्यः शुद्ध्यंति
वै गृहाः किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः ३३ ॥ ॥ ॥ ॥ ॥

नत्वा उपयुक्तं श्रवणोपयुक्तावधानयुक्तः सूनृतया मधुरया गिरा अन्वपृच्छत् ३१ तदेवाह अहो इति यावत्समाप्तिः तावत्समागमनेनात्मनः कृतार्थतामाविःकरोति अहो इति हे ब्रह्मन् वयं क्षत्रबंधवोऽप्यद्य अहो सत्सेव्याः संतः सेव्याये वां तथाभूता अभूम। यद्वा सतां यः से आगमनं स आद्याभूम तत्र हेतुमाह कृपया भवद्भिरतिथिरूपेणातिथिव्याजेन वयं तीर्थकाः कृताः पवित्रीकृताः ३२ कथमतोऽतिथिरूपेण स्मदागमनस्य एव तीर्थभूताः इत्यत्र तत्केमुत्यन्यायेन दर्शयति येषामिति येषां भवतां स्मरणादेव सद्यः पुंसां स्मर्तॄणां गृहाः शुद्ध्यंति किं पुनर्भवतां दर्शनादिभिः शुद्ध्यंतीति वक्तव्यं पादशौचं पादजलं ३३ ॥ छ ॥ छ ॥ छ ॥

श्री०
भा०प्र०टी०
९४

।कर्तव्यमेव विभज्य पृच्छति तद्विपर्ययमकर्तव्यं च ब्रूहीत्याह यदिति हे प्रभो नृभिर्मुमुक्षुभिर्यच्छ्रोतव्यादिकं यच्च विपर्ययमश्रोतव्या।
दि च तत्सर्वं ब्रूहि कथय यत्कर्तव्यमित्युपात्तश्रोत्रादिकरणव्यतिरिक्तकरणव्यापारार्थं प्रश्नः स्मर्तव्यं मंतव्यं भजनीयं चेति पूर्वकमनुष्ठे
यमतो न पौनरुक्त्यमथो अपि चेत्यर्थः ३८ यावत्तनुत्यागमेतत्स्वेंद्रं प्रश्नविवदता अनियतावस्थानेनाधितयावस्थानमित्यभिप्रायेण तद
वस्थानमनियतत्वेनस्तौति नूनमिति हे ब्रह्मन् गृहमेधिनां गृहाश्रमीणां गृहेषु क्वचिदपि भगवतस्तवावस्थानं गोदोहनमपि गोर्दुह
नेयावता कालेन तावान्कालगोदोहनशब्देन विवक्षितः तावत्कालमपि न लक्ष्यते हि ३९ एवमिति इत्थं राज्ञाभाषितः प्रष्टो भगवं

यच्छ्रोतव्यमथो जाप्यं यत्कर्तव्यं नृभिः प्रभो स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययं ३८ नूनं भगवतो ब्रह्म
न्गृहेषु गृहमेधिनां न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित् ३९ सूत उवाच ॥ एवमाभाषितः पृष्टः सः रा
ज्ञा श्लक्ष्णया गिरा प्रत्यभाषत धर्मज्ञो भगवान् बादरायणिः ४० ॥ ॥ ॥ इति श्रीमद्भागवते महा
पुराणे ऽष्टादशसहस्रसंहितायां प्रथमस्कंधे शुकागमनो नाम एकोनविंशोऽध्यायः ॥ १९ ॥ ॥ ॥
संवत् १८८१ अश्विन शुक्ल दशम्यां १० चंद्रदिने लिखितं श्रीदियालसमणेन ॥ सुत ठंढिराम का ॥ १ ॥
नगलाउवामध्ये ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ १

ब्रह्मन्नित्यादिनोक्तः ४१ अतः पप्रच्छासि संसिद्धिमित्यादिना ४२ स भगवान् धर्मज्ञः मुमुक्षूणां मुमूर्षूणां कर्तव्यधर्मयाथात्म्याभि
ज्ञो बादरायणिः शुकः श्लक्ष्णया विशुद्धया मधुरया गिरा प्रत्यभाषत प्रश्नानामुत्तराण्युवाचेत्यर्थः ४० ॥ ॥ इति श्रीवत्सान्वयपयःपा राम
रावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसन्नतत्सूक्तिसमधिगत श्रीमद्भागव ९४
तार्थहृदयेन श्रीवैष्णवदासेन श्रीवीरराघवविदुषा विलिखितायां श्रीमद्भागवतचंद्रचंद्रिकायां प्रथमस्कंधदीपिकायां टीका।
यामेकोनविंशोऽध्यायः १९ ॥ ॥ ग्रंथसंख्या मूलश्लोक ९४६ टीका ४६१४ समस्तश्लोक ५५६० ॥ शुभं मस्तु कल्याणं भवतु ॥

94

२५ कोष्ठाप्रलाद शास्त्री वैद्य

95